छत्रे-नाटक-संग्रहः ११ नाटकानि

प्रणेता - वि० के० छत्रेशास्त्री

कल्याण

(जि. ठाणे)

छगे - नाटक - चमत्कार

प्रस्तावना

दौरात्म्यं च कृतघ्नता च विकृतिः
स्वार्थांधता वंचना
सेवाप्रीति - सतीत्व - धैर्य - शुचिता -
सत्यव्रतं च द्युतिः ।
इत्यादीनवलोक्य दोषसुगुणान्
लोके तथाध्यात्मनो
नाट्यं प्रस्फुरितं कवौ रचयते -
बोधप्रदं रञ्जकम् ॥

कः अपि असामान्यः वृत्तांतः, समाजहानिकरः अवगुणः, लोकोपकारी गुणविशेषः वा उत्कटतया दृष्टिपथं श्रोत्रपथं वा आगतः, अनुभूतः वा प्रेरयति प्रतिभावंतं कविं नाट्यरचनायै।

२) कमपि समाजविद्रोहकरं प्रतिष्ठितं दुर्जनं समक्षं निंदितुम् अशक्यं भवति व्यक्तेशः केनापि समाजहितेच्छुना। तस्य दुर्जनस्य दुश्चेष्टाभिः पीड्यमानानां दुर्बलानां यातनाः प्रेक्ष्य व्यथितः कविः

નાટ્યં પ્રસ્ફુરિતં કવૌ સ્વયમેવ
બોધપ્રદં રંગકે ॥

નાટ્યં પ્રસ્ફુરિતં કવૌ
સ્વયમેવ

नाट्यं विरच्य तं दुर्जनं मुक्तमनसा निंदितुं, तेन पीडितानां जनानां भावनाश्च निःसंकोचम् अभिव्यंतुं शक्नोति, तदैव च मनाक् समाधत्ते। स्वस्य गुणविशेषाः, प्रसंगेन अभिज्ञाताश्च दोषाः अपि निःसंकोचवृत्त्या नाट्ये प्रदर्श्यंते कविना तादृशपात्राणि निर्माय। निंदितः दुर्जनः दिष्ट्या यदि प्रेक्षकेषु एकः, स्वस्य क्रियमाणां निंदां पीडितानां च दुःखोद्गारान् श्रोतुम् अशक्नुवन् सः सद्यः निष्क्रामति प्रेक्षागृहात् वा सधैर्यं शृण्वन् अंतर्मुखः भूत्वा दुश्चेष्टाः त्यक्तुं संप्रेयते इति संभवति। सत्यान्वेषणेऽपि नाटकं साहाय्यं करोति। उदा० हॅम्लेट - सः राजपुत्रः पिशाचरूपेण जनकेन रहः विज्ञापितः, स्वयं कथं भ्रात्रा विषप्रयोगेण घातितः इति। राजपुत्रेण ततः तादृशं नाट्यप्रयोगम् आयोज्य स्वपितृघातकः पितृव्यः तस्य साहाय्यदात्री व्यभिचारिणी च स्वस्यैव माता निमंत्रिते नाटकप्रेक्षणाय

स्वेन कृतं विषप्रयोगं नाटके क्रियमाणं दृष्ट्वैव राजा राज्ञी च प्रक्षुब्धौ उत्थाय सद्यः निष्क्रांतौ। राजपुत्रः तद् दृष्ट्वा ताभ्यामेव पिता घातितः इति प्रत्ययं लब्धवान्। राज्ञः हरिश्चंद्रस्य नाटकं सत्यं प्राणपणेन आश्रयितुं लोकान् प्रेरयति। कै० नाट्याचार्य रवाडिकर-रचितं कीचक-वध-नाटकं लोकपीड़ा-प्रदे आंग्लशासने, स्वातंत्र्याय उत्थातुं प्रच्छन्नं बोधं सुविद्येभ्यः भयच्छत्र प्रेरणां च कृतये इति प्रसिद्धमेव। एवं नाटकं मनोरंजनप्रधानमपि उद्बोधकरं भवति जनानाम्।

अस्य नाटकचक्रस्य रचनायां किं किं मां प्रेरयामास तद् इदानीं निवेद्यते। भारतमहामंत्रिपदारूढस्यापि जवाहरलालस्य बालेषु वात्सल्यं, क्षुधा बुभुक्षितानाम् अंत्यजानां श्राद्धान्नेन संतर्पणेन प्रदर्शितं औदार्यं, असामान्यं धैर्यं, सकलविधैश्वर्यवतोऽपि जवाहरलालस्य उत्कटा देशभक्तिः कुबेरपाशात् पत्न्या चिरवियुक्तस्य

यक्षस्य पत्नीविषये निःसीमं प्रेम, स्वातंत्र्य
रक्षणे प्रतापसिंहस्य पराकाष्ठा, तया प्रभा-
वितस्य तस्य अनुजस्य च शत्रुपक्षात् प्रत्या
दय अग्रजेन सह मीलनं, जीवनावश्यक-
वस्तुनः दुर्भिक्षेण दुर्लभत्वेन च सामान्य-
जनानां संभ्रमेण सह उदीयमानं कृच्छ्रं
रक्षयायाः मुनिधेन्वाः प्राणरक्षार्थं दिलीप-
स्य आत्मार्पणसिद्धता, अज्ञातवासेऽपि
भीमेन युक्त्या कृतं धर्मपत्न्याः द्रौपद्याः
आक्रमकीचकवधेन विमोचनं, लाल
बहादुरशास्त्रिभिः पाकिस्तानप्रतीकारे-
प्रदर्शितम् असामान्यं धैर्यं, तेषां गूढः
शोचनीयश्च अकस्मात् मृत्युः, राजैश्वर्यं
सुंदरपत्नी प्रथमश्च लब्धुः प्रियः बालः
एतानि आत्मज्ञानप्राप्तये त्यजतः
सिद्धार्थस्य प्रखरं वैराग्यं, प्रबलाँग्ल-
शासनस्य अन्याय्यं निर्बंधं भंतुं
महात्मना प्रवर्तितः अपूर्वः शांति-
संग्रामः इति एतानि अत्र मम प्रेरक-
निमित्तानि।

रचयते रसवित्स्तुतिनोदनात्
प्रतिभयोत्तमनाट्यकृतिं कविः।

फलति सा तु नयोत्तमनाटनात्-
गुणवतीव सुयोग्यवरोद्वहात् ॥

यथा गुणवत्याः कन्यायाः जीवितसाफल्यं सुयोग्यवरेण सह परिणयेन तथा उत्तम-नाट्यकृतेः साफल्यं तस्याः प्रदर्शनं नटोत्तमैः।

दिव्यात्मा गु० श्री० आप्पाराव-भिडे-महोदयसदृशाः रसिकाः लब्धाः मया नवरचनाः आस्वादयितुम्। तेषां प्रोत्साहनेन मम प्रतिभा सदैव उत्फुल्लयति नवनवरचनाश्च विदधाति। श्री० मधुकर-फाटक-महाशयाः, नभोवाणीद्वारा ध्वनिदर्शनप्रयत्नं, महाराष्ट्रराज्यसंस्कृतनाट्य-स्पर्धायां प्रदर्शनाय च मां प्रेरयन्ति पुनः पुनः नवनाट्यरचनायै, मराठितश्च ख्यातनाटकस्य संस्कृतानुवादाय। दुर्लभ अयं कवि-रसिक-प्रदर्शयितॄणां त्रिवेणी संगमः।

नैके विषयाः मां सततं बलवत् प्रेरयन्ति नाट्यरचनायै। ते एवम्-

१) देवालयस्थः देवः २) याचकः ३) प्रतिवेशी

*१ विश्वसंस्कृतम् जून १९६२ प्रसिद्धम्

८ ऑफिसर्स, ८ संन्यासिसंतानम्
इ० ति०

दक्षे-नाटक-चक्रम् - प्रस्तावना ६

४) विवाहापणम् ५) असत्यमेव जयते
६) कार्यालयचोष्टितानि ७) श्रीएकनाथ
कृतं जामातुः दुर्व्यसनाद् विमोचनं, ८) संन्यासी
गृहस्थाश्रमे प्रवेशितः ९) व्यर्थं न भूयाद्
बलिदानमेतत् इ०

यदि भगवान् इच्छेत् तर्हि सदा कार्य-
व्यामृतात् मत्तः सः काः अपि रचनाः
कल्पनासृष्ट्याः शब्दसृष्ट्याम् अवतारयेत्।
अंते श्रीमन्नटराजः श्रीशारदा, श्रीदेववाणी
इत्येषां स्तवनेन विरमामि।

भोः श्रीमन्नटराज! पूर्णसुकृपा श्रीशारदे! त्वं मयि
शीघ्रं सुकृतया च नाट्यरचनामीष्टां हि संपादय।
सासिध्यं त्वनुवादरूपकृतिरप्याशु स्वतंत्रेव च
यद्याथार्थ्यमहो! स्वयं हि रसिकैः प्रीतिमद्भिः
स्तुतम्॥

धन्या सा खलु देववाक् सुनिपुणा बह्वाशयव्यक्तये
प्रायो याप्रियते समस्तजगति श्रेष्ठा पवित्रीति च।
तन्माधुर्यमहो! ऽमृतोपममनिर्वाच्यं सदास्वाद्यताम्
आत्मा संपरितोष्यतां च परमानंदेन नाट्यप्रियैः।

वि० के० दक्षेशास्त्री
कल्याण
दि० १ ६ ए प्रिल १९५४

नाट्यरसिकानां
वशंवदः
[illegible]

छन्दो-नाटक-चक्रम्

अनुक्रमणिका

		नव क्रमांकः	पृष्ठम्
१	बालानां जवाहरः	१	
२	श्राद्धाञ्जलेन अंत्यजतर्पणम्	२	
×३	जवाहरस्वर्गारोहणम्	५	
×४	नाट्यस्वप्नं मेघदूतम्	७	
५	प्रतापशालयोः	६	
६	मृत्तैलाख्यानम्	४	
×७	नंदिनीवरप्रदानम्	३	
×८	कीचकहननम्	१२	
९	अन्धयकौ लालबहादुरोऽभूत्	९	
१०	सं० सिद्धार्थप्रव्रजनम्	१३	
११	अपूर्वः शांतिसंग्रामः	८	

× मुंबई नभोवाणीतः ध्वनिक्षेपितम्

श्री० छत्रेशास्त्रि विरचिताः अन्यनाट्यरचनाः

स्वतंत्राः

१ शिक्षणेन किमिदं ह्युपेक्षितम्? - विश्व-संस्कृतम्-

२ ध्रुवपदम्-

३ स्वातंत्र्यवीराणां पुण्यस्मरणम्-

४ रणरागिणी राज्ञी लक्ष्मीः - विश्वसंस्कृतम्

अनुवादरचनाः

१ सं० स्वयंवरम् संपूर्णम्-

×२ सं० विद्याहरणम् अंतिमः प्रवेशः

×३ अपकर्मानम् केचन प्रवेशाः

४ चांद्रसेनीयम् ‖ "

५ अपेहि रे! भारतभूमिपारम् "

×६ शस्त्रग्रहणम् ‖ "

७ कौंतेयम् "

×८ प्रेमसंन्यासम् ‖ "

९ पुण्यप्रभावम् अंतिमप्रवेशः

× मुंबई नभोवाणीतः ध्वनिक्षेपितम्-

‖ महा० शासनायोजित संस्कृतनाट्यस्पर्धायारितोषिकम्

बालानाँ जवाहरः

प्रस्तावना

"तस्मै नमो गांधिमहात्मनोऽस्तु" नाम्न्या परिश्रमपूर्वकं विरचितायां कवितायां गांधिजन्मदिने - 2 अक्टो० १९५७ इत्यनिरोपणार्थं मोहमयीनम्नीवाण्या स्वीकृतायां प्रोत्साहितेन कविना एकमेकुलोत्पन्नेन केशवसूनुना विश्वनाथेन नचिरात् भारते सर्वत्र सोत्साहं निर्वर्त्यमानस्य श्री० जवाहरलाल-नेहरूपण्डितस्य उपयोगार्थं 'बालानाँ जवाहरः' नाम लघुतानाटिका विरचिता प्रहिता च नम्नीवाणीं प्रति। परं सा अस्वीकार्या मता तया। 'शीर्षणभारती' नाम वार्षिकोत्सवः तदनंतरं प्रवर्तितः नम्नीवाण्या इति अवधेयम्। दिवंगतेऽपि जवाहरलालमहोदये, इयं नाटिका तस्य महापुरुषस्य उच्चतमगुणान् आत्मसात् कर्तुम् इदानीमपि प्रचोदयेत् बालान् इति संशयातीतं खलु। नाट्यसेने प्रथमः एव अयं पदविन्यासः कवेः

सम्पादकः- 'गुंजारवः' संस्कृत
मासिकपत्रं, अहमदनगरम्
जो० हे० १९६८ (वर्ष 3-4)

बालानां जवाहरः

(स्थलम् - मध्यमवर्गीय सदनम्, सायंसमयः गृहद्वारे लता क्रीडति)

लता - तातं दूरात् प्रत्यायान्तम् अवलोक्य सानंदं तालिकानादं कृत्वा) तातः आगतः! तातः आगतः!

वसंतः - (बहिरेत्य) कुत्र? (दूरे निरीक्ष्य) हा! आगतः नूनम्!

लता - मत्कृते प्रायः मोदकम् आनीतं तेन!

वसंतः - मोदकं विना नान्यत् चिंत्यते त्वया अहर्निशम्! नितांतं मोदक-लोलुपा असि!

लता - अपि त्वं न सहभागी भवसि मया सह तत्सेवने? (द्वारं प्राप्तं तातम् उद्दिश्य) तात! अद्य मोदकं वसंताय न दातव्यम्! स मां मोदकलोलुपा इति निंदति!

वसंतः - अद्य महत् कौतुकं संजातम्! तात, आश्चर्यवंतः नूनं वयम्!

तातः - (सकौतुकम्) किं भूतम्? निवेदय तावत्! चलतम्! अंतः प्रविशाम! (सर्वे निष्क्रांताः)

(गृहाभ्यंतरे उपविष्टौ सुखासने पिता-पुत्रौ संवदतः)

तातः - कथय कौतुकम्, वत्स।

वसंतः - नेहरूमहोदयस्य पत्रं प्राप्तम् अद्य शालायाम्। धन्यवादाः शुभाशीर्वादांश्च वितरितास्तेन सर्वेभ्यः छात्रेभ्यः। (उता प्रविशति आसने चोपविशति पितुः समीपम्) तस्य वर्धापनदिन-निमित्तं दीर्घायुरारोग्यचिंतनपरं पत्रं प्रेषितम् आसीत् अस्माभिः मुख्याध्यापकद्वारा।

तातः - शोभनम्। अभिनंदनीयम्। नास्ति ईदृशं भाग्यम् अस्माकं पारतंत्र्य-कारणात्।

उता - कम् उद्दिश्य वसंतः भाषते? तात!

तातः - नेहरूमहोदयम् उद्दिश्य, भारत-स्य मुख्यप्रधानम् उद्दिश्य।

उता - तस्य नाम श्रुतं मया। अस्माकं पुस्तके तस्य पाठः वर्तते। तिष्ठ तावत्। दर्शयाम्यहं तच्चित्रम्। (पुस्तकमानेतुं गच्छति)

वसंतः - तात! कथं 'चाचा' नेहरुः मुख्यप्रधानपदम् अधिगतवान्? अहो प्रतिष्ठा वैभवं च अस्य पदस्य।

तातः - न अकस्मात् । अहर्निशं परिश्रम्य स्वदेशबांधवानाम् अभ्युदयाय ।

लता - (नेहरूचित्रं प्रदर्श्य पुस्तकांतर्गतम्) पश्य, तात! सः अतीव तेजस्वी दृश्यते ।

तातः - आम् । अलौकिकः खलु सः पुरुषः । 'यथा बीजं तथांकुरः' अस्य पिता महान् देशभक्तः आसीत्

लता - किं तस्य नाम ?

तातः - (वसंतम् उद्दिश्य) वत्स, कथय!

वसंतः - मोतीलालः ।

तातः - यथार्थं कथितम् ।

(अंतर्गृहात् गृहिणी - 'वसंत, लते, दिनावधिकार्यभरेण श्रांतः युवयोः पिता । विश्राम्यतु मुहूर्तम् । उभयोः जिज्ञासा पश्चात् तृप्येत ।)

तातः (गृहिणीं प्रति) मा, मा एवम् । अद्य अहं न तादृक् श्रांतः । बालानां च उत्साहभंगः न कदापि कार्यः । लते, अस्य पाठात् पठ कमपि श्लोकम् ।

लता - नेता महान् यद्यपि भारतस्य बालेषु यो बालसमस्तु भूत्वा ।

क्रीडन् सुहासै रमते समोदं
तस्मै प्रणामोऽस्तु जवाहराय ॥

तातः - ज्ञायते किं त्वया अस्य आशयः?

लता - आम् ।

तातः - कथय तर्हि ।

लता - भारतस्य महान् नेतापि सः जवाहरलालः बालेषु बालसमः भूत्वा क्रीडति, हसति, रमते च समोदम् । ईदृशाय जवाहराय प्रणामः अस्तु ।

तातः - समीचीनम् । का तव शिक्षिका?

लता - देशपांडे-महाभागा । सा सुष्ठु अध्यापयति । ह्यः एव अस्य श्लोक-स्य अर्थः विशदीकृतः तया । परम्-

तातः - किम् ?

लता - कापि शंका बाधते माम् ।

तातः - पृच्छ तावत् ।

लता - ईदृशः महापुरुषो ऽपि बालैः सह क्रीडति हसति च । किमिति त्वं न क्रीडसि मया सह कदापि ?

तातः - (स्वगतम्) हा! अनया कूटे स्वकु निपातितः अहं, स्थाने व्याशंस्य । आश्वासनमेव उपायः इदानीम् । (प्रकाशम्) अतः परं

रविवासरे अवश्यं क्रीडिष्यामि त्वया सह।

लता - (सहर्षम्) अपि सत्यम्?

तातः - सत्यमेव।

लता - कां क्रीडां करिष्यावः? पत्र-क्रीडा रोचते किम्?

तातः - आम्।

लता - तर्हि 'दण्ड' नामके खेले रंस्यावहे

तातः - दण्ड? न मया ज्ञायते सः खेलः

लता - तर्हि शिक्षयामि त्वाम्।

तातः - शिक्षेऽहम्। परं त्वं पटुः मां जेष्यसि प्रतिखेलम्।

लता - न हि। तथा शिक्षयामि यथा त्वमपि मां जेष्यसि।

तातः - शोभनम्। शिक्षे सावधानम्

लता - तर्हि निवेदयामि मातरम् इमाम् आनंदवार्ताम्। (निष्क्रांता 'तातः मया सह क्रीडिष्यति' इति तालिकावादनेन सह सानंदम् उच्चैः भूयः वदंती)

वसंतः - भारतस्य भाग्यं खलु यद् जवाहरलालसदृशः नेता प्राप्तः तेन। वार्तापत्रपटे मया दृष्टं कथं सः अमेरिकां गतः सत्कृतः महाडंबरेण तत्रत्यशासनेन। तस्मिन् देशे यत्र यत्र सः अगच्छत्

तत्र तत्र तद्-दर्शनोत्सुकः महान् जनसंमर्दः तं सुचिरं प्रतीक्षमाणः दृष्टः - बालाः स्त्रियः पुरुषाः सर्वेऽपि। न आश्चर्यं सः देश-बांधवानां प्रीतिभाजनं भवति।

तातः - इदं तु स्वातंत्र्यस्य सुमधुरं फलम्। गांधिमहात्मनः सः शिष्योत्तमः शोभते नूनम्। शिष्यादिच्छेत् पराजयम्' इति वचनानुसारेण स्वर्गस्थः गुरुवर्यः जगच्छांति-प्रीत्यर्थं अहर्निशं प्रयतमानं दिशि दिशि च जयजयकारध्वनिना गौरवं नीयमानं शिष्यवरं दृष्ट्वा हृष्टरोमा तिष्ठति निःसंशयम्। अपि जानासि वत्स! का दुरवस्था आसीत् पारतंत्र्यकाले भारतीयानाम्?

वसंतः - न हि तात, निवेद्यताम्।
(लता प्रविशति)

तातः - वत्से, समये प्राप्तासि। उपविश। शृणु पारतंत्र्यदुःखम्

लता - कथय।

तातः - विदेशे यत्र यत्र भारतीयः अगच्छत् तत्र तत्र 'अंगदासः

भयम्' इति अवधीरितः आसीत् सः सदैव। 'कृष्णवर्णः' इति निंदा-व्यंजकशब्देन सः उल्लिख्यते स्म श्वेतवर्णैः।

लता- तात, भारतेन स्वातंत्र्यं कथं नु अवाप्तम्।

तातः - कथय वसंत।

वसंतः - श्लोकमात्रं स्मरामि तद्विषयकम्

तातः - शोभनम्, पठ।

वसंतः -
आयुरर्थं च भोगांश्च हुत्वा दिव्यं च बंधनम्।
मृत्युमभ्यमितैर्वीरैरिदं स्वातंत्र्यमार्जितम्॥

लता - अस्य अर्थः विशदीक्रियताम्।

तातः - विशदीकुरु, वसंत।

वसंतः - असंख्यैः देशभक्तैः स्वातंत्र्य-संपादनार्थं सर्वस्वं हुतम्। कष्ट-प्रदः कारावासः सुखेन सोढः। आंग्लसैनिकानां लगुडप्रहाराः गोलि-काश्च सानंदं सधैर्यं च स्वीकृताः। भगतसिंगप्रभृतिभिः क्रांतिकारकैः देहदण्डोऽपि - मृत्युरपि आलिंगितः समोदम्।

लता- हा! तेषां यातनानां स्मरणमपि दुःखावहम्।

तातः - कैश्चिद् देशभक्तैः देशांतरं गत्वा आंग्लैः कृतं हिंदप्रजानां निर्घृण-पीडनं, तत्र व्याख्यान लेखादि द्वारा प्रकटीकृतम्, सहानुभूतिश्च तत्रत्य-लोकानां संपादिता भारतस्य - स्वातंत्र्य प्रयत्नार्थम् ।

वसंतः - आम् । पठितं मया वृत्तपत्रे ईदृशं डॉ० खानखोजे महाशयेन कृतं कार्यं परदेशे ।

तातः - फलितं खलु तव वृत्तपत्रपठनम् अनेन स्मरणेन । अन्यच्च सुभाष-चंद्रेण कृतं भारतसेनायाः निष्ठा-परिवर्तनं विशेषेण प्रचोदयामास आंग्लान् सत्वर-सत्ता-त्यागाय ।

लता - तात, मया न अभिज्ञातं किं निष्ठा-परिवर्तनम् इति ।

तातः - भारतीयसैन्यम् आंग्लेभ्यः वेतनं लभते स्म । अतः तेषाम् आज्ञा-नुसारेण, स्वातंत्र्यार्थं प्रयतमानान् देशबांधवानपि ते प्रहरंति स्म लगुडैः वा गोलिकाभिः वा निः-शंकम् अविचार्य च । परं सुभाष-चंद्रेण तेजस्वि-स्फूर्तिप्रद-भाषणेन

विशेषेण च आंग्लबंधात् रहः निर्गमनेन कृतेन दिव्यसाहसेन भारतीय-सेना प्रत्यायिता यत् स्वातंत्र्यसैनिकेषु प्रहरणं तु स्वातंत्र्यसंपादनविघ्नः नाम देशद्रोहः एव इति ।

लता - अभिज्ञातं तात ! महत् कार्यं खलु कृतं सुभाषचंद्रेण ।

तातः - सामान्यजनैरपि महार्घस्यापि स्वदेश्य-वस्तुक्रयणेन, सत्याग्रह-निर्बंधभंग-प्रभातयात्रादिषु आंदोलनेषु प्रविश्य आंग्लकृतपीडानां स्वीकरणेन च या स्वदेशसेवा कृता सा अविस्मरणीया एव ।

वसंतः - बालैः तथा वृद्धैरपि तरुणैः सह सामान्यजनैः महान् त्यागः कृतः स्वदेशकृते इति श्रुतं मया व्यख्याने नचिरात् ।

तातः - जवाहरलालेनापि महान् त्यागः कृतः यौवनदशायाः प्रारभ्य । नैकवारं कारावासः सोढः, लगुडप्रहाराः अपि स्वीकृताः समोदम् आंग्लसैनिकानाम् । नृपोपमम् ऐश्वर्यम् आसीत्तस्य । राष्ट्रसभाकार्यार्थं तेन महत्कार्यं कृतं संपत्तिदानेन ।

वसंतः - स्मराम्यहं तं पाठं यस्मिन् त्वया
-प्रहारप्रसंगः विवर्णितः।
तातः - आत्मवृत्तं तेन लिखितम्।
तस्य मराठीभाषानुवादात् सूः उद्धृतः।
वसंतः - लेखकोऽपि महान् दृश्यते सः।
तातः - आम्। तेन कतिपये ग्रंथाः
लिखिताः कारावासे। न यापितः
वृथा कालः निद्रालस्यादिभिः।
धीमतां रीतिः एषा।
वसंतः - स्मरामि, तात, स्मरामि।
लोकमान्येन गीतारहस्यं वि-
रचितं कारावासे।
तातः - (पृष्ठतः स्नेहेन परामृश्य)
बुद्धिमान् असि वत्स! पठन-
श्रवणम् एवं समये उपयोक्तव्यम्
लता - तात, कियद्दूरीयः याचनिरः?
तातः - वसंत, देहि प्रत्युत्तरम्।
वसंतः - अष्टोत्तरषष्टितमं वर्षं सः
लंघयति (गणयित्वा) अद्य-
१४ नोव्हेंबर १९५७ दिनांके।
लता - आश्चर्यम्। वृद्धः अपि अयं
कार्यं करोति। अस्मत्प्रतिवेशी
दादा तु सदा खट्वायाम् उप
विष्टः न किमपि करोति।

तातः - जाते सः रुग्णः वर्तते। भवतु तावत् किं वक्तुकामः आसम्? हा! स्मृतम्। वयसा वृद्धोऽपि जवाहरलालः अखंडं कार्यं करोति। विशालभारतस्य राज्यधुरां वहति।

वसंतः - विमानेन दीर्घप्रवासमपि नित्यं करोति सः। न केवलं स्वदेशे संचरति, परं देशांतरमपि गच्छति निमंत्रणानुसारेण।

तातः - तत् च स्वप्रभावेण स्नेहं सद्भावं च संपादयति भारतार्थम्।

लता - कथं न श्राम्यति सः इतस्ततः सततप्रवासेन?

तातः - तेन पुनर्वयसि तारुण्ये बलम् उपासितम्। सः न दुर्व्यसनैः आलिप्तः वर्तते। तदेव तस्य उत्साहस्य कारणम्।

वसंतः - अहमपि श्वः प्रभृति बलोपासनां करिष्ये।

लता - अहमपि त्वाम् अनुसरामि।

तातः - प्रशस्यम्। युवयोः अयं सुनिश्चयः न विफलतु। प्रातः उत्थाय, शुचिः भूत्वा उभाभ्यामपि

श्रीसूर्यनारायणः साष्टांगनमस्कारैः उपासितव्यः। सः व्याधिम् अकाल मृत्युं च निवार्य तेजः, आयुः आरोग्यं च दद्यात् युवाभ्याम्।

लवावसंतौ - प्रातः आवां प्रबोधनीयौ आविस्मृत्य।

तातः -(सानंदम्) अवश्यम्। जवाहरलाल शुभचिंतनार्थं श्लोकं पाठयामि युवाभ्याम्। अनुपठ्यताम्।

लवावसंतौ - पठ्यतां सः श्लोकः।

तातः - भारतोत्कर्षरक्षार्थं
भुवश्च स्थिरशांतये।
दीर्घायुरस्तु को देव!
प्रियोऽस्माकं जवाहरः॥

(लवावसंतौ अनुपठतः)

इति 'बालानां जवाहरः' नाम नाटिका

प्रणेता - वि० के० दळवे
जोगळेकर वाडा
सिद्धेश्वर आळी
कल्याण (जि० ठाणे)

श्राद्धान्नेन अंत्यजतर्पणम्

नाट्यकथा

पितुः श्राद्धदिने महात्मा एकनाथः मध्याह्ने दत्तक्षणद्विजान् प्रतीक्षमाणः द्वारसमीपम् आसिष्ठत्। अनान्तरे पच्यमानस्य अन्नस्य सुगंधः प्रसृतः मार्गेण गच्छतां कतिपयानाम् अंत्यजानां घ्राणेंद्रियं गतः तान् विमोह्य प्ररुध्य च प्रेरितवान् स्वनीचजन्म शोचितुं तादृशसुआसान्नस्य आस्वादनात् यत् तान् अवंचयत्। श्रीनाथः तेषां संवदतां पक्वान्नाभिलाषं विज्ञाय संजातकरुणः तान् सादरं सकुटुंबं भोजयित्वा निमंत्र्य तान् भोजयित्वा अतोषयत्।

दत्तक्षणद्विजाः एतत् वृत्तं श्रुत्वा क्रुद्धाः नाथांगणं प्रविश्य तम् अभर्त्सयत्। नाथः बद्धांजलिः तान् आह "भो भूदेवाः! क्षम्यताम्, पक्वान्नम् आघ्रातम् अभिलाषितं च अंत्यजैः; अतः श्राद्धाय अनुष्ठितं तद् अंत्यजरूपिणे भगवते समर्पितं सः च तोषितः। स्थलपाकाणि शुद्धीकृत्य भूयः नवपाकः प्रारब्धः। नाचरात् सः सिध्येत, श्रीमद्भिः श्राद्धविधानाय अतः पापकल्पनारहितमानसैः अवश्यम् आगन्तव्यम् इति प्रार्थये।"

परं शास्त्रयुक्तियुक्तमपि इदं नम्रं भाषणं विचारयितुं क्रोधसंतप्तास्ते हन्त! नाशक्नुवन्।

श्राद्धान्नेन अंत्यजतर्पणम् २

नाट्यकथा

"रे नास्तिक! साधुब्रुव! नैवाहिसि शर्मा त्वम्। यदि मातुरस्त्वं पितॄन् तर्पयितुं, तर्हि किमर्थं साधान्नान् न अवतारयसि भोजनार्थम्?" इति उक्त्वा ते निर्गताः।

ततः श्रीखंडरूपस्य तं सेवमानस्य भगवतः सूचनाम् अनुसृत्य, श्रीनाथेन पात्राणि सिद्धीकृतानि, पितरः च समंत्रम् आहूताः प्रार्थनापूर्वकम्। आश्चर्यम् यत् ते सद्यः अवतीर्णाः भुक्त्वा च विसर्जिताः निर्गताः। कुतूहलेन वातायनात् पितॄणाम् उच्छिष्टपात्राणि विलोक्य द्विजाः विलज्जिताः श्रीनाथसाधुत्वे च लब्धप्रत्ययाः। परं लौकिकरीत्या दशरात्रं प्रायश्चित्तं महात्मना ग्रहीतव्यम् इति तैः निबद्धः सः तथा विहितवान्।

तस्मिन् काले "विद्याविनयसंपन्ने" इत्यम् गीतोक्तं समदर्शित्वं श्रीनाथेन स्वयम् अनुष्ठाय अलौकिकं धैर्यं खलु प्रकटितम्। अतः तस्य साधुत्वं विशिष्यते।

आवृत्तेन अंत्यज तर्पणम्-

पात्राणि

१ विष्णुः
२ हरिः
३ माधुः
} अंत्यजाः

४ एकनाथः - महात्मा
५ गिरिजा - एकनाथपत्नी
६ उद्धवः - नाथशिष्यवर्यः
७ श्रीखंडः - नाथं रहः सेवमानः
द्विजरूपः भगवान् श्रीहरिः

८ गोविंदभट्टः - द्विजः
९ नारायणशास्त्री "

श्राद्धान्नेन अंत्यजतर्पणम्

[स्थलम् - श्रीएकनाथसदनम् । नाथः श्राद्धार्थं दत्तक्षणब्राह्मणान् प्रतीक्षमाणः अंगणाद् द्वारं द्वाराद् अंगणं च भ्रमति । मार्गे चतुष्पथे मातंगाः पक्वान्नस्य सुगंधेन मोहिताः संवदंतः तिष्ठंति] (समयः मध्याह्नः)

विठुः - आः ! कियत् सुखकारः पक्वान्नस्य अयं सुगंधः ! सखे ! आदि आघ्रातस्त्वया ?

हरिः - आम् ! केवलं सुगंधेन इदृक्सुखम्; किं प्रत्यक्षान्नसेवनेन ?

राणुः - न सौभाग्यं तदस्माकं पूर्वजन्मकृताघराशीनाम् ।

विठुः - केवलम् अग्निष्वाग्रस्य वयम् अधिकारिणः ।

हरिः - तदपि भाग्यवशादेव लभ्यते कौचित् ।

विठुः - यदि सकृदेव लभ्येत ईदृशं पक्वान्नं, आकंठम् आस्वादयितुं, ततः परं स्वर्गसुखम् अपि हीनतरं मंस्ये ।

हरिः - शक्यं, शक्यं तत् ।

विठुः - कदा ? कथम् ? ब्रूहि सत्वरमेव ।

हरिः - स्वप्ने !

आश्चर्यम् अंत्यजतर्पणम्

विदुः - अलं परिहासेन। ब्रूयतां सुनिश्चितः उपायः।

राणुः - अखण्डनामस्मरणाधरेण
सद्दर्शनात् साधुनिषेवणाच्च।
जन्मान्तरेऽवाप्य तनुं द्विजस्य
सुप्रासमीदृक् सुलभं सदाज्ञम्॥१

सर्वे - सत्यं सत्यं, निर्धारं सत्यम्।
कुत्र खलु त्वया इदं ज्ञानं लब्धम्?

राणुः - साधुवयस्य एकनाथस्य कीर्तनेन।

हरिः - कुत्र स महात्मा वसति?
नाम श्रुतं तस्य परं न कीर्तन-
श्रवणलाभः अद्यापि।

राणुः - आम्। इदमेव तस्य सदनम्।
पश्यत, सः साधुः द्वारम् उपैति
इति दृश्यते।

हरिः - चलत, पलायनम् आचरामः,
नोचेत् तद्दोषपात्रं भविष्यामः।

विदुः - नोत्सहे इतश्चलितुम्। अस्य
वटवृक्षस्य पार्श्वे वपुः पिधाय
यावच्छक्यं यथेष्टं पक्वान्न-
सुगंधं जिघ्रंस्तिष्ठामि। भवद्भिः
अपि तथा कार्यम् इति मे मतिः।

यतः, 'यावज्जीवेत् सुखं जीवेत्'।

सर्वे- धन्यधन्या द्विजा एते
दिव्या ये भुंजतेऽन्वहम्।
स्वादन्नमीदृशं यस्य
दुर्लभं नो ऽपि सौरभम् ॥२॥

×

द्वितीयः प्रवेशः

नाथः -(स्वगतम् - मातंगानां संवादं श्रुत्वा) वराकाः इमे अंत्यजाः श्राद्धान्नास्वादने अत्युत्सुकाः। सर्वथा दुर्लभं खलु तेषाम् इदम्। सर्वेषु भूतेषु समं तिष्ठन् परमेश्वरः तेष्वपि तिष्ठति। सः श्राद्धान्नम् अभिलषति। सः बुभुक्षितः अवश्यं प्रथमं मया तर्पणीयः। ब्राह्मणाः नाद्यापि आगताः। भू-पात्रादिकानां शुद्धिं विधाय भूयः पाकः विधातुं शक्यः। तथैव करोमि। गिरिजां पृच्छामि। सा साध्वी साजंदम् अनुमन्येत। आर्ये गिरिजे!

गिरिजा -(प्रविश्य) आज्ञापयतु का आज्ञा?

नाथः - अपि पाकः सिद्धः?

श्राद्धान्नेन अंत्यजतर्पणम्
प्रवेशः - द्वितीयः

गिरिजा - आम्, ब्राह्मणैः एव विलंब्यते।
नाथः - बहिः कोऽपि क्षुधार्ताः अंत्यजाः
श्राद्धान्नस्य सुगंधेन मोहिताः तद्
अभिलषंति। ते आदौ तर्पणीयाः
इति मे मतिः। अभवती अनुमन्यताम्
गिरिजा - किमर्थम् अनुमतिः अभ्यर्थ्यते
भर्तृभिस्तु विधातव्या
आज्ञा स्त्रीभ्यो यथेप्सिताः।
साध्वीभिः पालनीयास्तास्-
तत एवास्ति तद्धितम्॥३॥
अथ कियन्तस्ते?
नाथः - पंचषाः प्रायः।
गिरिजा - विपुलं खलु पर्वाह्णं
दारापत्यैः सहान्न ते।
आगत्य भुज्यतां नाथ!
तद्रूपस्तृप्यतां हरेः॥४॥
नाथः - सहधर्मचारिणी नूनं
सती त्वं सार्थनामका।
गृहस्थाश्रम एवोऽस्ति
त्वयैव हि फलान्वितः॥५॥
गिरिजा - अलं प्रशंसया। त्वर्यतां त्वर्य-
ताम्। आमंत्रितास्ते सत्वरं गृहं गच्छंतु

प्रवेशः - द्वितीयः

पुनरागमनाय सह दारापत्यैः।

नाथः - तथास्तु। उद्धव! रे उद्धव!

उद्धवः - (प्रविश्य) आज्ञापयतु गुरुदेवः।

नाथः - बहिः पंचशाः अँत्यजाः सन्ति। तान् सह दारापत्यैः भोजनार्थं सत्वरम् आगंतुं निमंत्रय।

उद्धवः - यथा आज्ञापयंति स्वामिचरणाः (स्वगतम् - दत्तदीणब्राह्मणानां कोऽपि वाहनं ननु आभाति) (निष्क्रांतः)

तृतीयः प्रवेशः

उद्धवः - (द्वारम् आगत्य इतस्ततः पश्यति) अँत्यजस्तु अत्र न कोऽपि दृश्यते। (दूरं विलोक्य) हे! वटवृक्षात्तिहिताः काः अपि मानवाकृतयः दृश्यंते। (किंचित् उपसृत्य उच्चैः) भो भो अँत्यजाः! आगच्छत सत्वरम् एव। (ते भीताः पलायनोद्यमरताः दृश्यंते) आगतः धावित्वा) न भेतव्यम्, न भेतव्यम्, भोजनार्थम् अत्र आगंतव्यं सर्वैः।

विठुः - (अग्रे भूत्वा कंपमानः) कुत्र कः भोजनार्थं निमंत्र्यते?

तृतीयः प्रवेशः

उद्धवः - यूयं सर्वे अपि अंत्यजाः, मम स्वामिना नाथेन निमंत्र्यंते।

विदुः - (सखे! अप्यहं स्वप्नं पश्यामि) किमपि सत्यम्? यतः
आहूयते जनैः श्वा, भो! 'यूयं' -
शब्दैरनेकदा।
परिहासार्थमायातः स च
यष्ट्या प्रहार्यते ॥ ६ ॥
क्षम्यताम्, मन्ये नैतादृशम् आमंत्रणम्।

उद्धवः - मम स्वामिपादैः शपे, सत्यमेव।
(शनैः शनैः शेषाः अपि आयांति परं साशंकम्)

राणुः - कस्ते स्वामी?

उद्धवः - नाथः।

राणुः - सत्यं तर्हि स्यात्। सखायः किं करवाम?

सर्वे - प्रत्यर्थं नाथं प्रति गंतव्यम्।

उद्धवः - चलत, (द्वारम् आगत्य) तिष्ठत, यावत् स्वामिनं निवेदयामि।

नाथः - (द्वारे उद्धवेन सह आगत्य) यद् उद्धवेन मम शिष्येण कथितं तत् सत्यमेव। सर्वैः सहैव गत्वा सह दारापत्यैः भोजनार्थं

आद्धान्नेन अंत्यजतर्पणम् ७

तृतीयः प्रवेशः

सत्वरम् आगंतव्यम् । नात्र शंका
- कारणम् ।

सर्वे - क्षम्यताम्, अपि सत्यम् ?

नाथः - सत्यं सत्यं सत्यमेव ।

नानृतं लिखयाद्यापि
स्पृष्टं जातु ममानया ।
उक्तोऽनृते ऽग्निगा देहो
भस्मीभवतु मेऽक्षरा ॥ ७ ॥

धावत । यावाणी तावत् सिद्धानि
कर्माः । उद्धव ! संमार्ज्यतां प्रथमं
भूमिः ।

उद्धवः - आज्ञा प्रमाणम् ।

(नेपथ्ये)

'राधे, केशव, चंद्रे, सगुणे, त्वयि
भोजनार्थम् - सुरासार आगं लभ्यते'
'नाथ, कुत्र ?' 'ब्राह्मणस्य सदने,
साधुवर्यस्य एकनाथस्य, तेन प्रत्यहं
निमंत्रिताः वयं - पंचवाः अंत्यजाः
सदारापत्याः' 'अहो भाग्यम् !
अहो ! सुरासार आगम्' इति
कोलाहलः श्रूयते ।

चतुर्थः प्रवेशः

(स्थलम् - नाथसदनम् - अन्त्यजाः पात्रोपविष्टाः)

नाथः - उद्धव, अपि सर्वे उपवेशिताः पात्रेषु?

उद्धवः - आम् । सर्वम् अन्नम् औत्यजस्त्रीभिः दत्तम् । नाथेः परिवेषितम् अपि प्रतिपात्रम् । भोजनारंभार्थम् आज्ञा प्रतीक्ष्यते भवतः ।

नाथः - शोभनम् । यथा संकल्पः विधीयते अधुनैव । (उदकं करे गृहीत्वा)

सर्वभास्थित ईशोऽसौ
मातंगतनुषु स्थितः ।
सुधारसान्नप्रदानेन
क्षुधार्तः प्रीयतां हरिः ॥८॥

ऊयतां सर्वैः 'पुंडरीक वरदे हरि विठ्ठल' (तथा घोषयंति सर्वे) (प्रार्थयते) सर्वैः यथेष्टं भोजनं कार्यम् । संकोचः न कर्तव्यः । पात्रेषु न त्यज्यम् अन्नं यतः तद् परब्रह्मम् ।

सर्वे - यथाज्ञापयति देवः ।
प्रतिग्रासकाले वदेद्रामनाम
तदुद्घोषयेदादरेणासकृच्च ।

चतुर्थः प्रवेशः

हरे चिंतनेऽन्नं सदा भक्षयेच्च
स्वभावात्ततः श्रीहरिः प्राप्यतेऽसौ ॥१॥
सदा मे त्वया रामचंद्रस्तु योगः
त्वदर्थं पतत्वेष देहो मदीयः ।
उपेक्षस्व माऽनंत! मां जातु देव!
गुणाढ्याऽद्य मे प्रार्थनेत्येव नम्रा ॥२॥

पंचमः प्रवेशः

उद्धवः - स्वामिन्! सर्वेऽपि भुक्ताः
तांबूलग्रहणेन विसर्जिताश्च

गिरिजा - सर्वापि भूमिः संमार्ज्य
प्रोक्ष्यते । पुनः साहित्यं गृहीत्वा
नूतनपाकः आरभ्यते ।

नाथः - समीचीनम् ।
(नेपथ्ये - कुतः वर्तते सः ब्राह्मण-
हतकः? आगच्छ, आगच्छ बहिः)

गोविंदभट्ट - (प्रविश्य, सक्रोधम्)
दत्त्वा नः क्षणमादौ यद्-
भोजिता अंत्यजास्त्वया ।
पितरस्तेऽन्त्यजाः किं रे!
वर्णसंकरकारक ॥१॥

नाथः - क्षम्यतां भूदेवाः! श्रूयतां क्षमा
आद्धान्नस्य सुगंधः आघ्रातः
वर्णस्वामिभिः अंत्यजैः ।

पंचमः प्रवेशः

तेषु तदर्थम् आमेलाषा संजाता। अतः तदुच्छिष्टम् अन्नं भवदर्थम् अयोग्यम् तेभ्यः एव समर्पितम्। अधुना नव-पाकः क्रियते भवदर्थम् भूमिपालादि-कानां शुद्धिं विधाय। अपराधः क्षम्यतां दयालुभिः।

द्विजाः - जाग्रतामो भवद्गेहान्
सर्वथा, विधि दाँभेक।
पितरो नरकं यांतु
तवान्नेनापकर्मणा ॥ 92 ॥

नाथः - (बद्धांजलिः) दयालवः भूदेवाः क्षम्यताम् अपराधः। दिवि मम पितरः श्राद्धीयजलान्नं सोत्कर्षं प्रतीक्षमाणाः स्युः। ते अतर्पिताः भवाशाः मा शपंतु।

गोविंदभट्टः - नैवाहमिसे क्षमं त्वम्। रे साधुभुव, यदि आतुरस्त्वं पितॄन् तर्पयितुं तर्हि किमर्थं साक्षात् तान् न अवतारयासि भोजनार्थम्। सामर्थ्यं त्वयि तादृशम् इति वदंति लोकाः। साधयामः। (आस्येताः

पंचमः प्रवेशः

नाथः - आज्ञा प्रमाणं भवतः। 'ब्रह्म-
वाक्यं जनार्दनः।' इति वचनानु-
सारेण साक्षाद् जनार्दनेनैव आदिष्टः
अहं भवन्मुखात्। वेदोनारायणस्य
वचनं कदापि अन्यथा न भवेत्।
अतः करोमि आज्ञानुसारम्। ~~[illegible]~~

गोविंदभट्टः - (विमृश्य) (विकृतमन्युना)
रे दांभिक! एवम् मम उपहास
परं वचनं परमार्थेन अनुवतसे
किम्? भो ब्राह्मणाः! अद्यैव
ब्रह्मबृंदस्य समाजे आयोज्य
अयं धर्मभ्रष्टः ब्राह्मणानाम्
अवमानकरः ~~[illegible]~~ जातिबहिष्कृतः
इति निर्णीय दंडयितव्यः एक-
मत्येन। (निष्क्रांताः सर्वे
द्विजाः

नाथः - हन्त! भूदेवाः क्रुद्धाः। भगवन्!
त्वं जानासि माम्।

अरेंडः - (सार्धं नाथं दृष्ट्वा) स्वामिन्!
चिंता न कार्या। पाषाणी साम्
सिध्यंतां पितृर्थम्। स्वयं ते
भवतीये भुंजीयन्।

नाथः - यथार्थमाह त्वम्। तथास्तु।

श्राद्धान्नं प्रत्यन्नतपर्यन्तं

प्रथमः प्रवेशः

(पित्रर्थं पात्राणि सिद्धीकृतानि)

नाथः -

रुक्मेषु ब्राह्मणेष्वद्य
श्राद्धार्थं पितरः स्वयम् ।
भुञ्जतामवतीर्यैह
तृप्ता यच्छन्तु चाशिषः ॥१३॥
पितरः सुस्वागतम्

(पितृगणो सद्यः अवतीर्य स्वस्व पात्रे उपविशन्ति)

नाथः - (बद्धाञ्जलिः)

अपोषितं यावितव्यं
त्याज्यं चैवानपोषितम् ।
उपविश्य सुखेनैव
भोक्तव्यं स्वस्थमानसैः ॥१४॥

विद्यमानशाकपाकपदार्थेषु यद् रोचते तद् ग्राह्यं यन्न रोचते तद् त्याज्यम्, सुखेनैव भोक्तव्यम् ।

पितरः - जुषामहे

(भुक्त्वा आशिषः दत्त्वा तिरोभवन्ति पितरः)

षष्ठः प्रवेशः

(नारायणशास्त्री गोविंदभट्टश्च प्रविशतः)

नारायणशास्त्री - (सौत्सुक्यम्) औरवंड! श्राद्धस्य का वार्ता?

औरवंडः - साक्षात् पितरः अवतीर्य भुंक्त्वा निर्गताः।

गोविंदभट्टः - कथं मृताः पितरः साक्षात् अवतरेयुः? अलीकं नदारि जडु परिहासार्थम्।

औरवंडः - अवलोक्यतां गवाक्षात् उच्छिष्टपात्राणि।

नारायण० - आश्चर्यं गोविंदभट्ट, साधुः अयं गृहपः।

गोविंदभट्ट - आम् निःसंशयं साधुः।

उभौ - (नाथम् उपसृत्य अञ्जलिं बद्ध्वा च) क्षम्यतां साधो, अज्ञानात् न अस्माभिः अभिज्ञातः भवतोऽधिकारः। साक्षात् पितरः भवता भोजिताः। लज्जिताः वयम्। भवतु। परं लोककीरीतिम् अनुसृत्य श्रः प्रायश्चित्तं ग्रहीतव्यम् इति प्रार्थना ब्रह्मदत्तस्य।

श्राद्धाङ्गेन अंत्यजतर्पणम् ११
षष्ठः प्रवेशः

नाथः - अवश्यमेव

सर्वे -

जयतु जयतु नाथः साधुवर्यः सनूनं
सकलतनुनिगूढं पश्यतीशं य एकः।
स परमहरेशक्तेऽजायजायो दयालु-
रुपदिशति यथादो स स्वयं वर्तते च॥
॥१५॥

इति श्राद्धाङ्गेन अंत्यजतर्पणम्

— x —

जवाहरस्वर्णरोहणम्

इयं नाटिका पं० जवाहरलाल महोदयानां प्रथमस्मृतिदिनार्थं मया विरचिता। सा पं० वे० सातवळेकर संपादितायाम् 'भारतलक्ष्मी' मासिकपत्रिकायां (नो० हे १९८४) प्रकाशिता। सा, गु० श्री० चिं० वा० मोने-महाशयैः भूतपूर्व विद्यार्थिवृंदसाहाय्येन - श्री० मधुकर - सदाशिव - फाटक द्वारा मोहमयी नभोवाणीतः संस्कृतनाट्यरसिकेभ्यः उपायनीकृता २३ मे १९८५ दिनांके। श्लोकाः तेविचरणैः संयोज्य संगीतरसज्ञ - श्रवणपुट प्रमोददायिरीत्या गीताः इति विशेषम्। नभोवाणीध्वनिमुद्रणपूर्वं नाटिकाश्रवणार्थम् आहूतोऽहम् श्रवणोत्तरम् अतीव प्रसन्नः अभवम्। मदाभिप्रायं च एवं प्रकटितवान् अहम्।

सुरसनाट्यकृतिः कविनोज्ज्वल-
प्रातिभया ऽभिनवा प्रविरच्यते।
फलति सा तु नटोत्तमनाटनाद्
गुणवतीव सुयोग्यवरोद्वहात्॥

नाट्यकथा

देवलोके देवेंद्रसभायां देवर्षिनारदस्य चिरायिता अनुपस्थितिः

अलौकिक्य विशेषवार्तां हि सः इति तद्दर्शनविषये प्रयुत्सुकीकरोति देवेंद्रं बृहस्पतिं च। स्मृतमात्रस्य तस्य मधुर वीणाझंकारः श्रुतिपथम् एति। प्रविष्टः सः सर्वैः देवैः उत्थाय अभिवंदितः दत्तासनश्च पृच्छ्यते "का विशेषवार्ता?" इति। तदा "भूतलात् को अपि महापुरुषः नचिराद् - दिवम् आरोक्ष्यति" इति प्रत्युत्तरति देवर्षिः। तन्महापुरुषविषये जिज्ञासायां प्रकटीकृतायां सः अभिष्टौति जवाहरम्। तन्नाम स्मृतिं च श्रुत्वा प्रेक्षकसंमोपविष्टाः मोतीलालः गांधिश्च स्वस्वप्रमोदं प्रकटीकुर्वतः कमलया सह। तस्य विशेषां देशसेवां जागतिकशांतिकृते च महायत्नं श्रीनारदमुखात् विज्ञाय देवेंद्रः आज्ञापयति तस्य महापुरुषस्य उचितस्वागतार्थं स्वर्लोकप्रवेशसमये। देवगुरुणा ईदृशीं देवेंद्राज्ञां पूर्वमेव अभिज्ञाय तथा व्यवस्थापितम् आसीत्।

भारतीयजनतया प्रियतमनेतृ-

नाट्यकथा

निधनेन कृतः महान् विलापः सर्वलोके श्रूयते। नाचिराद् विमानारूढः जवाहरः स्वर्गद्वारं प्राप्नुवन् पुष्पवृष्ट्या संमन्यते देवगंधर्वयक्षाद्यैः। देवसभां प्रवेशितः आसने उपवेश्यते सः सादरम्। देवेन्द्रेण ततः आदिष्टः चित्रगुप्तः जवाहरमानयतु उच्चैः पठति। तस्मिन् सद्गुणैः सह केचन अवगुणाः अपि निर्दिष्टाः; ते सद्गुणराशौ उपेक्षणीयाः इत्यपि सांत्व्यते। किंचित् कालं विश्रम्य, नवोत्साहेन अभीष्टलोकसेवार्थं पुनः भूतले नृदेहः धारयितव्यः जवाहरलालेन इति अंते आदिशति तं देवेन्द्रः। सः इमाम् आज्ञां शिरसा प्रधार्य निर्दिष्टान् स्वीयान् अवगुणान् स्वीकरोति। स्वमित्रवर केनेडि सभायाम् आहूय पृच्छति सः तद्वार्ताम्। स्वदेशे सः भूयः अवतीर्णः अवशिष्टकार्यार्थं इति चित्रगुप्तात् ज्ञात्वा जवाहरः समाहितः भवति। ततः सभाकार्यं समाप्यते।

जवाहर - स्वर्गारोहणम्

लेखकः —

श्री विश्वनाथ केशव छत्रे

*

पा त्रा णि

•

१ देवेन्द्रः	५ मोतीलालः
२ बृहस्पतिः	६ गान्धिः
३ नारदः	७ कमला
४ चित्रगुप्तः	८ जवाहरः

[देवसभायां देवेन्द्रः पृच्छति देवगुरुम्]

देवेन्द्रः— गुरुवर्य ! भूतलवार्ताविशेषः चिरात् न श्रुतः ।

बृहस्पतिः— अत्र नारदमुनिः प्रमाणम् । चिरायितं खलु तद्दर्शनम् । मन्ये, समयः प्राप्तः तस्य देवलोकागमनस्य ।

देवेन्द्रः— अत्युत्कण्ठते नूनं मे मनः ततः वृत्तविशेषं श्रोतुम् । यत —

दृष्टिः प्रसन्ना शिववर्षिणी सा
वाणी हरिप्रेमरसामृतार्द्रा ।
मधुश्च वीणावरझङ्कृतिश्च
स्थाने त्रिलोकेऽभिमतः सुरर्षिः ॥

[नेपथ्ये ' नारायण ' ' नारायण ' इति मञ्जुशब्दः वीणाझणत्कारश्च]

अहो ! स्मरणमात्रेणैव मुनिवरागमनम् ।

देवेन्द्रः— इदं तु अदृश्यं स्निग्धहृदययोः आकर्षणम् ।

[ततः प्रविशति नारदमुनिः । सर्वे सदस्याः सदेवेन्द्राः सहसा उत्थाय तं सादरं अभिवादयन्ति]

सर्वे— जयतु देवर्षिः !

नारदः— जयतु देवसभा । देवेन्द्र ! अपि कुशलम् ?

देवेन्द्रः— भवादृशानां भगवद्भक्तानां शुभाशीर्वादैः कुतो ह्यकुशलम् । को वृत्तविशेषः वसुन्धरायाः ? सुधास्यन्दिगीर्भिः तृप्यतां चिरात् अस्मच्छ्रवणपुटम् ।

नारदः— यथा त्वं श्रवणातुरः तथैवाहं निवेदनातुरः ।

बृहस्पतिः—

श्रोतातुरोऽत्युत्सुक एव वक्ता
बुभुक्षितोऽतीव च भोज्यदित्सुः ।
सुग्रासमन्नं च सुवर्णपानं
संयोग ईदृग् विरालो जगत्याम् ॥ २ ॥

देवेन्द्रः— आस्यतां सुखेन मुनिवर, निवेद्यतां च भूतलकौतुकम् ।

नारदः— कोऽपि महापुरुषः दिवं नचिरात् आरोक्ष्यति ।

देवेन्द्रः— कोऽन्वसौ ।

नारदः— जगल्ललामभूतः जवाहरः ।

मञ्चेभ्यः—

मोतीलालः— अपि मम पुत्रोत्तमः ?

गान्धिः— किं मम शिष्यवरः ?

कमला— अपि पतिदेवः मम ?

नारदः— तथैव यथा तर्कितं भवद्भिः ।

शान्तिं चिरं स्थापयितुं पृथिव्यां
अहर्निशं योऽक्षपयत् स्वदेहम् ।
प्रेमाप यश्चाऽखिलमानवानां
जवाहरोऽसौ खलु धन्यधन्यः ॥ ३ ॥

मञ्चेभ्यः—

मोतीलालः— पुत्रादिच्छेत् पराजयम् ।

गान्धिः— शिष्यादिच्छेत् पराजयम् ।

कमला— पतिस्तुतौ स्त्रियो मोदः ।

देवेन्द्रः— देवर्षेः धन्यताशंसा तु विशेषेण समादरणीया ।

बृहस्पतिः— शान्तिपुरस्कर्तुः नारदाशंसा पुनः स्वभावविरुद्धा आभाति ।

नारदः— देवगुरोः अभिप्रायः अभिज्ञातः मया । हन्त ! भगवद्भक्तेरपेक्षया मे कलहप्रियता लोके प्रथिततरा ।

देवेन्द्रः— दोषोऽपि सः सुखान्तत्वात् गुणायते । मुनेः कोऽपीदृशः व्यवसायः अस्माकं विनोदनाय इति च अवितथम् ।

बृहस्पतिः— अपि नूतनसञ्चारे कोऽपि मुनेः उपक्रमः एतादृशः ?

नारदः— नारायण ! नारायण ! सकलकर्मणः कर्ता प्रेरयिता च नारायणः एव । वयं तु निमित्तमात्रम् ।

देवेन्द्रः— कियत् सफलीभूतः अस्य महापुरुषस्य शान्ति-प्रयत्नः ।

नारदः— घोरः संग्रामः अस्य मध्यमस्य मन्त्रणया असकृत् विनिवारितः, लक्षावधि-जीवाश्च रक्षिताः मृत्योः ।

देवेन्द्रः— पूर्वजन्मार्जिततपसः ननु फलमिदम् । कं देशं सः जन्मना धन्यंकरोति ?

बृहस्पतिः— भरतवर्षमन्तरा कः स देशः स्यात् ।

नारदः— सत्यमेव । पुण्यकृतः एव तत्र जन्म लभन्ते । अहोऽस्य प्रभावः व्यक्तिमत्वस्य यत्—

दृष्ट्वैव कान्तिमदहो ! वपुरस्य रम्यं
श्रुत्वैव तस्य वचनं मधु-युक्तियुक्तम् ।
सिद्धा विरोद्धुमुत युद्धचिकीर्षवस्ते
सद्यो द्रवन्ति हिमराशिरिवोदितेऽर्के ॥ ४ ॥

देवेन्द्रः— कस्य धन्यस्य गुरोः चरणयोः कृतविद्योऽसौ ।

नारदः— नेदानीं भरतवर्षे गुरुकुलसंस्था जीवति । छात्राः स्वगृहे एव न्युष्य विद्यालयं अध्ययनाय गच्छन्ति, पृथक् च अध्यापकः प्रत्येकविषयस्य ।

बृहस्पतिः— आदर्शगुरोः नित्यसहवासात् एवं वञ्चिताः छात्राः कथं नु चारित्र्यवन्तः भवेयुः ?

नारदः— स्थाने सा शङ्का । परं यन्त्रयुगेऽस्मिन् पाश्चात्यशिक्षणप्रभाविताः शिक्षणाधिकारिणः गुरुकुलसंस्थायाः सकृद्दूरं गताः न प्रतीपं गन्तुं शक्नुवन्ति, दोषदर्शिनोऽपि । एवं सत्यपि लोकमान्य-गान्धि-जवाहरसदृशाः महापुरुषाः जायन्ते भरतवर्षे । जवाहरस्तु बाल्यतः आंग्लदेशे अधीतवान् ।

देवेन्द्रः— कथं नु स्वदेशभक्तिः प्रस्फुरिता विदेशे शिक्षमाणस्य तस्य अन्तःकरणे ?

नारदः—

सार्धं श्रिया यो जनकादवाप्नोद्
अत्युत्कटां भक्तिमपि स्वदेशे ।
तं योऽतिशेतेऽपि गुरुं प्रकीर्त्या
जवाहरोऽसौ खलु धन्यधन्यः ॥ ५ ॥

(निर्दिश्य) अत्र उपविष्टौ तस्य पिता मोतीलालः राजकीयगुरुः गान्धिश्च ।

देवेन्द्रः— अभिनन्दयामि धन्यौ इमौ, परं महर्षे ! को नु हेतुः विदेशेऽध्यापनस्य पुत्रकस्य जनकमानसे ।

नारदः— कथयतु मोतीलालः ।

मोतीलालः— आंग्लैः स्वगुणविशेषैः गुणहीनाः भारतीयाः जिताः, दास्यपाशे निबद्धाश्च । संजीवनीं दैत्यगुरोः आहर्तुं देवेन्द्रेण यथा कचः प्रेषितः, तथैव मया प्रयतितम्, पुत्रः प्रेषितः आङ्ग्लभुवं अध्ययनाय । आंग्लानां गुणविशेषान् आत्मसात् कृत्वा आत्मार्पणपूर्वकं तान् उपयोज्य एव दास्यमुक्तिशक्यता अस्ति भारतीयानामिति मे दृढा मतिः आसीत् । दिष्ट्या सफलीभूतः मे प्रयत्नः देवानां प्रसादेन ।

देवेन्द्रः— देवानां कथाः मानवः स्वकल्याणाय उपयोजयति रहस्यान्वेषणेन इति निःसंशयं प्रमोदाय अस्माकम् । कचवदेव धन्योऽसि, चिरं जीव स्वयशसा ।

बृहस्पतिः-- (स्वगतम्) धन्योऽहं पुत्रयशोगानश्रवणेन । (प्रकाशम्) परं रहस्यान्वेषणपरायणाः तथाचाराश्च विरला इति सत्यम् । शिश्नोदरपरायणाः एव प्रायः सर्वे ।

नारदः-- अपरं च कारणं जवाहरकीर्तेः ।

देवेन्द्रः— निवेद्यतां तावत् । अवहिताः स्मः ।

नारदः—

श्रीगंगायमुनाम्बुसंगममसौ नित्यं प्रपश्यन् गृहात्
यत्नान्मूर्तिमतो भगीरथनृपात् प्राप्योत्कटप्रेरणाम् ।
छेत्तुं मातृभुवोऽथ दास्यनिगडान् निश्चित्य भोगान् जहौ
लक्ष्मीं चांकगतां यथा रघुपतिः कर्तव्यसंपूर्तये ॥ ६ ॥

देवेन्द्रः— धन्यौ अद्य खलु अस्मच्छ्रवणपुटौ महापुरुषगुणानुश्रवणेन । सः नृवरः न चिरात् स्वर्गं आरोक्ष्यति इति आदौ एव कथितं महर्षिणा । गुरुवर्य, अस्य लोकोत्तरचरितस्य पुरुषस्य स्वागतं यथा उचितं भवेत् तथा सत्वरं विधीयताम्। यथोचितं च गुणगौरववर्णनपरं मानपत्रमपि विरच्यतां चित्रगुप्तसाहाय्येन ।

बृहस्पतिः— देवेन्द्रस्य मनोगतं अभिज्ञाय पूर्वमेव आयोजिता स्वागत-व्यवस्था ।

(नेपथ्ये)

युधि स्वातंत्र्यस्य प्रियतमविनेता नयपटुः
पितेवास्मत्पाता ननु सुचिरमापत्तिनिवहात् ।
तथा भर्ता भूमेः पतिरिव च वात्सल्यभरितः
जवाहरलालो हा गत इत उदीक्ष्येत न पुनः ॥ ७ ॥

देवेन्द्रः— कुतोऽयं (भीषणः) प्रोच्चः विलाप-कलकलः ।

नारदः— (सम्यक् श्रुत्वा निर्वर्ण्य च) जवाहरनिर्वाणं शोचति भारतीयजनता सविलापम् ।

देवेन्द्रः— (निरीक्ष्य) न केवलं भारतं परं सकलपृथिवीतलं दृश्यते शोकाकुलम्। अहो ! लोकप्रियत्वं जवाहरस्य। देवदूतैः सह स दृश्यते विमानारूढः । देवगणाः, विलोक्यतामस्य तेजः ।

नारदः—

ब्रह्मचर्ये स्थितं तेजः ब्रह्मचर्ये स्थितं तपः ।
ब्रह्मचर्ये स्थितं पुण्यं पावित्र्यं च पराक्रमः
स्वातन्त्र्यमीश्वरत्वं च सर्वं वीर्ये प्रतिष्ठितम् ॥ ८ ॥

देवेन्द्रः— कोऽभिप्रायोऽत्र देवर्षेः ।

नारदः— भार्यायां दिवं गतायां श्रीमता सकलैश्वर्याधिकारसंपन्नेन वीर्यवता रमणीयरूपेणापि जवाहरेण न पुनरुद्वाहः कृतः, एतादृशं ब्रह्मचर्यव्रतं, निर्व्यसनत्वं सततोद्योगरतित्वं शीर्षासनादियोगासनोपासना, सद्ग्रंथपरिशीलनं, नियताहार-विहारत्वं सच्छीलत्वं इत्येतेषां सद्गुणानां परिपाकोऽयं खलु तेजोविशेषोऽस्य ।

❀

बृहस्पतिः— कैश्चित् विधुरैः अतीतवयस्कैः अपि मन्त्रिभिः पुनरुद्वाहः कृतः इति प्रायः अभिप्रैति मुनिवर्यः ।

कमला— (स्वगतम्) धन्याऽस्मि खलु सापत्नभावमुक्ततया ।

(नेपथ्ये)

नृश्रेष्ठो जयतु जवाहरश्चिराय
सेवायाः सकलजगल्ललामभूतः ।
स्वर्लोकं विशति च वासवेच्छयायं ।
संमान्यो विबुधगणैः सुपुष्पवृष्ट्या ॥ ९ ॥

[देवाः आरुह्यमाने जवाहरविमाने पुष्पवृष्टिं कुर्वन्ति देवेन्द्रेण सह]

देवेन्द्रः-- चित्रगुप्त, पठ्यतां उच्चैः जवाहर-मानपत्रम् । जानातु देवसभा अस्य पुरुषोत्तमस्य कर्तृत्वम् ।

चित्रगुप्तः— यथाज्ञापयति देवेन्द्रः । श्रूयताम् तावत्—

नेहरूकुलललामभूतेन जवाहरनाम्ना नरवरेण मानवसेवया नृजन्म सफलतां नीतम्। पारतंत्र्येण चिरदुःखितां मातृभुवं दृष्ट्वा, राजोचितान् ऐश्वर्यभोगान् सुखेन विहाय, गान्धिपुरस्कृते सत्याहिंसाश्रिते स्वातन्त्र्यसंग्रामे उत्पत्य, भूयः कारावासं लगुडवाक् प्रहारैः सह सोढ्वा, राष्ट्रीयसभाद्वारा सदस्यैः सह प्रयत्य, आंग्लैः सत्तात्यागं च कारयित्वा मातृभूः स्वतन्त्रा कृता । स्वातन्त्र्ये प्रजासत्ताकराज्यस्य प्रथमं प्रधानमुख्यपदं च जनैः समेतं अस्मै एव समर्पितं, आमरणं च तत् सविधे रक्षितम् । स्वातन्त्र्येण सहैव अद्भुतानि निर्वासित-पुनर्वसनादीनि घोरसंकटानि सधैर्यं उल्लंघितानि तेन, प्रक्षुब्धसागरपयांसीव कुशलनाविकेन । स्वराष्ट्रस्य विविध्यंगप्रगत्यै प्रयत्य, शांतिमय-तटस्थभूमिकां अवलम्ब्य, जगति शांतिं स्थिरीकर्तुं, युद्धं च वारयितुं, तेन सततं आयासितम् । निजामोत्थानदमनं गोमान्तकमोचनं इत्यस्य संस्मरणीयः कार्यविशेषः ।

एवं विधस्य बहुगुणवतोऽप्यस्य महापुरुषस्य विरोधिनः, कृष्णापणः काश्मीरसमस्या, पाक-चीनाक्रमणानि इत्यादि विषयेषु सः पक्षपातित्वेन, हृदयदौर्बल्येन वा अकठोरः अस्थिरनिश्चयः तस्मादयशस्कश्च इति भूयः तं निन्दन्ति । परं अन्ते सः मानवः एव । 'एको हि दोषो गुणसंनिपाते निमज्जतींदोः किरणेष्विवांकः' इति न्यायेन उपेक्ष्येमां निन्दां अभिनन्दामः जवाहरं अंतःकरणपूर्वकम् । कंचित् कालं अत्र सुखेन विश्रम्य, नवोत्साहेन दोषत्यागेन च स्वभावानुसारं मानवसेवां विधातुं भूयः भारते अनेन नृदेहः यथेप्सितस्थले धारयितव्यः इति ।

जवाहरः— प्रमाणमाज्ञा देवेन्द्रस्य। अनुगृहीतः अस्मि गुणगौरवेण, परं मन्ये अन्तःकरणपूर्वकं, यत् कर्तव्यमेव अनुष्ठातुं मया यथाशक्ति यथाबुद्धि च प्रयतितम्। मम पितृचरणाः गुरुवर्याश्च गान्धिमहाशयाः, मद्यशःकृते गौरवं अर्हन्ति। यतः तेषां प्रसादः मार्गदर्शनं च मूलाधारः मम कीर्तिमन्दिरस्य।

गांधिः–मोतीलालौ (स्वगतम्) अहो विनीतत्वं वत्सस्य।

काश्मीरसमस्या चीनाक्रमणं कृष्णापणः इत्यादिविषये हृदयदौर्बल्येन अयशस्कः गर्ह्यः अभवमित्यपि स्वीकरामि। 'दारुभेदनिपुणोऽपि षडङ्घ्रिः निष्क्रियो भवति पङ्कजकोशे' इति तु सुप्रसिद्धम्। एतद्दौर्बल्यनिरसनाय, मानवसेवाधिकाऽवसरं प्रदानाय च परमेश्वरं प्रार्थये। माननीय चित्रगुप्त! मम मित्रवरः केनडीमहाशयः न दृश्यते अत्र। का नु तस्य वार्ता?

चित्रगुप्तः— (पत्रिकां अवलोक्य) सः भूयः अवतीर्णः स्वदेशे अवशिष्टकार्यसमापनाय।

बृहस्पतिः— इदानीं इदमेव शुभं आकांक्ष्यते।

(भरतवाक्यम्)

अथेदृक्षादर्शं चरितमनुकृत्येह मनुजाः
भवार्तान् सेवन्तां निरलसतया बांधवजनान्।
कलिं हित्वा शांतिं सुखमपि विकीर्यावनितले
विनिर्माणे हेतुं विदधतु विधातुः फलयुतम्॥ १०॥

卐 卐 卐

● ●

म्हालसा— (दूरध्वनियंत्रे शृण्वती) प्रियकर, जननी आवां अद्य भोजनाय निमंत्रयति।

खण्डेरावः— प्रिये, न प्रत्यवायः गन्तुं, परम्—

म्हालसा— परं किम्?

खण्डेरावः— प्रकृतेः अस्वास्थ्यं अनुभवामि।

म्हालसा— सुष्ठु, तर्हि जननीमेव सपरिवारं निमन्त्रयामि.....अम्ब.....

खण्डेरावः— (सखेदं स्वगतम्) अहो! दुर्भाग्यात् उपायोऽपकारी संवृत्तः, छद्मीकृतेन प्रकृतेः अस्वास्थ्येन बहिर्गन्तुं न शक्येत। श्वश्रूवाचालता पुनः बालानां कलहकलकलैः सह सोढव्या भवेत्।

× × ×

जवाहरस्य चत्वारि चारुचित्राणि—

रक्तपाटल - परिमलः

संग्राहकः— श्री सत्यपालशर्मा, एम. ए., वेदशिरोमणिः

*

पंडितनेहरूः तदा चम्पारनमण्डले भ्रमणार्थं गत आसीत्। तद्वाहने तत्रत्य-स्थानीयनेता..... अपि आसीत्। एकस्मिन् स्थाने मार्गो विभक्तो विपरीतदिशा-द्वयमावहत्। नेहरूः नेतारमपृच्छत्– 'कथ्यतां, इदानीं केन मार्गेण गन्तव्यम्?'

नेता तु मार्गेण नाऽऽसीत्तेन परिचितः। उदतीतरत्सः– स्थीयतां, तावत्सचिवं पृष्ट्वाऽऽगच्छामि इति।

नेहरूः वाहनं तत्रैव निरुध्य नेतारञ्च ततः समुत्तार्य एवमुक्त्वा पुरो गतः-त्वमेतत्स्थानस्य नेता बुभूषसे, स्वमण्डलस्य भूगोलशास्त्रज्ञानमपि ते न वर्तत इति।'

× × ×

कैम्ब्रिजविश्वविद्यालये अधीयानस्य जवाहरस्य कथावृत्तमेतत्। मार्गे मृतमार्जारं एक आसीत्। तच्छरीराच्च पूतिगन्धमुदभवत्। जनास्तु अगच्छन्नागच्छँश्च। न कोपि मार्जारं ततः क्षेपयितुं प्रयतितवान्। परं यदा जवाहरस्तन्तत्रापश्यत् दूरास्थितं राजपुरुषमेकं आहूय भर्त्सयामास– 'अभविष्यमहं तव स्थाने एतद् दुर्गन्धितन्नाभविष्यदत्रेति।'

राजपुरुष एनं ब्रिटेनस्य राजकुमारं मन्यमानः स्तब्धः। कथमपि साहसमाकलय्य नतशिराः प्रोवाच– सम्प्रत्येव क्षिपामीत इदम्। इति।

+ + +

श्रीमती कमलानेहरूः प्रोक्तानुसारतः विवाहात्पूर्वं सोऽतीव विरोधं प्रकटयामास। स्वभाव एव तस्येदृगासीत्। परन्नाऽऽसीदेतावान् वक्रो यत्पितुराज्ञामपि समुल्लंघयेत्। मातुः समक्षे नहु रोषं प्रकटितवान्। 'कथमस्ति विवाहत्वरा? कथं न त्वं समुप-गम्य जनकमाकलयसि' इत्यादि बहूक्तं तेन।

माता तु सकरुणहासमब्रवीत्· तात! अभविष्यदेतावत्साहसं मयि, कथं सप्तसागरान् समुल्लंघ्य विदेशेऽध्ययनार्थं त्वं प्रैषयिष्यथाः' इति।

नाट्यरूपं मेघदूतम्

इमां नाटिकां मोहमयी नभोवाणी ध्वनिक्षेपणार्थम् उद्धरति इति तस्याः "जवाहरस्वर्गारोहणम्" येन रसिकेभ्यः उपायनीकृतं तेन श्रीफाटकमहोदयेन विज्ञापितः अहं तद्रचनायां प्रवृत्तः अभवम्। तस्य विषयस्य पूर्वं कृतेन अभ्यासेन तथा फाटकमहोदयेन मुहुः मद्गेहम् आगत्य मया सह कृतेन रचनाविमर्शेन सप्ताहाभ्यंतरे एव नाट्यरचना यथेप्सितं समाप्तिं गता। अनेन प्रसंगेन एतत् सत्यं मम सुप्रतीतं, यद् नाटककारः, नाटकम् अभिनेतुकामश्च यदि मुहुः विचारविमर्शं कुर्यातां, तर्हि प्रयोगक्षमा रसिकाह्लाददायिनी च नाट्यकृतिः विना विलंबं निर्मीयेत। अन्यथा स्वप्रतिभाम् अनुसृत्य नाटककारेण विरचिता नाट्यकृतिः सुरसापि प्रत्यक्षप्रयोगावसरे क्वचित् क्वचित् परिवर्तयितव्या भवेत्, क्वचित् रचनावलोपः, क्वचिद् नवरचनासंयोगः वा अवश्यः स्यात्, इति।

नाट्यकथा

स्वामिनः कुबेरस्य वर्षावधि शापकारणेन कृतापराधः यक्षः प्रियपत्न्याः

नाट्यरूपं मेघदूतम्

नाट्यकथा

वियुक्तः रामगिरौ कथमपि कालं यापयन् आषाढस्य प्रथमदिवसे निसर्गे पशुपक्षिषु च नवचैतन्यं विलोक्य उत्कटतया प्रियास्मृतिं प्रापितः अतीव शोकाकुलः भवति। अभांतरे नेपथ्ये शृणोति सः कस्याः अपि प्रियायाः प्रार्थनां सकरुणं कृतां वल्लभं प्रति, दृढाश्लेषबंधात् सत्वरं मोचयितुम् आत्मानम्। यतः द्वारे सरवीरणः प्राप्तः द्वारोद्घाटने विलंबकृते च सः उच्चैः परिहसन् कलकलायते। तदा यक्षः पूर्वं प्रियया सह कृतं तादृशं प्रेमकलहं स्मरन् कल्पनासृष्ट्या प्रियाया कृते उपप्रहारेण अकस्मात् जागरितः भवति। परं तावत् अनुभूतं प्रियामीलनं स्वप्नाभासः एव इति प्रतीतः सः शोकावेगं रोद्धुम् अशक्नुवन् आत्मघातं कर्तुं निर्णिनोति।

सरसि आत्महत्यायै उत्पातुं प्रवृत्तः सः मानवदेहधारिणा रामगिरिणा पृष्ठतः सहसा रुध्यते स्निग्धसांत्वनपरगिरा च परावर्त्यते दुर्निश्चयात्। तत्समा तत्प्रियापि

नाट्यकथा

विरहव्याकुला, कदाचित् तथैव आत्मघातचिंतनपरापि स्यात्; अतः अवशिष्टां अल्पावधिं कथमपि जीवितं धारयेतु सा संदेष्टव्या नभोमार्गेण गच्छता मेघेन, तथा सः प्रार्थयितव्यः इति बोधयति रामगिरिः।

परिहासहेतुना एवं यक्षः बोधितः परमार्थतः तथा करोति। तत्प्रार्थनाम् आदृत्य सौदामिन्या सह मेघः सद्यः मानवदेहधारी तस्य पुरतः अवतरति। तदा प्रीतः यक्षः उभाभ्यां, स्वनिवासभूमिम् अलकापुरीं केन मार्गेण गंतव्यं इति निर्दिशति। तत्र स्वभवनं प्रियां च कथम् अभिज्ञातव्ये इत्यपि कथयति। तां अभिज्ञाय, सुप्तां चेत्, तां मंदध्वनिना प्रबोध्य तस्यै मत्संदेशः विज्ञापयितव्यः, मदभिज्ञानार्थं च कर्णे एतत् रहस्यं कथयितव्यम् इति उक्त्वा मेघस्य कर्णे तत् निवेदयति। उभयोः दंपत्योः अविच्छिन्नम् ऐक्यम् अभीप्सन् सः तौ सस्नेहं विसर्जयति स्वकार्यसिद्धये। मुंबईनभोवाणीतः ध्वनिक्षेपितम्- ६-७-१९६५

—×—

अमृतलता फेब्रु० १९६६

(क्र० ७)

श्री विश्वनाथ केशव छत्रे

नाट्यरूपं - मेघदूतम् ×

★

— पात्राणि —

१ यक्षः — कुबेरशप्तः
२ सुनयना — यक्षपत्नी
३ रामगिरिः — मानवरूपः
४ मेघः — ,,
५ सौदामिनी — मेघपत्नी

• •

[नेपथ्ये]

ज्येष्ठारंभे दिनकरकरैः संहृते चंडतापे
वोढुं सद्यः सजवमनिलः शीतलः संप्रवृत्तः ।
वर्षंति द्राक् सकलजगतो जीवनाधारदात्री
व्यालोक्यैवं सुखमुपगता सृष्टिरेषा त्वशेषा ॥ १ ॥

[स्थलं—रामगिरिः, वृक्षमूले निषण्णः प्रियायाः चिरविरहेण कृशतनुः यक्षः]

यक्षः— अहह ! दुःसहः खल्वयं प्रियाविरहः, विशेषेण मादृशानां यौवनभर-समाक्रान्तानाम् । स्वकार्ये नित्यदक्षेणापि मया कथं तस्मिन् समये हतधिया

× मोहमयी-आकाशवाणीतः ६-७-१९६५ दिनांके ध्वनिक्षेपितम् । सर्वेऽधिकाराः लेखकाधीनाः ।

प्रमादितम् इति न जानामि। स्वामिना च न्यायनिष्ठुरेण शप्तोऽहं वर्षावधि-निर्वासनेन। तेन प्रियायाः विप्रयुक्तः नष्टालौकिकप्रभावः सन् अत्र रामगिरेः आश्रयं आगतोऽस्मि। दयितां स्मारं स्मारं, वृक्षवल्लिनिर्झरपशुविहगादि-कानां क्रीडाः शून्यदृष्ट्या प्रेक्षमाणेन, कथमपि च आत्मानं रञ्जयता मया कतिपय मासाः निर्यापिताः। कति नु व्यतीताः ? (अंगुलिभिः गणयित्वा) अष्टमासाः व्यतीताः। चत्वारः एव अवशिष्टाः। परं इदानीम्—

आषाढेऽस्मिन्नथ समुदिते ततभूमिः प्रशान्ता
लब्ध्वा नव्यं हरितसुतृणं गोमहिष्यः प्रहृष्टाः।
अम्भः पूर्णं सर इदमहो ! कर्षकः प्रीत एते
बाला वंध्यास्त्रिय इव शुचं भूरि मे वर्धयंति ॥ २ ॥

आः। इमे वर्षर्तोः विविधाः विलासाः मम प्रिया–विरहव्यथितस्य अंतःकरणं ननु दुर्वंतितरां यथा बाललीलाः वंध्यास्त्रियः ! अखिलचराचरसृष्टये नवजीवनं समर्पयन् सः एव ऋतुः मम जीवनं अपहर्तुकाम इव आभाति। संध्यासमये जल-चराणां क्रीडाः अवलोकयितुं यदा सरस्तटे निषीदामि, तदा प्रशान्तोदके कदाचित् दृश्यमानं ममैव शोककर्शितकायस्य प्रतिबिम्बं मां भीषयतीव अदर्शनीयतया। यदि ममावस्था ईदृशी, कीदृशी नु स्यात् प्रियायाः ! अपि सा जीवति, वा विरहा-ग्निना दाहं दाहं भस्मावशेषतां... अयि मनः, मा मास्तु ईदृशी अभद्रा कल्पनापि।

[नेपथ्ये]

मा ! मा ! रुंद्धि प्रियदयित ! मां बाहुपाशान्निबध्य
प्राप्तो द्वारं मम सखिगणो, मुञ्च ! मां मुञ्च शीघ्रम् !
तासामेनं शृणु कलकलं, मद्विलंबो लवोऽपि।
तत्संगार्थं, पुनरपि पुनर्मां नयेत्तूपहासम् ॥ ३ ॥

यक्षः— अयि ! कयाचिद् वल्लभया क्रियमाणः वल्लभस्य अयं अनुनयः मां स्मारयति तं अविस्मरणीयं प्रसंगम्। अहा। अतीव मधुरः ! कल्पितमात्रोऽपि सुखयति मे शोकशुष्कहृदयम् ! अयि ! सुनयने ! [तत् कल्पनायां रममाणः तूर्णं विस्मृतदेहभानः वृक्षस्तंभाधारेण निषण्णः एव निद्राधीनः भूत्वा स्वप्ने प्रियां गाढं आलिंगन्निव नाटयति] अपि स्मरसि, प्रिये, यद् सप्ताहप्रवसनात् एकदा गृहं निवृत्तः यावत्त्वां गाढं आलिंग्य निरतिशयसुखसमाधौ अतिष्ठम्, तावदेव अविदितमदागमः तव सखिगणः उच्चैः कलकलं कुर्वन् द्वारं प्राप्तः। त्वं च तासां उपहासभीत्या आत्मानं मम बाहुपाशात् सत्वरं मोक्तुं मां भूयः अनु-नीतवती। परं मया बुद्धिपुरःसरं विलंबितं तव मोचनम्।

' शठ ! निर्दयस्त्वं खलु यतः मां सखिगणस्य उपहासभाजनं अकरवः '।

*

'अपि तेनैव रोषेण आनिशीथं त्वया मया सह वाग्व्यवहारः संत्यक्तः ?

'आम् !'

'तव रोषारक्तकपोलयुग्मदर्शनसुखाय एव मम सः यत्नः आसीत् ।'

'अयि कपटपटो ! त्वं दंडार्हः तिष्ठसि ।'

'सोऽपि मे नूनमनुग्रहो भवेत् !'

[प्रिया यावत् कृतकदण्डाय कपोले प्रहरति तावदेव यक्षः जागरितः । इतस्ततः अवलोक्य]

अयि ! प्रिये, कुत्र त्वं सद्यः अंतर्हितासि । न कुत्रापि दृश्यसे । अप्ययं स्वप्नः वा जागरः । (करतलत्वचं नखाग्राभ्यां आर्तीकृत्य) निःशंकं स्वप्नः एव सः आसीत् सुखमयोऽपि । सुनयने, त्वद्विरहाग्निः उद्दीपितः एव तव स्वप्नमयेन दर्शनेन । एनं दाहं सोढुं अहं न अलं इतः परम् । तं शमयितुं सरसि देहार्पणमेव एकः इदानीं उपायः । तेन विरहदग्धां प्रायेण दिवं गतां त्वां द्रुतं समेष्यामि । गच्छामि सरस्तटम् । [निष्क्रांतः]

× × ×

प्रवेशः २

[सरस्तटे यक्षः जले देहार्पणं चिकीर्षुः तिष्ठति]

यक्षः— भोः वृक्षलताः ! पशुपक्षिणः ! सर्वेऽपि यूयं विनोदनाय मे साहाय्यीभूताः विरहदुरवस्थायाम् । अतः आपृच्छे वः कृतज्ञतापूर्वकम् । जलदेवताः ! नयत मां सत्वरं प्रियासमीपम् । भोः रामगिरे ! सुहृदा इव त्वया तु तावत् मे आश्रयः समर्पितः संकट-काले । वयस्य ! कथं नु ते आनृण्यं संपादयेयम् । अशक्यमेव, अतः चिंतयामि ते कल्याणम् । तव नामापि शुभम्— भगवन्नाम-निगडितम् । अन्ते त्वां आपृच्छमानस्य मम मुखे रामनाम विनायासं विलसति । निर्गतोऽस्मि चिराय, वयस्य रामगिरे, (जले उत्पतितुं प्रवृत्तः एव पृष्ठतः सद्यः मानववेषधारिणा रामगिरिणा समये धावित्वा निरुद्धः) ।

रामगिरिः—

मा ! मा ! कुरु त्वं सखयात्मघातं
पापं न घोरं खलु तत्समानम् ।
पन्था अयं भीहतमानसानां
दुःखं तु भुंक्त्वैव तरंति धीराः ॥ ४ ॥

यक्षः— (परिवृत्य साश्चर्यम्) कस्त्वम् ? किमर्थं ममैवं परिपंथी भवसि ? मुंच ! मुंच मां हतभागिनम् ।

रामगिरिः— पावनं रामनाम गृणन् हतभागी कथं नु स्यात् ?

यक्षः— अथ कस्त्वम् ?

रामगिरिः— यः नचिरात् त्वया आपृष्टः, सः एव रामगिरिः ।

यक्षः— अपि मानवदेहधारी रामगिरिः ?

रामगिरिः— आम् । भगवता रामचंद्रेण मत्पृष्ठे कृतनिवासेन कृतज्ञतया अनुगृहीतः अस्मि यथेष्टमानवदेहधारणशक्त्या ।

यक्षः— समीचीनम् । परं किं कारणं मदीयनिश्चयनिरोधस्य ।

रामगिरिः— सौहार्दमेव । वयस्य ! सौहार्दमेव । पश्य तावत् ।

यक्षः— अवहितोऽस्मि ।

रामगिरिः— स्वपत्नी सीता कथं सहसा तिरोहिता इति भगवता रामचंद्रेण चिरात् न ज्ञातम् आमारुति-गवेषणम् । परं पत्नीविरहव्यथितेनाऽपि तेन आत्मघातः मनसाऽपि न चिंतितः । चतुर्मासानन्तरं पत्नीसंयोगः तव तु निश्चितः।

यक्षः— सा जीवति चेत् ।

रामगिरिः— केन कथितं सा न जीवतीति ?

यक्षः— मे तर्कः ।

रामगिरिः— सखे, तर्कमात्रं अवलंब्य आत्मघाताय प्रवृत्तः त्वं विचारमूढः मे प्रतिभासि ! त्यज सद्यः एनं अविचाराश्रितं निश्चयम् ।

यक्षः— किं नु तावत् कार्यं प्रिया-विरहानलेन दह्यमानेन कायेन ।

रामगिरिः— पश्य तावत्—

कृच्छ्रे यो धैर्यमाश्रित्य सर्वयत्नैस्तु जीवति ।
भद्रं पश्यति सोऽवश्यं यथा धर्मो नलोऽथवा ॥ ५ ॥

प्रहिणु संदेशं प्रियायै धैर्यावलंबनाय चतुर्मासपर्यंतम् । पुरुषापेक्षया स्त्री हृदयेन कोमलतरा निसर्गतः । अतः त्वया स्वयं धैर्यमाश्रित्य प्रिया उज्जीवयितव्या सान्त्वनपरसंदेशेन ।

यक्षः— संदेशः ? अथ केन सार्धं सः प्रेषयितव्यः ?

[गभीरं घनगर्जितं श्रूयते]

रामगिरिः— केन सह ? (विचिंत्य) अयं मेघः अपि, प्रार्थितश्चेत् उपकरिष्यति त्वाम् ।

यक्षः— उदारः खलु कल्पः । प्रार्थये तम्—

भो भो घन क्षितितले सममेव वर्षन्
उज्जीवयंश्च कृपया तपतप्तसृष्टिम् ।
गच्छन्नुदारहृदयोत्तरदिग्विभागम्
वोढुं प्रियां प्रति सखेऽर्हसि मे प्रवृत्तिम् ॥ ६ ॥

[नेपथ्ये श्रूयते मेघविद्युत्प्रणयालापः]

'कांते, नास्ति पतिव्रता तव समा ह्यन्वेषि सर्वत्र माम्,'
'कुर्यां चेन्न तथा ममोग्रमुदियात् सापत्नभावाद्भयम्'।
'कृष्णं काभिलषन्नु मां वद', 'रतिर्वर्णं तु नापेक्षते'
'स्फूर्जोऽलं तव रक्षणे', 'कितव, ते शोभाभिवृद्ध्यै तु सः' ॥ १० ॥

वयस्य, अयं मेघः प्रियया सह प्रणयालापं कुर्वन् तिष्ठति। प्रणयासक्तस्य तस्य श्रुतिपक्षं कथं नु मत्प्रार्थना प्राप्नुयात्।

रामगिरिः— अलं शंकया। प्रार्थयस्व तं भूयः सानुनयम्। सः अवश्यं ते प्रतिवचनं दास्यति। यतः परोपकारेऽवहिता सदैव महात्मनां तिष्ठति सूक्ष्मदृष्टिः।

यक्षः— भोः उदारहृदय वारिद, कृपया तिष्ठ तावत्। उत्तरस्यां दिक्षि निवसंत्यै मद्विरहव्यथितप्रियायै मद्वचनात् कोऽपि संदेशः प्रापयितव्यः भवति। अपि मां एवं अनुगृह्य आवयोः मृतप्रायोः दंपत्योः उज्जीवनं करिष्यसि। आशासे यद्।

रामगिरिः— (स्वगतम्) अहो! प्रेमान्धत्वम्। परिहासहेतुना यन् मया सूचितं तद् अनेन परमार्थतः गृहीतम्!

[नेपथ्ये]

(राग– मालकंस)

श्रुतं श्रुतं वां वचनं त्वशेषं
कुर्यामवश्यं तव कार्यमिष्टम्।
सद्यो नृदेहेऽवतरामि भूमौ
सार्धं स्त्रिया शंभुवरप्रभावात् ॥ ८ ॥

[नृदेहधृक्सौदामिनीमेघौ प्रविशतः]

मेघः— निवेदय तावत् स्वसंदेशं सत्वरम्।

यक्षः— (साश्चर्यम्) नमस्ते। अपि त्वं मेघराजः?

मेघः— आम्।

रामगिरिः— इयं च देवी सौदामिनी?

मेघः— अथ किम्।

रामगिरिः— स्वागतं युवयोः। दिष्ट्या विनोदकृते मया सूचितं सफलीभूतं इति दृष्ट्वा प्रीतोऽस्मि। सखे यक्ष, निःसंशयं त्वं प्रियया संगतो भविष्यसि। प्रसादचिह्नानि पुरः फलानि।

मेघः— त्वर्यतां संदेशः। अन्यथा स्वामिनः मघोनः रोषभाजनं भविष्यामि।

यक्षः— सुष्ठु। निवेद्यतां मत्प्रियायै यद् शापावधिसमाप्तिपर्यंतं–नाम मासचतुष्टयं

तस्याः प्रियपतिः रामगिरौ सधैर्यं कथमपि प्राणान् धारयति, तया च आपुन-र्मीलनं तथैव क्रियतामिति ।

मेघः— एहि प्रिये । विलंबो मास्तु ।

सौदामिनी— अपि दयित, विस्मृतैव त्वरमाणेन त्वया नामसंकेतादिपृच्छा यक्षप्रियायाः ।

मेघः— साधु । अहो, मे विस्मरणशीलता । एषैव विवाहस्य सफलता यत्र दंपत्योः एकस्य न्यूनत्वं प्रपूर्यते द्वितीयेन । सखे ! निवेदय तावत् नामसंकेतादि ।

रामगिरिः— पन्थानं अपि ।

सौदामिनी— तथैव अभिज्ञानोपयोगि गुह्यम् ।

रामगिरिः— अत्यवश्यं राघवेण हनूमत्कर्णे कथितमिव ।

यक्षः— समीचीनं समीचीनम् । मम प्रियायाः नाम सुनयना ।

सौदामिनी— (स्वगतम्) अपि सा नाथं मोहयेत् सुनयनाभ्याम् । मया अव-हितया भाव्यं तस्याः दर्शने ।

यक्षः— संक्षेपेण पन्थानं वर्णयामि ।

रामगिरिः— उभाभ्यामपि भवद्भ्यां अवधानं देयम् ।

मेघः— अवहितोऽस्मि ।

सौदामिनी— मया तु विशेषेण स्मरणे रक्षितव्यं सर्वमपि ।

यक्षः— प्रथमं तावत् उत्तरपूर्वदिशि आम्रकूटनामगिरौ त्वया विश्रम्यताम् । दावोपशमयितुः ते हार्दिकं स्वागतं सः उन्नतमस्तकोऽपि करिष्यति ।

रामगिरिः— सुदीर्घप्रवसने विश्रामस्थानानि अवश्यं ज्ञातव्यानि पथिकेन । अतः युक्तमेव तन्निदर्शनम् ।

यक्षः— तत्र वृष्ट्या प्रशमितयजमानदाहः अपगतभारः सन् सोत्साहं प्रतीच्यां दिशि मार्गमाक्रममाणः नचिरात् विंध्याद्रिपदं प्रक्षालयन्तीं रेवा-नाम-नदीं प्राप्स्यसि । तस्याः तोयं आदाय त्वया अग्रे गंतव्यम् । सारवन्तं त्वां प्रजवा-निलः भ्रमयितुं नैव शक्ष्यति ।

रामगिरिः— पूर्णता गौरवाय निर्भयत्वाय च इति तु स्वाभाविकम् ।

यक्षः— ततः तस्यामेव दिशायां प्रवहन् मार्गे कदंबकेतकीनां सुगंधं आस्वाद्य, मत्तमयूराणां मधुरकेकाः श्रुत्वा, हंसानां क्रीडाश्च विलोक्य, परं तदासक्त्या अमंदायितगतिः, सुदीर्घमध्वानं विलंघ्य, विदिशां नाम नगरीं प्राप्नुहि ।

रामगिरिः— कार्यैकदृष्ट्या विषयमोहं सर्वथैव त्यजंति सुधियः मैनाकगिरिणा पुर-स्कृतं उपहारं सीतागवेषणोत्सुकः सागरं लंघयन् हनूमानिव । आर्यया सौदा-मिन्या अपि ईदृशमोह-प्रसंगे पतिदेवमनः परावर्तितव्यम् मित्रकार्याय ।

सौदामिनी— अवश्यमेव ।

यक्षः— विदिशा तद्देशराजधानी, विलासिजनानां ननु आश्रयस्थानं वर्तते। तत्र वेत्रवत्याः मधुरं जलं पीत्वा, नीचैराख्यं गिरिं विश्रामहेतोः अधिवसेः । ततश्च क्षिप्रातीरस्थितां अवंतिनगरीं गच्छेः ।

मेघः— किंचिदाशंक्यतेऽत्र ।

यक्षः— अवश्यम्। तव पूर्णावधानं प्रत्याययति आशंका । पृच्छ तावत् ।

मेघः— उत्तरस्यां दिशि कार्याय मां प्रेरयन् त्वं कथं नु प्रतीच्यां दिशि वर्तमानानि स्थानानि एतावत्कालपर्यंतं निर्दिशसि ।

रामगिरिः— स्थाने खलु सा आशंका ।

यक्षः— प्रवाससौकर्याय सुंदरस्थलप्रेक्षणाय च कदाचित् वक्रोऽपि मार्गः आश्रयणीयः भवति । अवंतिः सुप्रसिद्धा राजधानी राज्ञः विक्रमादित्यस्य । तत्र द्वादशज्योतिर्लिंगानां एकतमं 'महाकालः' तिष्ठति । तत्र प्रदोषकाले शिवार्चविधौ तव गभीरगर्जनं सफलतां गच्छेत् ।

मेघः— बाढम् । मित्रकार्येऽपि एव पुण्यलाभावसरः चेत्, धन्योऽहम् ।

सौदामिनी— अर्धांगीत्वेन अहमपि तथा ।

यक्षः— आर्यया तत्र निशायां अभिसारिकाभ्यः मार्गं दर्शयित्वा तासां मनःपूर्वकाः शुभेच्छाः लब्धव्याः । ततः उत्तरस्यां दिशि मुखं परिवर्त्य, विस्तीर्णां मरुभूमिं वेगेन आक्रम्य, प्रख्यातं कुरुक्षेत्रं प्राप्नुयाः ।

रामगिरिः— महाभारतीयसंग्रामभूमिः अवश्यं द्रष्टव्या । यतः भगवता श्रीकृष्णेन गीताकथनेन सा पाविता ।

मेघः— आम् ।

यक्षः— वयस्य ! ततः पूर्वस्यां दिशि परिवर्तितमुखः झटिति भागीरथीतीरेः स्थितं हरिद्वारं गंतव्यम् ।

रामगिरिः— पुण्यवन्तौ खलु युवाम्—नचिरात् पवित्रगंगायाः दर्शनं लप्स्यमानौ ।

यक्षः— ततः नगाधिराजं हिमालयं आरुह्य भगवतः शंकरस्य निवासं कैलासं प्राप्नुहि । तत्र च भगवतः गायने, गिरिगुहासु प्रतिध्वनितं तव गर्जिते पिनाकिना सह सर्वेषां श्रोतॄणां मोदावहं भवेत् ।

मेघः— आम् । भगवान् शिवः अवश्यं आराधयितव्यः शिवेच्छुभिः । ततः ?

यक्षः— ततः नातिदूरं अलकानगरीं-इष्टस्थानं प्राप्य क्रीडागिरौ अवतरेः ।

मेघः— अथ विशालायां तस्यां राजधान्यां कथं नु तव सदनं अभिज्ञातव्यम् ?

यक्षः— स्थाने खलु ते पृच्छा। शृणु तावत्— अलकापुरीस्वामिनः कुबेरस्य भव्य-प्रासादस्तु अवतरणसमये एव दृष्टिं हरेत्। तस्य उत्तरस्यां, इंद्रधनुरिव सुरम्यं तोरणं, हस्तप्राप्यस्तबकं बालमंदारवृक्षं, मरकतशिलाबद्धसोपान-मार्गां वापीं, द्वारपार्श्वे च चित्रितशंखपद्मौ धारयत् मम भवनं अभिज्ञातुं तव नैव कष्टप्रदं भवेत् इति तर्कयामि।

सौदामिनि— ईदृशैः स्फुटचिह्नैः युक्तं सदनं प्राप्तुं को नु आयासः अनुभूयेत।

यक्षः— तत्र या तन्वी, श्यामा, शिखरिदशना, पक्वबिंबाधरोष्ठी, स्तनाभ्यां स्तो-कनम्रा, धातुश्च आद्या सृष्टिरिव सैव मे प्रेयसी इति जानीहि। प्रथमं ताव-न्निरीक्षस्व निर्भृतं यदि सा निद्राधीना वा जागरितः।

रामगिरिः— अनुचितं खलु निद्रितप्रबोधनम्।

मेघः— स्त्रीदाक्षिण्यमपि पालयितव्यम्।

यक्षः— सा वीणापाणिः उन्निद्रं मद्विरहगीतं गायन्ती, शुकसारिकाभ्यां मद्विषये संलपन्ती वा स्वप्ने ममालिंगनसुखं सानन्दं आस्वादयन्ती दृश्येत। यदि दिष्ट्या सा निद्राधीना स्यात् तव उद्धतप्रोच्चगर्जितं तस्याः वराक्याः सुखस्व-प्नभंगाय भवेत्। अतः अवधेयम्। निद्रानुग्रहाकांक्षया निमीलितलोचनायां तस्यां सत्यां याममात्रं स्तनितविमुखो भूत्वा, मालतीनां अभिनवैः जालकैः सह प्रत्याश्वस्तां तां, त्वया स्वजलकणिकाशीतलेन अनिलेन उत्थाप्य आर्या सौदा-मिन्या सहगवाक्षे स्थितेन, धीरगभीरया मनुष्यवाचा तस्यै मत्संदेशः निवेदयितव्यः।

मेघः— आम्। परं अभिज्ञानपरं किं रहस्यं भगिन्यै मया कथयितव्यम्।

यक्षः— तत् कर्णे कथयामि (तथा करोति)।

मेघः— ज्ञातं ज्ञातम्। प्रणयिनां रहस्यं जने प्रकटयितुं अनुचितमेव।

यक्षः— अन्ते एवमेव प्रार्थ्यते।

एतत्कृत्वा प्रियमनुचितप्रार्थनावर्तिनो मे
सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या।
इष्टान् देशान् विचर जलद प्रावृषा संभृतश्रीः
मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः॥

卐 卐 卐

प्रतापशान्तयोः

अस्याः नाटिकायाः कथा मम रसिक-सुहृद्वरैः श्री. भ्यासा० भिडेमहोदयैः मह्यं कथिता प्रेरितश्च अहं नाटिकारचनायै। सप्ताहाभ्यंतरे एव रचना इयं समाप्ता। आधारभूत ग्रंथः हे. भे. प. श्री. कोल्हटकर-महोदयैः मराठीभाषायां विरचितः आस्ते सौविध-मौमासिकया सादरं शीघ्रं च इयं कृतिः प्रकाशिता। राणा-प्रतापे भारतीय-वीरवरेषु अग्रगण्ये सत्यपि इमां नाटिकां ध्वनिक्षेपणार्थं दिल्लीनभोवाणी वा जयपुर-नभोवाणी- विज्ञापितापि नोत्सहते स्वीकर्तुम् इति नूनम् आश्चर्यम्

नाट्यकथा

प्रतापसिंहः तस्य अनुजः शान्तसिंहः युगपत् स्वस्वशरेण विद्ध-हत-वराह-स्वामित्व-विषये, 'ममैव सः' इति प्रतिपादयंतौ कलहायमानौ च अन्योन्यं प्रहर्तुं प्रवर्तेते। तद् दृष्ट्वा कुलगुरुः, प्रत्येकेन पशोः अर्धः स्वीकर्तव्यः इति उपदिश्य तौ सांत्वयितुं प्रयतते। परं तद् व्यर्थम् इति प्रतीतः हृदि नितरां व्यथितः तयोः चक्षुरुन्मीलन-हेतुना स्ववक्षः करस्थखड्गेन विदारयति! तद् प्रेक्ष्य सद्यः अपगत- बल-मदांधत्वौ तौ भ्रातरौ कलहात् विरमतः। तुल्यबलयोः

प्रतापशक्तयोः

नाट्यकथा

एकम् वासः विना कलहम् अशक्यः इति शक्तसिंहः अग्रजं प्रणम्य मिलामागमि अनुसर्तुकामः तं विहाय निर्गच्छति सम्राजः अकबरस्य च आश्रयं संपादयति।

स्वभगिनीं भार्यार्थम् अकबराय समर्प्य ततः लब्धसेनापतिपदः मानसिंहः सोलापुरविजयोत्तरं दिल्लीं निवर्तमानः चितोरसमीपं प्राप्तः। सः चितोरस्वामिनं स्वातंत्र्यं च प्राणपणेनापि रक्षितुं प्रयतमानं प्रतापसिंहं द्रष्टुं, यावच्छक्यं च अकबरस्य सामंतत्वस्वीकरणाय तं प्रेरयितुम् इच्छति पत्रद्वारा च तथा विज्ञापयति। मानसिंहस्य तदिच्छायां कपटं शंकमानोऽपि प्रतापः संमति-प्रत्युत्तरं प्रहिणोति आदिशति च तस्य यथाहस्वागतसिद्धतायै। मानसिंहः वनागतः भोजनसमये स्वपंक्तौ यजमानेन प्रतापेन भोक्तव्यम् इति साग्रहं स्वेच्छां प्रकटीकरोति। शरीरस्य अस्वास्थ्यम् अनुभवन् भोजनाय उपस्थातुं न शक्नोमि इति प्रतापः सविषादं विज्ञापयति। तदा तस्य अनुपस्थितौ युवराजेन आत्मना सह भोजनं कर्तव्यम् इति मानसिंहः निर्बध्नाति। तद् ज्ञात्वा भोजनकक्षायां प्रविश्य प्रतापः अभ्यागतस्य कपटहेतुं सकोपम् आविष्करोति। "भो मानसिंह! धर्मभ्रष्टेन भवता सह भुक्त्वा नाहं

नाट्यकथा

विदुष्यामि स्वपाविभ्यम् । अन्यच्च युष्मादृशानां सज्जनविद्रोहिणाम् असंतोषभियाः दिल्लीश्वरः मां नाभिभवति इति न । सर्वार्यगुप्ता हि सिसोदसंततिः ? इति । तदा पदाहतः सिंहः इव भूतावमानः मानसिंहः प्रतिशोधाय प्रकटं प्रतिज्ञाय अन्नं स्पृष्ट्वा प्रणम्य च निर्गच्छति ।

यथापेक्षम् अकबरसेना प्रतापम् अभ्यभवत् । तदा तेन कृतं पराक्रमं, तत्सामंतेन झालापतिना कृतं स्वामिरक्षणं स्वबलिदानं च सहानुयायिभिः वर्णयतः द्विजौ ते जीवंतौ सैनिकौ ।

प्रतापस्य प्रियः अश्वः चेतकः प्रवाहस्य परतीरं यावत् उत्पतति तावत् अतिशयेन पंचत्वं गच्छति । तं स्वामी भृशं शोचति । तदैव अश्वारूढः शक्तः अग्रजदिव्यपराक्रमदर्शनेन अनुतप्तः दिल्लीशं त्यक्त्वा अग्रजं प्रणेतुम् त्वरते । मार्गे अग्रजम् अनुधावंतौ शत्रुयोधौ दृष्ट्वा तौ निहत्य अग्रजं प्राप्य तत्पादयोः पतति क्षमां च याचते । प्रतापः तेन उज्जीवितः इव बलशालिबंधुद्वयस्य ऐक्येन स्वातंत्र्यरक्षणं सुशकं मन्यमानः समादधाति, प्राथयते च श्रीएकलिंगं राष्ट्रैक्यभावनावृद्ध्ये ।

संविद् फेब्रु० ६९

प्रताप–शाक्तयो :

–विश्वनाथ केशव छत्रे*

पात्राणि

१ प्रतापसिंह :–चितोराधिपतिः
२ शाक्तसिंह :–प्रतापस्य अनुजः
३ कुलगुरु :–प्रतापस्य
४ मानसिंह :–अकबरस्य श्यालः–सलीममातुलः
५ द्वारपाल :–मानसिंहस्य
६ द्वारपाल :–प्रतापसिंहस्य
७ जगत्सिंह :–प्रतापस्य सचिवः–सेनानी
८ विजयसिंह :–प्रतापस्य सैनिकः
९ रणधीरसिंह :–प्रताप-सामंतस्य झालापतेः सैनिकः
१० चेतक :–प्रतापस्य प्रियः अश्वराजः

[नेपथ्ये]

द्विषां यो दुर्धर्षः प्रखरभास्वानिव दहन्,
नतोऽग्रे म्लेच्छानां न च महति कृच्छ्रेऽप्यगतिकः ।
य आ स्वातंत्र्याप्ति त्वखिलनृपभोगान् परिजहौ,
प्रतापोऽसौ स्वामी चिरमिह चितोरस्य जयतु ॥१॥

[स्थलम्-अरण्यम् । अग्रे पृष्ठतश्च शराभ्यां विद्धः मृतश्च पीवरतनुः वराहः भुवि निपतितः दृश्यते ।]

---

*शास्त्री, संस्कृत–मराठी–कविः संस्कृतनाटककारः, प्रवचनकारः, कीर्तनकारश्च; श्रीसुभाषचरितम्, श्री एकनाथचरितम् भारतीयस्वतंत्र्योदयः इत्यादि-ग्रन्थानां कर्ता ।

प्रतापसिंह :– (सानंदं प्रविश्य)–अहो मे अवन्ध्यत्वं शरसंधानस्य। एकेनैव शरेण सः वन्यः पशुः मया यमसदनं प्रापितः। (निरीक्ष्य) आः। पीवरकायोऽयम्। अस्य रुचिप्रदेन आमिषेण भोजनोत्सवो नूनमद्य मम–

शाक्तसिंह :–(प्रविश्य सक्रोधम्)– रे वाचाट। अपसर इतः। कथं न ल्लज्जसे पर-मृगयित-वन्य-पशोः आमिषस्य आस्वादनकल्पनयापि रमयितुमात्मानम्।

प्रताप :–रे उद्धतान्ध ! अपि न पश्यस्यत्र प्रतापस्य शरम्। (उद्धृत्य निदर्शयति)।

शाक्त :–रे बलगर्वित ! मदान्ध ! किं न प्रेक्षसेऽत्र शरं अस्य शाक्तसिंहस्य (उद्धृत्य निदर्शयति)

प्रताप :–अयं वन्यपशुः प्रथमं हतः मदीयेन एव शरेण।

शाक्त :–मदीयेन एव शरेण आदौ हतः सः।

प्रताप :–अपि जानासि, रे शठ, केन सह त्वं कलहायस इति। पश्य तावत्

प्रतिस्पर्धिबलं प्रेक्ष्य प्रवर्तन्ते कलौ बुधाः।
दूतदृष्ट्या निरीक्ष्यादौ रामो रावणमभ्यगात् ॥ २ ॥

आवयोः बलाबलं आदौ विचारय, पश्चात् एव वैरायस्व।

शाक्त :–नाहं क्लीवः।

प्रताप :–वीर्यवान् न वदति। आचरति। (कोशादसिं निष्कास्य) पश्य तावत् अमुम्।

शाक्त :–[स्वासिं कोशात् निष्कास्य] त्वमपि प्रेक्षस्व अमुम्।

प्रताप :–अपसर इतः अंजसा, ~~नो चेत् हनिष्यामि त्वाम्।~~

शाक्त :–किं रेऽग्रजत्वमदभारविगर्वितत्वाद् आदौ मयैव हत एष इति ब्रवीषि।

सुक्षत्रधर्मपरिपालनदक्षवीरः
सम्बन्धितां न गणयत्युत मित्रभावम् ॥ ३ ॥

अपसर, त्वमितः प्रथमे क्षणार्धे नोचेत् ।

प्रताप :–किं नोचेत् ।

शाक्त :–प्राणैर्वियुक्तो भविष्यसि ।

प्रताप :–उद्धत, एहि, गृहाण मे प्रहारम् ।

[उभौ द्वन्द्वाय प्रवतते]

कुलगुरु :–(सहसा प्रविश्य सरभसं उभौ वियोज्य तयोः मध्ये च स्थित्वा)

कृतं कृतं वां कलहेन वत्सौ
वीर्यं हि नैव स्वकुलक्षयाय ।
स्वभूजिगीषोस्तु रिपोर्जयाय
स्वः स्वो द्रुतं संह्रियतां कृपाणः ॥४॥

वत्सौ, यवनेन स्वदेशे स्वधर्मे च सर्वतः समाक्रान्ते किमेतत् असांप्रतं युवाभ्यां प्रवर्तितम् । भ्रातृकलहात् सद्यः विरमतम् ।

शाक्त :--इमां मम मृगयां सः अभिलषति अक्षात्रः इव ।

प्रताप:– प्रथमं मया विद्धः अयंः वराहः ।

शाक्त :– नहि, नहि, मयैव प्रथमं विद्धः ।

कुलगुरु :–उभावपि मया प्रथमं विद्धः इति प्रतिपादयतः । तर्हि कः साक्षी ।

प्रताप :– कः साक्षी । (विचिन्त्य) श्रीसूर्यनारायणः ।

कुलगुरु :–किं नु तस्य अप्रत्ययकारिसाक्षित्वेन । विभज्य गृह्यतां अयं पशुः ।

प्रताप :– अशक्यं, सर्वथैव अशक्यम् ।

पौरुषार्जितसत्त्वस्य कोऽपहारं नु मर्षयेत् ।
प्राणानपि सुखं जह्यात् क्षत्रियो धर्मरक्षणे ॥ ५ ॥

नाहं संवर्धितो मृतमातृ-पयःप्राशनेन ।

शाक्त :– नाहमपि । एहि, दर्शयामि ते मत्पौरुषम् ।

प्रतापः– सिद्धोऽस्मि । (उभौ अपि पुनः द्वन्द्वाय प्रवर्तेते)

कुलगुरुः– (हताशः सविषादम्) हन्त ! दुर्निवारं खलु मदान्धत्वम् । परं प्रयतिष्ये सर्वात्मशक्त्या । भगवन् एकलिंग त्वमेव इदानीं मे शरणम् । भ्रातृकलहेन अद्यावधि पवित्रः एकाकी सिसोदेवंशः म्लेच्छाधिपेन अकबरेण मा दूष्यताम् इति हेतोः इदानीं मत्प्राणार्पण-मेव उपायः दृश्यते । तं अनुतिष्ठामि । तेनापि तावत्, सद्यः अपगत-मोहौ एवौ प्रबलौ भ्रातरौ एकीभूय अप्रतिम-पौरुषेण मातृभुवः स्वातंत्र्यस्य कुलस्य च पावित्र्यस्य रक्षणे प्रवर्त्स्येते इति दृढं विश्वसिमि । (प्रणम्य) जयतु जयतु देवः सर्वसाक्ष्येकलिंगः

कुलगुरुपदयोग्यं कर्म नन्वाचरामि ।
मम तनुबलिदानाद् मुख्ययोर्दुर्मतित्वं
सपदि कुलशिवार्थं त्वेतयोः शुद्धिमेतु ।। ६ ।।

[कटेः खड्गं निष्कास्य वक्षो विध्यति, ततः रक्तप्रवाहः अधः स्रवति]

प्रताप :–[कुलगुरोः अघोर-कर्म-दर्शनेन प्रकृतिं प्रापितः] अहह ! अनुज, अस्मत्-धीव्यत्यासपरिवर्तनाय अनेन हताशेन वराकेण आत्मार्पणं कृतम् । धिग् अस्मद् बलगर्वितयोः मदान्धत्वम् ।

(कुलगुरुं प्रणम्य)

यावद्भोः प्रथित-चितोर-पूत-वंश
ईदृक्षान् दृढमभिमानिनो बिभर्ति ।
नो तावद्रिपुविजये मनाङ्निराशा
वंदे त्वामयि ! समुदारधे हुतात्मन् ।।७।।

एहि, वत्स, शाक्त, द्विधा कृत्वा एनं वराहं भुञ्जामहै ।

शाक्त :–अशक्यः खलु कलहं विना तुल्यबलयोः एकत्र वासः । अतः अग्रज, मया इतःपरं विभिन्नमार्गेण एव गन्तुं उचितं, निश्चितं च । साधयामि । [प्रणम्य निष्क्रान्तः]

प्रताप :–भगवतः एकलिंगस्य इच्छां अन्यथा कर्तुं को नु मानवः प्रभवति। भ्रातुः साहाय्यं विना एकाकिनैव मया स्वातंत्र्यसमरः कार्यः इति दृश्यते भगवदिच्छा। सः एव अधुना मम शरणम्। तस्य प्रार्थनायाः वेला प्राप्ता। गतोऽस्मि [निष्क्रान्तः। जवनिकापातः]

[**प्रवेशः –२**]

[**स्थलम्**–प्रताप-राजधानी–कुमळनेरस्य अविदूरतः मानसिंहस्य सेनानिवेशः]

मानसिंहः– (स्वगतम्) दिष्ट्या अनुकूलाः दृश्यन्ते आकाशस्थग्रहाः सम्राजः अकबरस्य। दुर्जयत्वेन एकः एव तावत् अनिर्जितः दुराग्रहः राजपूतनृपः प्रतापः, दुर्बलत्वं नीतः इदानीं तदनुजेन शाक्तसिंहेन, सम्राजः आश्रयत्वात्। अहो मौर्ख्यं अस्य प्रतिनिविष्टस्य! कालानुरूपं वर्तितव्यं बुधेन इति सामान्यां नीतिमपि सः न जानाति। दृश्यतां तावत्–

वृक्षान् समुन्मूलयति प्रदृप्तान्
न वेतसांस्तु प्रणतान् प्रपूरः ॥ ८ ॥ (उपजाति)

अस्मादृशाः व्यवहारकुशलाः वैतसीं वृत्तिं आश्रित्य, निजैश्वर्यं न केवलं रक्षंति, परं, वर्धयन्त्यपि। प्रतापसदृशास्तु स्वातंत्र्य-मृगतृष्णिकामनुधावन्तः, पूरे दर्पोद्धतवृक्षाः इव आत्मनः जीवनं उच्छिंदंति। महाभारतप्रणेतुः व्यासमहर्षेरपि वचनं, नाम 'अपि सर्वस्वमुत्सृज्य रक्षेदात्मानमात्मना' इति न प्रमाणीकुर्वंति ते दुराग्रहात्।

अहो पराकोटिः अस्य प्रतापस्य मूढतायाः, यत् तेन आस्वातंत्र्याप्ति भाग्यवशादुपलब्धाः राजोपभोगाः,नाम सुवर्णरौप्यपात्रेषु भोजनं,पुष्पमंडित-मृदुशय्या, कूर्चवपनम्, इत्यादयः वर्जिताः तथा प्रतिज्ञाय। अप्रतिम-पौरुषस्य अपि तस्य कुतः स्वातंत्र्य-लाभ-संभवः। इदानीं तु अनुजेन

शाक्तसिंहेन परित्यक्तः एकाकी वराकः सः कियत्कालं सर्वसमर्थं मोगलसम्राजं प्रतिरोद्धुं समर्थो भवेत् । बध्येत वा म्रियेत वृथैव स्वसंरक्षण-प्रयत्ने सः, न मूर्खः अपि तु अधीतमूर्खः । भोः जनाः, विलोक्यतां अस्माकं बहुमानः सम्राट्-सभायाम् । वयं न वेतनिकाः परं निकटसंबंधिनः सन्मान्याः सेवकाः अकबरस्य दिल्लीश्वरस्य। संभाव्यात् अपहरणात् प्रागेव स्वभगिनीं तस्मै भार्यात्वेन समर्प्य, अस्माभिः न केवलं आत्मरक्षणं कृतं परं प्रतापसदृशाः मूढाः रक्षिताः अपि रहः सम्राड्रोषात्, इति न असत्यम् । एतत् सत्यं प्रतापं प्रत्याययितुं दिष्टया सुवर्णसंधिः प्राप्ता। अविदूरं तस्य राजधानी। तं दृष्ट्वा, अस्माकं सोलापुर-विजयं सविकत्थनं वर्णयित्वा, यावच्छक्यं च तं वशीकर्तुं प्रयत्य दिल्लीं गमिष्यामः । शोभनः खलु अयं कल्पः। गमनपूर्वं पत्रप्रेषणं उचितं स्यात्। लिखामि तत्। (लिखित्वा पुटे निबध्य, तद् मुद्रांकितं चकृत्वा) कः कोऽत्र भोः।

द्वारपाल :–(प्रविश्य) आज्ञापयतु महाराजः।

मानसिंह :–इदं पत्रं द्रुतगति-तुरगिणा कुमळनेरदुर्गे निवासिने प्रतापसिंहाय देयं, तस्य प्रत्युत्तरं च आनेतव्यं विना विलम्बम्। प्रतीक्षामहे तावत्।

द्वारपाल :–यथाज्ञापयति महाराजः (निष्क्रांतः)

[**प्रवेश** :–३]

[प्रतापः राजधान्यां स्वनिवासे सचिंतः उपविष्टः]

प्रताप :–चारेण वृत्तं आनीतं यत् राजा मानसिंहः दक्षिणदिशः निवर्तते दिल्लीम्। स्वधर्मस्वजनद्रोहिणां ईदृशानां वायुसंपर्कोऽपि परिहर्तव्यः अस्मादृशैः रक्षितस्वाभिमानैः मातृभूभक्तैः। किमुत दर्शनम्।

द्वारपाल :–(प्रविश्य) महाराज, एतत् पत्रं आनीतं राज्ञः मानसिंहस्य दूतेन। (पुरस्करोति)

प्रताप :–(साशंकम् समनोव्यथं च पत्रं पठित्वा स्वगतम्) आः स्मृतमात्रः एव पत्ररूपेण दृष्टिपथं आगतः मानसिंहः। किं नु पत्रप्रयोजनं स्यात्। (पत्रमुद्घाटच अवलोक्य च) मानसिंहः मां द्रष्टुकामोऽस्ति। न प्रत्यवायः। अतिथिधर्मः पालनीयः अस्माभिः। (प्रकाशम्) दूतः विश्रम्यतु यावत् पत्रं विमृश्यते।

द्वारपाल :–यथाज्ञापयति महाराजः (निष्क्रांतः)

प्रताप :–(स्वगतम्) मानसिंहः लिखति... चिरायितं खलु भवदीयं दर्शनम्। दक्षिणदिशः विजयोत्तरं दिल्लीं निवर्तमानाः वयं मध्येमार्गं किंचिद् विश्रम्य भवद्दर्शनं इच्छामः। यदि न मनसि कोऽपि विकल्पः आयोजयितव्या दर्शनव्यवस्था। विज्ञाप्यतां भवद्विचारः दूतेन इति.... सात्मश्लाघम्।

अपि स्वपराक्रमं मदग्रे वर्णयितुं सः उत्सुकः ततो वा मां वशीकर्तुं सः समुत्सुकः। अथवा कोऽपि कपटहेतुः निगूढः। कस्मिन्नपि हेतौ सति 'सावधानम्' वर्तितव्यं अस्माभिः इति उचितम्। संमतिपत्रं लिखामि (लिखित्वा) (प्रकाशम्) कः कोऽत्र भोः।

द्वारपालः– (प्रविश्य) आज्ञापयतु महाराजः।

प्रतापः–इदं प्रत्युत्तरं दातव्यं मानसिंहस्य दूताय। यथोचितं विश्रम्य भुक्त्वा पीत्वा च सः गच्छतु। अन्यच्च सचिवोत्तमः विज्ञापयितव्यः यत् राजा मानसिंहः अस्माकं आतिथेयं ग्रहीतुमिच्छति। सम्मतं अस्माभिस्तत्। अतः उदयसागरतीरे मानसिंहार्थं निवासं परिकल्प्य यथार्हा अतिथिस्वागत-व्यवस्था द्रुतं विधेया। सर्वशः च सावधानं वर्तमानेन सचिवोत्तमेन वयं सत्त्वरं द्रष्टव्याः इति।

द्वारपाल :–यथाज्ञापयति महाराजः।

[पत्रं गृहीत्वा निष्क्रान्तः]

[प्रवेशः ४]

[**स्थलम्**–मानसिंहार्थं रचितः अतिथिनिवासः। मानसिंहः भोजनाय सिद्धे पात्रे उपविष्टः स्वीयैः उच्चपदस्थैः सह]

मानसिंह :–भोः सचिवोत्तम, कथं नु यजमानः प्रतापसिंहः नाद्यापि आयाति। सुचिरं तं प्रतीक्षामहे।

जगत्सिंह :–मान्यवर, स्वामिनं बलवती शिरोवेदना बाधते।

मानसिंह :–एवं सत्यपि, यजमानेन विना, अतिथिः एकाकी भोक्तुं नार्हति, इति अस्माभिः सुज्ञनृपस्य बोधयितव्यं किम्? तस्मै निवेदयितव्या तावत् अस्मन्मनीषा।

जगत्सिंह :–अथ निवेदयामि (निष्क्रान्तः)

मानसिंह :–हार्दिकेन भव्येन स्वागतेन तर्कितमस्माभिः यत् यजमानः प्रतापसिंहः अस्माभिः सह अवश्यं भोक्ष्यते इति।

जगत्सिंह :–(प्रविश्य)–प्रार्थयते स्वामी मद्द्वारा, यत् प्रकृतेः विशेषेण अस्वास्थ्येन– मान्यवराय अतिथये स्वपंक्तिलाभं समर्पयितुं न शक्तोऽस्मि, क्षन्तव्यः अतः अतिथिविषयकः अयं उपचारभंगः, सुखेन च भोक्तव्यमिति

मानसिंह :–दूयते नश्चेतः यजमानस्य आकस्मिकेन प्रकृतेः अस्वास्थ्येन। तस्य अनुपस्थितौ तत्पुत्रः युवराजः यदि अस्माभिः सह भुंजीत, तदपि अस्मत् संतोषाय भवेत्। तत्र तु न कोऽपि प्रत्यवायः।

जगत्सिंह :–(स्वगतम्) निरुत्तरीकृतः खलु स्वामी अनेन। इतः संघर्षः अपरिहार्यः आभाति। (प्रकाशम्) यथार्थं भणति भवान्। निवेदयामि तावत् (निष्क्रान्तः)

मानसिंह:–इदानीं अपरिहार्यं युवराजस्य भोजनं साकमस्माभिः। 'आत्मा वै पुत्र नामासि' इति श्रुतिवचनम्। युवराजस्यापि भोजनेन भुंक्तः भ्रष्टश्च प्रतापः एव।

प्रतापः– (प्रविश्य सकोपम्) किमाह राजा मानसिंहः ? भुक्तं भ्रष्टश्च प्रतापः ? अशक्यम् । सर्वथा अशक्यं आमरणम् । युवराजोऽपि न भोक्ष्यते । अभिज्ञातः मया राज्ञः गूढहेतुः । राजन्, श्रूयताम् । यैः कुलकलंकैः स्वभगिन्यः दुहितरश्च गोमांसभक्षकयवनेभ्यः विवाहे अर्पिताः, तैः सह अन्नोदकव्यवहारेण स्वकुलं विदूषयितुं नैव इच्छामि । यदि एतेन मम आचरणेन आत्मानं अधिक्षिप्तं मन्येत भवान्, तर्हि अपरिहार्यं खलु तत् ।

मानसिंह :–(अक्रोधेन-सस्मितं च) प्रतापसिंह, यद्यपि वयं भ्रष्टाः, भवदीयं पावित्र्यं अस्माकं एव यवनाश्रयेण रक्षितम्, इति न विस्मर्यताम् । अखिलक्षात्रकुलविध्वंससंकटे अस्माभिः पुरःसृत्य स्वकुलं विदूष्य, इतरेषां पावित्र्यं रक्षितं अप्रत्यक्षम् । अस्माकं असंतोषभिया च दिल्लीश्वरः नाभिभवति वः सर्वशक्त्या परमार्थतः निश्चयेन च ।

प्रताप :–स्ववीर्यगुप्ता हि सिसोदसंततिः । भगवतः एकलिंगस्य एव कृपा याच्यते अस्माभिः । नापेक्ष्यते न याच्यते च मानवस्य अपूर्णा क्षणभंगुरा च कृपा सिसोदवंशजैः । ते वैरिणः अनुकंपया जीवितुं न चिंतयंति मनसापि । संग्रामसिंहानुगतप्रखरखड्गेन एव अस्मत्पावित्र्यं अद्यावधि रक्षितम् । स्वयं कुकर्म विधाय, तत् सत्कृत्यत्वेन भवता भाव्यते, इति नीचोचितमेव नूनं कृत्यम् । पर्याप्तसामर्थ्ये संपादिते, दिल्लीशः युष्मदसंतोषं अवधीर्य अस्मान् अभिभविष्यत्येव । यतः–

स्वाभिमानविहीनानां जितानां हततेजसाम् ।
असंतोषं न जेतारो गणयंत्यमितौजसः ॥ ९ ॥

मानसिंह :–(पात्रं प्रणम्य स्पृष्ट्वा उत्थाय च) सुष्ठु, साधयामि । रे ! मत्तोच्छ्वसनवमद्विषालुगंधो बुद्धयैवाहत उरगः पदा त्वयाद्य । आगत्य-प्रबलचमूसमन्वितो द्राक् कंडूयां रणविषये तवापनेष्ये ॥१०॥

(प्रहर्षिणी) (निष्क्रान्तः स्वाधिकारिभिः)

[**जवनिकापातः**]

[प्रवेशः ५]

[राजस्थाने ऋषभनाथदरीसंन्निधौ प्रतापस्य सेनानिवेशमार्गः। समयः–सूर्यास्तः]

[क्षतजदिग्धवसनौ रणधीरसिंहः विजयसिंहश्च विरुद्धदिग्भ्यां प्रविशतः]

विजय – जयतु भगवान् एकलिंगः।

रणधीरः– जयतु भगवान् एकलिंगः।

(अन्योन्यं राजपूतरूढ्यनुसारं आलिंगतः)

विजयः – रणधीर, का वार्ता अस्मन्महाराजस्य।

रणधीरः– अपि न अवलोकितस्त्वया अद्य तस्य अद्भुतः पराक्रमः।

विजयः– नहि। तद्विरुद्धायामेव दिशायां मानसिंहसेनां अभिघ्नन्तः आस्म।

रणधीरः–तर्हि दुर्भाग्यं ते खलु उपपन्नम्।

विजयः– अपि त्वया साक्षात्कृतः महाराजस्य पराक्रमः।

रणधीरः– न केवलं मया साक्षात्कृतः परं महाराजस्य रक्षणेऽपि मे रुधिरं प्रस्रुतम्।

विजयः– सुभगोऽसि नूनम्। क्षताकीर्णं ते वपुरेव साक्षि। अहो, मे दुर्विधित्वम्! महाराज-पराक्रमश्रवणेनापि पावयिष्ये मच्छ्रवणपुटम्। निवेदय तावत् सविस्तरम्।

रणधीर :–कस्माच्चिद्विषयान्मोदो यो नरेणोपभुज्यते
वर्णनाद्रसिकस्याग्रे स दिष्ट्या द्विगुणायते ॥११॥

अहो! आनंदवृद्धिकरमेव कार्यम्। उपविशावात्र वटवृक्षमूले। (उपविशतः) अवहितो भव।

विजय :–अवहितोऽस्मि। आरभ्यताम्।

रणधीर :–मानसिंहविगर्हणप्रसंगेन शत्रोः शीघ्राक्रमणं प्रागेव जानन् सर्वशः प्रतीकारसिद्धः महाराजः, ससेनः अरिम् प्रजवं प्रत्यगच्छत्।

सागरोपमायां द्विषदः सेनायां च प्रविष्टमात्रः सः ददर्श गजारूढं युवराजं सलीमम् ज्येष्ठपुत्रं, हिंदुधर्मस्य उच्छेदने, हिंदुदाराणां च अपहरणे बद्धपरिकरस्य अकबरस्य। तं युवराजं हत्वा, सम्राजं शोकसागरे निपातयितुं महाराजेन क्षणार्धे निश्चितम्।

विजय :–पुत्रमृत्युसमं दुःखं नान्यज्जगति वर्तते। इति महाराजेन सम्यग्ज्ञातम्। ततः–

रणधीर :–शृणु।

दूरात्सलीममवलोक्य सहस्रयोधैः
सोऽभ्यद्रवत् क्षुधितसिंह इव द्विपेंद्रम्।
द्राक् प्रापितोऽतिनिकटं च हयोत्तमेन
तद्धस्तिगंडनिहिताग्र्यपदा क्रुधाहन्! ॥१२॥ (व. ति.)

पार्ष्णिभ्यां प्रेरितः एव अश्वोत्तमः चेतकः, वायुवेगेन धावित्वा, शत्रुसैन्यं, क्रकचेन काष्ठमिव कृंतन्, गजारूढस्य सलीमस्य संमुखं प्राप्नोत्, तस्य गण्डस्थले च स्वे अग्रपदे निर्भयं आरोप्य निश्चलस्तस्थौ।

विजय :–अहो! इंगितज्ञता अश्वराजस्य।

रणधीर :–प्रीतश्च ततः महाराजः स्वशूलं युवराजवक्षःहृदयं लक्ष्यीकृत्य क्रोधेन प्राक्षिपत्। परम्—

विजय :–परं किम्। अपि न हतः युवराजः।

रणधीर :–सुदैवात् युवराजस्य, दुर्दैवाच्च महाराजस्य, हस्तिपः एव हतः!

विजय :–प्रायेण स्वामिरक्षणाय हस्तिपेन आत्मबलिदानं कृतम्।

रणधीर :–आम्। ततः क्रुद्धा म्लेच्छसेना महाराजं सद्यः परिवृत्य युगपत् आहन्तुं प्रावर्तत।

विजयः– अहह! दारुणः खलु प्रसंगः।

रणधीरः– यतः अल्पसंख्याकाः एव सैनिकाः प्रजवचेतकाधिरूढं महाराजं अनुधावितुं नाशक्नुवन्।

विजयः– ततः ।

रणधीरः–चक्रव्यूहगतोऽभिमन्युरिव नः स्वामी समन्युस्तदा,

तस्थौ निश्चलनिर्भयो गिरिरिव स्वासिं विधुन्वन् जवात् ।

एकाकी विनिवारयंश्च युगपत् तीव्रप्रहारान् द्विषां ।

यावच्चंडचमूयुतः समयवित् झालापतिस्त्वागतः ।। १३ ।।

महाराजेन नूनं चक्रव्यूहगतः अपरः अभिमन्युः अद्य आविष्कृतः इव ।

विजयः– वयोभेदवर्जितः प्रायेण सः उपमितः ।

रणधीरः– आम् । अद्य च महाराजस्य अपूर्वं देदीप्यमानं च पराक्रमं दृष्ट्वा, स्वर्गस्थबापारावळ–संग्रामसिंहादीनां ऊर्जस्वलपूजानां अंतः-करणानि साभिमानसंतोषेण उत्पूरितानि इति मन्ये ।

विजय :–अथ किम् । स्वर्गस्थाः पूर्वजास्तु स्वसंततीनां तेजस्विकर्माणि वीक्षितुं सदैव समातुरास्तिष्ठंति इति उच्यते। अद्य बाप्पारावळ- संग्रामसिंहौ विमानाधिरूढौ दृष्टवंतौ महाराजपराक्रमं इति मे तर्कः ।

रणधीर :–ममापि तथैव ।

विजय :–ततः ।

रणधीर :–दारुणं युध्यमानेन झालापतिना अभिज्ञातं न चिरात् यत् महा-राजस्य रक्षणं वेषान्तरं विना अशक्यप्रायमेव ।

विजय :– समरे सेनापतिः सदैव लक्ष्यीक्रियते हि प्रतिपक्षीयैः । यतः-छिन्ने स्कंधे विनायासं वृक्षशाखाः पतन्त्यधः ।। अथ ततः किं कृतं झालापतिना ?

रणधीर :–तेन प्रार्थितः महाराजः त्वरया, रहः अन्योन्यवेषधारणाय ।

विजय :–ततः ।

रणधीर :–भूयो भूयोऽनुनीतः महाराजः कष्टेन स्वामिभक्तस्य वेषं परि-धाय आत्मनः तस्मै परिधाय्य, स्वहस्तेन मृत्युमुखे तं अगतिकत्वेन प्रवेश्य, तुमुलयुद्धे, चेतकाधिरूढः अलक्षितः निर्गतः ।

विजय :–अहो ! परिसीमा स्वामिभक्तेः।

रणधीर :–ततो महाराजवेषधारी झालापतिः परिमितसंख्यैः सैनिकैः, शत्रोः असंख्यसैनिकैः सह भीषणं समरं कृत्वा, भूमौ पतितः वीरमरणं च सानंदं आलिंगितवान् । प्रायेण सर्वे अपि तस्य सैनिकाः इदानीं समरभूमौ शेरते। अस्तंगते सूर्यनारायणे, स्थगिते च समरे कतिपये एव मादृशः जीवन्तः निवर्तन्ने सेनानिवासम्।

विजय :–धन्याः स्वामिकृते प्राणान् जुहृवतो ननु सेवकाः ।

विभूतिमत्वमीशस्य त्वीदृशेषु प्रतीयते ॥१४॥

अथ का वार्ता निर्गतस्य महाराजस्य।

रणधीर :–ज्ञास्यावः नचिरात् ।

स्वनिवासं तावन्निवर्तावहै । [निष्क्रांतौ ।]

[**प्रवेशः ६**]

[नदीतीरम्–अतिश्रमेण मरणोन्मुखः प्रतापस्य प्रियोऽश्वः चेतकः भूमौ निपतितः । तं तादृगवस्थायां विलोक्य प्रतापः तमुद्दिश्य भाषते ।]

प्रतापः– अहह ! प्रिय चेतक, अतिश्रान्तेन अपि त्वया शत्रोः ग्राहात् मां मोचयितुं, नदीपारं कृत्वा, स्वयमेव करालकालस्य ग्राहः इदानीं सुखं आलिंग्यते । स्वामिनिष्ठायाः परां कोटिं खलु अद्य अधिरूढोऽसि । तिष्ठ तावत् । नद्याः जलं आनीय त्वां पाययामि तत् । [तीरं गत्वा उत्तरीयं आर्द्रीकृत्य तद् हस्तेन संपीड्य शनैः शनैः चेतकमुखे जलं स्रावयति] अयि ! उज्जीवितः इव दृश्यसे जीवनप्राशनेन । सार्थं खलु जीवनमिति नाम जलस्य । जीवनसाफल्यस्य निरतिशयः आनंदः तव मुखे देदीप्यते । (पृष्ठं स्नेहेन निपीडयति) हन्त ! एकवारं साश्रु-दृष्ट्या मां अवलोक्य, मूकं आपृच्छय इव निर्गतोऽयम् । निर्वाणपूर्वं दीपज्योतेः प्रज्वलनमिवैव उज्जीवनं अस्य आसीत् जलप्राश-नोत्तरम्। (चेतकपृष्ठे शोकावेगेन निपतति, क्षणेन उत्तिष्ठति

विलपति च) रे जीवनसहचर, त्वादृशः स्वामिनिष्ठः सेवकः भूयोऽवाप्तुं अशक्यप्रायमेव। मूकोऽपि त्वादृशः पशुः समयं जानाति स्वामिनिष्ठां च अव्यभिचारिभावेन रक्षति आमरणम्। बुद्धिमत्स्वपि मानवेषु ईदृशी स्वामिनिष्ठा विरलैव दृश्यते।

वयस्य, कथन्वहं तवानृण्य संपादयिष्ये। त्वत्स्मारकविरचनमेवात्र अनन्यः उपायः। तच्चिरकालं प्रथयतु ते सेवां, स्फूर्तिं च ददातु मानवाय मूकप्राणिनम् अनुकर्तुम्।

सारमेयहयौ लोके त्वेकनिष्ठौ नृसेवकौ।
समयेऽतिशयाते तौ सहोदरमपीक्ष्यताम्॥ १५॥

हा! रक्तेन बद्धोऽपि शाक्तसिंहः मया सह कलहं कृत्वा अरेराश्रयं गतः। कियान् विरोधः पशुमानवयोः।

[अश्वखुराणां टप्टप् ध्वनिं दूरात् श्रुत्वा निरीक्षितुं प्रयत्य च]

अयि! कोऽनु स्यादयम्। शाक्तः? निःसंशयं बंधुहतकः शाक्तः। चेतकेन प्राणपणेन रक्षितं मां निबद्धुं, तदशक्यं चेत् हंतुं, मदीयप्रेतं च म्लेच्छाधिपाय समर्प्य भव्यं पारितोषिकं अवाप्तुं प्रायेण सः ईहते। ईहताम्। नाद्यापि मृतः प्रतापः। यावत् बिन्दुरपि रक्तस्य अवशिष्येत तावत् योत्स्येऽहम्। (युद्धाय सिद्धो भवति) एहि दुरात्मन् शाक्त! एहि गृहाण च मे प्रहारम्।

शाक्त :-(अश्वादवरुह्य असिं प्रतापस्य अग्रे निधाय शिरः तच्चरणयोः आनमय्य च) क्षम्यताम् अग्रज क्षम्यताम्।

प्रतापः-(साश्चर्यम्) किमिदम्? दिल्लीशप्रसादनाय मज्जिघांसया त्वमिह धावन्नागतः इति मया कल्पितम्।

शाक्तः- कृपया मां अन्यथा मा मन्यस्व। तव साहाय्याय ह्यागतोऽस्मि म्लेच्छनिर्दलनार्थम्।

प्रतापः- अपि सत्यम्?

शाक्तः- सत्यमेव। शपामि भगवतः एकलिंगस्मरणेन।

प्रतापः– (सानंदम्) एहि, वत्स एहि (सस्नेहं आलिंगति) किं कारणं दिल्लीशसेवात्यागस्य ।

शाक्तः –अद्यतनस्य तव अपूर्वपराक्रमस्य साक्षाद्दर्शनेन अतीव प्रीतोऽभवम् । अंतश्च प्रस्फुरितं यद् ईदृशप्रतापवन्तं स्वधर्मस्वदेशाभिमानिनं अग्रजं त्यक्त्वा शत्रोराश्रयेण घोरपातकभागेव भवेयम् । अतः पश्चात्तापदग्धेन हृदयेन विस्मृतवैरः तव साहाय्याय कृतनिश्चयः सन्, प्रथमं त्वां ग्रहीतुं अनुधावन्तौ पठाणौ प्रजवं अभिद्रुत्य, हत्वा च तौ, तव अभिनंदनाय, नैव तु तव घाताय, आगतोऽस्मि । भण, 'अंगीकृतः पश्चात्तापदग्धः अनुजः' इति ।

प्रतापः–(सबाष्पम्) अंगीकृतः पुनश्च पश्चात्तापदग्धः अनुजः, प्रतापी अयं शाक्तसिंहः । भ्रातः, पश्य तावत् विलसितं विधेः । हयोत्तमः गतः, परं अनुजः प्राप्तः । एकाकी अयं प्रतापः समर्थमपि दिल्लीश्वरम् अद्यावधि अवागणयत् स्वस्वरक्षणे, किं पुनः प्रबलीकृतः सिंहोपमेन सहोदरेण शाक्तेन । एहि भ्रातः, प्रथमं प्रणमावः अमुं एकनिष्ठं हुतात्मानं मूकपशुम् । (उभौ प्रणमतः) प्रिय चेतक,

वाहनं भगवद्विष्णोः सेवार्थं मे हयोत्तम ।
वृषो वा वृषकेतोस्त्वं शापात् किंतु गतोऽश्वताम् ॥१६॥
सोदर, अस्य अत्र स्मारकं रचयित्वैव निवर्तावहै

शाक्तः–उचितमेव ।

प्रतापः–इदानीं भगवन्तं एकलिंगं एवं प्रार्थयावहै–

[उभौ बद्धांजली प्रार्थयतः]

ऐक्येनैव कुटुंबिनां ननु सुखं कृच्छ्राच्च संरक्षणं,
राष्ट्रस्यापि तथैव पक्षकलहाद् देशो द्विषाक्राम्यते ।
प्राप्ते विद्विषि पांडवा इव 'वयं पञ्चाधिकं वै शतं'
इत्येवास्तु मतिः क्रियापि भगवन्नोऽन्ते जयश्चोज्ज्वलः ॥१७॥

मृत्तैलव्यानम्

नारायणकथा

कल्याणे मृत्तैलदुर्भिक्षे सति 'मृत्तैलम् आगतम्' इति वार्तां श्रुत्वा बालाः द्रव्यं पात्राणि च गृहीत्वा अधावन्। सः संध्यासमयः आसीत्। कस्याश्चित् बालिकायाः माता कन्याम् अनुसर्तुं प्रायतत। परं विलंबितासा नाशक्नोत् मिलितुं बालवृंदम्। तत्तु विक्रीणत् तैलापणं निश्चयेन अजानत् संभ्रांतचित्तं चत्वरे संचरत् द्रव्यहस्तं च दिष्ट्या अवलोकनपथम् आगतं कस्यचित् तुंदिलस्य। सः पुरः सृत्वा तेभ्यः तैलदापणम् आश्वास्य द्रव्यम् आदाय स्वानुगमनं च आदिश्य सत्वरं गत्वा सरिति उपमार्गम् (LANE) आविश्य अंतर्दधे। ततः कश्चित् सज्जनः तत् बालवृंदं मार्गभ्रष्टम् अभिज्ञाय पृष्ट्वा तत् गृहं प्रापयितुम् आश्वासयामास। मध्यमार्गे तु स्वं मृगयमाणं स्वगृहजनं दृष्ट्वा आनंदितं तद् वृंदं तम् अनुसृत्य गृहं निवर्तितुम् उद्यतम् इति ज्ञात्वा सज्जनं कृतकार्यः स्वमार्गम् अन्वगच्छत्। गृहस्वामिनाम् आगमनपूर्वम् एव बालाः सुरक्षिताः प्राप्ताः गृहमिति मोदमानाः गृहिण्यः मोदकानि वितरंति।

अमृतलता - ऑगस्ट १९५५
पारडी

क्र० ४

बालोचिता लघुनाटिका

श्री विश्वनाथ केशव छत्रे

मृत्तैलाख्यानम्×

[एका सत्यघटना]

पात्राणि—

बालिकाः

१ लता
२ सुधा
३ अलका
४ सुनीता
५ नन्दा
६ अञ्जनी
७ माता- (सुधायाः)
८ राधा- (सुधामातुः सखी)
९ मारुतिः- सामान्यवेषः लुंठकः
१० विश्वासरावः- सज्जनः पथिकः
११ भास्करः- प्रतिवेशी युवकः
१२ मंदा- सुधामातुः प्रतिवेशिनी

(सूर्यास्तसमयः । गृहप्रांगणम्)

[सुधा सानन्दं सत्वरं च नृत्यन्ती गृहं प्राप्नोति, द्वारे लतां दृष्ट्वा···]

सुधा— अयि लते, मृत्तैलमागतम् ! मृत्तैलमागतम् !
लता— अपि सत्यम् ?
सुधा— अथ किम् ।
लता— कुत्र आगतम् ?
सुधा— गान्धीचत्वरे । अहं तावत् मातरं उपसर्पामि । क्रयणाय धनं गृह्णामि पात्रं च गृह्णामि । सत्वरं गच्छामि ।

× मृत्तैलं- मिट्टी का तेल इति हिन्दीभाषायाम् ।

लता— सखे, अहमपि त्वां अनुसरामि । तिष्ठ तावत् । पृच्छामि जननीम् ।

सुधा— कुतोऽवसरः । विलम्बो माऽभूः । मया प्रथमं गन्तव्यम् । अन्यथा तैलं नावशिष्येत यावन्मे गमनम् ।

लता— स्थाने खलु ते भयम् । अहमपि त्वरां करोमि । द्वारे एव त्वां मिलामि । एकीभूय गच्छावः ।

सुधा— शोभनम् । निर्गताम्सि ।

[इति निष्क्रान्ता]

लता— (उच्चैः घोषयन्ती नृत्यन्ती च सत्वरं समोदम्) मृत्तैलमागतम् ! अयि ! मृत्तैलमागतम् । मातरं गत्वा धनं गृह्णामि । पात्रं गृह्णामि । प्रथमं आपणं गच्छामि । सर्वप्रथमं गच्छामि ।

[प्राङ्गणे क्रीडन्त्यः बालिकाः एनां घोषणां श्रुत्वा क्रीडायाः विरताः लतां परिवृत्य पृच्छन्ति ।]

अलका— कुत्र आगतम् । कुत्र आगतम् । शीघ्रं ब्रूहि ।

सुनीता— शीघ्रं ब्रूहि । मयापि क्रेतव्यम् ।

नन्दा— मयापि क्रेतव्यम् । ब्रूहि शीघ्रम् ।

लता— गान्धीचत्वरे । त्वरध्वं यदि मां अनुगन्तुं इच्छथ । सुधया सह अहं गच्छामि ।

नन्दा— सखे, द्वारे मां प्रतीक्षस्व । अम्बां पृच्छामि ।

सुनीता— अहमपि पृच्छामि ।

अलका— अहमपि पृच्छामि । तिष्ठ द्वारे ।

[सर्वाः निष्क्रान्ताः]

(२)

सुधा— (गृहं प्रविश्य ससम्भ्रमम्) अम्ब ! धनं देहि । सत्वरं देहि ।

माता— किमर्थं धनम् ? वद । कुतः तेऽयं सम्भ्रमः ?

सुधा— धनं देहि । पात्रं देहि । सत्वरं देहि । विलम्बो माऽभूः ।

माता— वत्से, किमर्थं धनं पात्रं च ?

सुधा— अयि ! मृत्तैलार्थम् । अपि न मया कथितम् पूर्वमेव ?

माता— जाते, नैव कथितम् । कुत्र आगतम् ? त्वरस्व तेन ।

सुधा— गान्धीचत्वरे आगतम् ।

माता— तिष्ठ तावत् । ददामि धनम् । गृहाण अष्टाणकमेतत् । अथवा, गृहाण इदं रूप्यकम् । अधिकाधिकं क्रीणीहि ।

सुधा— पात्रम् ? स्थाने तु न दृश्यते ।

माता— हूं ! आर्यावत्सलया नीतं परेद्युः न प्रत्यर्पितम् । धिग् दुर्व्यवहारं लोकस्य। (क्षणं विचिन्त्य) किं करिष्यसि इदानीम् । नय तद् दुग्धपात्रं+ विशेषं मुष्टिसंयुतं सावरणं च । पश्य, कथं शुद्धीकृत्य रक्षितं तत् समये कार्यं साधयति ।

सुधा— अयि ! तन्नागदन्तावलम्बि । नाहं पारयामि तद् हस्तगतं कर्तुम् ।

माता— वत्से, पादपीठं× गृहाण । किं न पश्यसि मां पाकक्रियाव्यापृताम् ?

[द्वारात् बहिः बालानां कलकलः— 'सुधे त्वरस्व, सर्वाः अपि सिद्धाः द्वारे प्रतीक्षन्ते त्वाम् । त्वरस्व']

सुधा— हा ! अम्ब, पादपीठं न दृश्यते । आः ! मालत्या आर्यया नीतं न प्रत्यर्पितम् ।

माता— धिग् ऋणार्थिनम् ! आगतास्मि स्वयं पात्रोद्धरणाय [उद्धृत्य ददाति, नेपथ्ये, सुधे त्वरस्व । निर्गच्छामः]

सुधा— अम्ब, गतास्मि । [निष्क्रान्ता]

माता— परं, वत्से, सायं समयः अयम् । कस्य अपि प्रौढस्य समागमः अवश्यः । कोऽधुना उपलभ्यः । न कोऽपि । अहमेव द्रुतगत्या अनुसरामि । का गतिः । [प्रस्थिता द्वारं पिधाय ।

माता— [प्रतिवेशिवातायनात्] अयि ! आर्ये मन्दे, द्वारं पिधाय अनुसरामि बालिकाः, अवधेयम् ।

मन्दा— [अभ्यन्तरादेव] आम् ।

[निष्क्रान्ता सुधामाता]

× × ×

[माता नचिरात् सचिन्तं निवृत्य]

माता— हन्त ! दृष्टिपथादतीताः सर्वाः बालिकाः । किं भवति न जाने । भगवन्, परित्रायस्व सुधाम् । परित्रायस्व सर्वाः अल्पवयस्काः ।

राधा— [प्रविश्य] नमस्ते । अपि कुशलं ? हा ! चिन्ताकुलता प्रतीयते मुखमंडले ।

माता— हूं ! अस्मिन् संध्यासमये सुधा गता बालिकाभिः मृत्तैलक्रयणाय [illegible]धी-चत्वरम् । न कोऽपि प्रौढः संगतः । अतः चिंताकुलत्वम् ।

राधा— अलं चिन्तया । भगवान् सर्वेषां रक्षकः । सङ्घशक्तिश्च बलीयसी स्वर-क्षणं करोति । अत्रभवती तापनलिका卐 मां ऋणीकृत्य अनुगृह्णातु ।

माता— तापनलिका ? कः ज्वराभिभूतः ?

राधा— भर्तृपादाः गतरात्रेः अति अस्वस्थः चण्डज्वरेण ।

माता— आम् । ददामि भवत्यै एव अकुटिलवृत्त्यै ।

+ वरणी = अल्युमिनम–धातोः । × स्टूल । 卐 थर्मामीटरं ।

[कपटात् निष्कास्य निरावरणां विदधती, भुजङ्गदर्शनादिव भयचकिता] हन्त ! भग्नैषा ! कदा–कथं–केन ! तर्कयामि, न हि निश्चयेन वक्तुं शक्नोमि यत् प्रातः जोशी–वासुना प्रत्यर्पिता, सा भग्नावस्थायां एव इति। अहो धाष्ट्र्यम् ! अहो अदाक्ष्यम्। यत् ईदृशं भङ्गुरं बहुमूल्यं ऋणेन च गृहीतं वस्तु अल्पवयस्कहस्तेन प्रत्यर्प्यते।

राधा— दिष्ट्या रक्षितास्मि। अन्यथा अनुपयोजिता अपि सा तापनालिका मया एव मम गृहे भग्ना– इति दोषेण वृथा अवलिप्ता अभविष्यम्।

माता— पृच्छामि तावत् आर्यां आनन्दीं यदि भग्ना एव नालिका बुद्धिपुरःसरं वासुहस्तेन प्रहिता, वा तेन मध्येमार्गं सजिज्ञासं उद्घाटयता भग्ना इति।

राधा— अवश्यम्। एवं ऋणं त्याज्यं खलु सर्वैः उपायैः।

माता— दृश्यतां तावत्—

ऋणे न दत्ते जनता सरोषा
दत्तं पुनर्नाप्य तु दातृहानिः।
उत्तेज्यतेऽर्थी पुनरर्पणेन
धिग् धिग् ऋणं, यत्समयेऽत्यवश्यम्॥

राधा— सुष्ठु। साधयामि। [निष्क्रान्ता]

माता— को नु खलु प्रेषयितव्यः सुधादिबालानां संरक्षणाय। [आयान्तं भास्करं वीक्ष्य] भास्कर, यथागतः सत्वरं गांधीचत्वरं गच्छ।

भास्करः— केन कारणेन ?

माता— सुधादयः चतुष्पंचबालाः गताः मृत्तैलक्रयणाय। ताः अन्विष्य शीघ्रं प्रत्यानय विनापि तैलम्।

भास्करः— इमानि पुस्तकानि गृहे निधाय भवत्याः निदेशे स्थास्यामि।

[निष्क्रान्ते स्वस्वकोष्ठम्]

(४)

[गान्धीचत्वरे चतुष्पंचाः सुधादयः बालाः पात्रपाणयः सम्भ्रान्ता इव मिलिताः परस्परं संवदन्ति सकलकलम्।]

लता— सुधे ! आपणस्तु न लभ्यते। किं करवाम।

अलका— कुतः तैलवार्ता श्रुता ?

लता— सुधया श्रुता। कुतः सुधे ?

सुधा— गृहं निवर्तमाना अशृणवं वर्त्मनि ' मृत्तैलमागतम् ' इति।

सुनीता— वयं वञ्चिताः खलु। गृहं निवर्तामहे। अन्धकारः प्रसृतः, भीतास्मि।

लता— अहमपि। परं को नु मार्गः ? कुतो गन्तव्यम् ?

मारुतिः— [सुदूरात् कलकलायमानं सम्भ्रान्तकरेषु रिक्तानि घृतैलपात्राणि मुष्टिषु च धनं धारयत् बालवृन्दं निरीक्ष्य, स्वगतं] दिष्ट्या सुवर्णमन्त्रिणः प्राप्तो मनोरथः। इदं बालवृन्दं अपरिज्ञातं सम्भ्रान्तं द्रव्यहस्तं दृश्यते। पृच्छामि तावत्— साधयामि च (पुरतः उपसर्प्य) वत्साः, अपि घृतैलं इच्यते युष्माभिः।

लता— आम्। कुत्र विक्रीयते। तदर्थं एव परिभ्रमणं कुरुमः।

सुनीता— दिष्ट्या मारुतिः साहाय्याय आगतः। तं प्रार्थयमाना आसम्।

मारुतिः— (स्वगतम्) अयि! कथं अनया मम नाम अभिज्ञातम्। अलं तावत् संशयेन। स्वकार्यं साधयामि। (प्रकाशम्) अयि द्रव्यम् आनीतम्?

सुधा— (मुष्टिम् उद्घाटय) आम्! आनीतम्।

मारुतिः— दीयतां तावत् सर्वैः मम हस्ते। दापयामि घृतैलम् अनुसरत माम्।

[सर्वाः स्वस्वधनं ददति मारुतये]

सुधा— दिष्ट्या कृतार्थाः निवर्तयिष्यामः।

लता— अयि! पश्य, पश्य सः सजवं गत्वा अन्तर्हितः (सशोकम्) हा! लुंठिताः वयम्।

सुनीता— न तैलं न धनम्। तर्जनमेव अस्मद्दैवे इति आभाति। (साश्रु) मार्गः अपि न दृश्यते गृहस्य।

अञ्जनी— इतः गन्तव्यम्।

नन्दा— न हि, सखे इतः।

सुनीता— अपि निश्चयेन? अन्यथा स्वयमेव संकटांतरं प्रविशाम।

नन्दा— अयि सुनीते! अलं रोदनेन। गच्छामः गृहं शीघ्रम्। पृच्छामः मार्गम्।

[विश्वासरावः बालवृन्दं मार्गभ्रष्टं इति ज्ञात्वा पुरःसृत्य]

विश्वासरावः— भोः बालाः! मार्गभ्रष्टाः प्रायः यूयम्। अपि सत्यम्?

नन्दा— आम्। सिद्धेश्वरसमीपं वसामः। मार्गं दर्शयतु भवान्।

विश्वासरावः— अनुगच्छत माम्। अपि घृतैलार्थं यतमानाः मार्गभ्रष्टाः?

लता— आम्। केनापि धूर्तेन लुण्ठितं अस्माकं धनं तैलदापनमिषेण। तथा मा भवतु।

विश्वासरावः— अभिजानामि वः सर्वाः प्रायः। सुनीता सा गुणैगुरुवर्याणां कन्या। अपि सत्यम्?

सुनीता— सत्यम्।

सुधा— तेन विस्रब्धाः वयम्। अस्माकं विलम्बितेन प्रत्यागमनेन मार्गणाय केऽपि भ्रममाणाः स्युः। अयि! भास्करः एव सः आभाति। रे भास्कर! (उच्चैः लता-मन्दा-नन्दाभिः सह) अत्र वयं, भास्कर।

भास्करः— (बालिकाः अभिज्ञाय) सुधे, लते, युष्मान् मृगयितुं सुचिरं भ्रमित्वा इतः आगच्छम् । बालाः त्वरध्वं सर्वे गृहम् । गृहिण्यः चिन्ताकुलाः धावन्ति इतस्ततः । पृच्छन्ति पथिकान् । प्रार्थयन्ते परमेश्वरम् ।

सुनीता— भास्कर ! लुण्ठितं धनमस्माकं केनापि धूर्तेन ।

भास्करः— अलं चिन्तया । प्राणेषु रक्षितेषु का कथा द्रव्यहानेः ।

विश्वासरावः— बालाः, लब्धः स्वजनः युष्माभिः । अतः न ममागमनप्रयोजनम् । साधयामि ।

भास्करः— }
बालिकाः— } अनुगृहीताः स्म ।

[निष्क्रान्तः विश्वासराव एकतः, अन्यतः भास्करेण सह बालिकाः]

(५)

[सर्वाः बालिकाः भास्करेण सह गृहं प्रविशन्ति । सर्वत्र चिन्तामुक्तेः आनन्दः प्रतीयते ।]

माता— भास्कर, इदं रूप्यकं गृहीत्वा मोदकानि आनय आपणात् । प्रथमं श्री हनूमते द्वयं समर्प्य वितर सर्वेभ्यः ।

भास्करः— किमापणप्रयोजनम् ? अस्माभिः प्रातः एव क्रीतानि मोदकानि । तानि आनीय वितरामि ।

माता— शोभनम् ।

सर्वा मातरः— स्वामिनां प्रत्यागमनपूर्वं एव सर्वे बालाः सुरक्षिताः गृहं आययुः इति भगवत्कृपैव । अन्यथा कठिनावस्था स्यात् ।

[भास्करः मोदकानि वितरति]

माता— अस्यापत्तेः कारणं मृत्तैलदुर्भिक्षम् ।

भास्करः— तस्य कारणं सर्वकारः एव ।

मन्दा— आर्य सर्वकारः तु अस्माकं एव, अस्माभिः निर्वाचितानां सज्जनानाम् । किं दोषारोपेण सिध्येत । तेभ्यः सुबुद्धिं दातुं श्रीगणेशं प्रार्थयामहे ।

[सर्वे प्रार्थयन्ते]

शस्यं तैलं गृहमथ गुडः शर्करा वस्त्रपात्रम्
यद्यद्वस्तु प्रथममिह नो जीवनावश्यमेव ।
तत्तन्नित्यं भवतु सुलभं स्वल्पमूल्येन चैव
तत्प्रीत्यर्थं, गजमुख, सदा प्रेरयास्मद्विनेतॄन् ॥
छत्रेवंशेऽधिगतजनिना विश्वनाथेन नाट्यं
सत्याधाराद्विरचितमिदं देववाचोऽभिवृद्ध्यै ।
बालैर्नाट्यप्रणयिजनताग्रेऽभिनीयोद्यमेन
कश्चित्तस्याः प्रथयतु सुधामाधुरीयुक्ततेजः ॥

नंदिनी वरप्रदानम्

नाट्यकथा

सूर्यवंशसंभवः राजा दिलीपः सर्वविध सुखसंपन्नः अपि संतानविहीनतया चिरं शोचन् अंते भार्यया सुदक्षिणया सह कुलगुरुं वसिष्ठं शरणं गच्छति, स्वमनोव्यथां च निवेदयति। तदा क्षणं ध्यानमग्नः भूत्वा वसिष्ठः राज्ञः प्रजावरोधकारणम् अभिज्ञाय राजानम् उवाच। "पुरा शक्रकार्यं कृत्वा भुवं प्रति गच्छता त्वया मार्गस्थिता सुरभिः नादृता। अतः शप्तोऽसि तया कृतावमानात्। गेहागमनोत्सुकः पत्नीविषयके विचारमग्नः सः विषयांधः मार्गस्थितामपि तां नापश्यत् न च तत्र अनमत् इति वस्तुस्थितिः आसीत्। "अथ कः उपायः" तां प्रसादयितुम्? राजा अपृच्छत्। "तत्क्षणे द्वारम् उपसर्पन्तीं सुरभि-कन्यां नंदिनीं दृष्ट्वा वसिष्ठः तां प्रति अंगुलिनिर्देशं कुर्वन् प्रत्यवदत् "इमां सेवस्व अस्य भार्यया सह वन्यवृत्त्या निवसन् त्वं, तत्प्रसादप्रत्ययपर्यंतम्"

स्वसेवकान् विसर्ज्य राजा पत्न्या सह यथादिष्टः वसिष्ठाश्रमे न्यवसत्। गोशालायामेव स्वपित्वा एकैकेन क्रमेण जागरित्वा कंडूयनेन, तृणदानेन मूत्रपाशयनेन च गोमयानेः सारणेन, जलपायनेन च तौ ताम् असेवताम्

प्रातः पीतप्रतिबद्धवत्सां तां वनाय मोचयित्वा अनुगम्य सर्वभावेन रक्षंतौ आदिनान्तं तत्परिचर्यामग्नौ आस्ताम् । सायं तया सहैव आश्रमं प्रत्यागच्छताम् ।

एवम् एकविंशति दिनेषु व्यतीतेषु नंदिन्या राजानं परीक्षितुं माया विरचिता हिमगिरिशोभादर्शनमग्नः राजा तस्याः आक्रंदनं सहसा श्रुत्वा यावत् परिवृत्य पश्यति तावत् सा उग्रसिंहाभिभूता अदृश्यत । सक्रोधं सः तूणीरात् इषुं उद्धर्तुं यावत् प्रायतत तावत् तेन अनुभूतं यत् स्वबाहुः स्तब्धवीर्यः प्रतिबद्धश्च । तेन विवृद्धमन्युं विस्मितं राजानं सिंहः मनुष्यवाचा आह - शिवस्य किंकरोऽहं तत्प्रभावाच्च एवं निर्वीर्यः संवृत्तः । आदिष्टोऽस्मि अस्योपगतं सत्त्वं खादितुम् । तदाकर्ण्य राजा प्रार्थयत धेनुं मुक्त्वा आत्मानं खादितुम् । बहुप्रकारेण राजानं धेनुमोचने निवर्तने च अनुनीयापि स्वात्मार्पणे निर्बंधपरं तं दृष्ट्वा नंदिन्या माया अपसारिता उक्तं च 'प्रसन्नास्मि वरं वृणीष्व' 'पुत्रम्' इच्छावः' राजाऽऽह । 'तर्हि पत्रपुटे मां दुग्ध्वा पयः भुंजाथाम्' नंदिनी अवदत् । 'अंब वत्सः प्रथमं पयः पिबतु, गुरोः होमावशिष्टं सिद्धं तां, पश्चात् दुग्धं पास्यावः' अधिकं प्रीता नंदिनी अब्रवीत् 'तथास्तु' । नृपेण यथादिष्टे कृते पत्न्या सह, सा नाचिरात् गर्भम् आधत्त यथाकालं प्रसूता च पुत्रं लेभे । सः रघुः स्वजातां वंशम् अख्यापयत् ।

नंदिनीवर प्रयोजन

पात्राणि

१ सुदक्षिणा - राज्ञी
२ दिलीपः - राजा
३ द्वारपालः
४ पुष्पा
५ लता
६ मीना
} वसिष्ठाश्रमकन्याः
७ वसिष्ठः राजकुलगुरुः
८ नंदिनी - सुरभिकामधेनुवत्सा
९ सिंहः

मुंबई-नभोवाणीवः स्वानिशेषेवाद
दि. १४-८-१९६६

श्री विश्वनाथ केशव छत्रे शास्त्री

नन्दिनीवर-प्रदानम्

*

[स्थलं— राजप्रासादस्य अन्तःपुरम्]

(ततः प्रविशति खिन्नवदना राज्ञी सुदक्षिणा)

सुदक्षिणा— (दीर्घं निःश्वसन्ती)– हे भगवन् ! धिगेतद् वन्ध्यात्वं, मम नारीदेह-धारिण्याः ! धिगैश्वर्यम् ! धिग् राज्ञीपदम् ! यतो हि—

वरं प्राणत्यागः खलु, न निरपत्यत्वमवनौ
वरं निर्द्रव्यत्वं, वरमपि च दुःखं रुगुदितम् ।
वरं वासोऽरण्ये हिमगिरिगुहायामपि सुखम्
न वन्ध्यात्वं लोके दहति यदखण्डं तु हृदयम् ॥ १ ॥

कुसुमं विना लता, फलं विना पादपः, स्वामिनं विना गृहं तथैव संततिं विना स्त्री। निरर्थकं तस्याः जीवनम् । नाद्यावधि वन्ध्यात्वदुःखं तथा मम हृदयं अविध्यत्, यथाद्य पुत्रवत्याः निर्धनस्त्रियः दर्शनेन । जीर्णवस्त्रा सा रुचिरं वस्त्रहीनं स्वबालकं प्रेम-भरेण लालयन्ती स्तनपानं च कारयन्ती राजमार्गे मम दृष्टिपथं आगता । गृहरत्नानि बालकाः—

धन्यास्तदङ्गरजसा मलिनीभवन्ति ।

इति सुभाषितकाराः अपि बालसुखं वर्णयन्ति । पुरुषाः स्त्रीणामपेक्षया प्रायः कठिनहृदयाः—

[ततः प्रविशति राजा दिलीपः]

राजा— पुरुषाः कठिनहृदयाः । नहि नहि, पुरुषाः अपि कोमलहृदयाः सन्ति, परं ते स्त्रीव न रुदन्ति । स्वदुःखं धैर्येण निरुध्य, बाष्पद्वारा मुखश्रीद्वारा च तत् न प्रकटीकुर्वन्ति ।

[राज्ञीनिःश्वासं श्रुत्वा बाष्पपूर्णनयने च दृष्ट्वा] अयि ! किमर्थं एते निःश्वासाः । किमर्थं अश्रूणि । कथय, कथय, शीघ्रम् ।

राज्ञी— पत्न्याः दुःखं पत्या अभि- ज्ञातव्यम् । किं तत्कथनप्रयोजनम् ।

राजा— नाहं ज्योतिर्विद् । कथं अभिज्ञातुं शक्यम् ? स्वरूपं कथय तावत् । ततः तर्कयामि ।

राज्ञी— शोभते केन धेनुर्वा, समृद्धं सर्वशो गृहम् ।
नाथ, भर्तृमती स्त्री वा तन्मे दुःखस्य कारणम् ॥ २ ॥

राजा— आः ! ज्ञातम् । प्रिये, पुत्रार्थं त्वं समातुरा !

राज्ञी— आम् । किं नु करवाव अधुना । बहूनि व्रतानि अनुष्ठितानि, दानानि दत्तानि, देवताः आराधिताः, यज्ञयागाश्च कृताः, परं नेष्टं फलं लब्धम् ।

राजा— (क्षणं विमृश्य) इदानीं गुरुः एव शरणम् । तदाज्ञा एव प्रमाणम् । गच्छाव अद्यैव । शुभस्य शीघ्रम् ।

राज्ञी— शोभनम् ।

माता गुरुश्च वैद्यश्च, सर्वथा शरणं नृणाम् ।
व्यथा चेत्कथिता तत्र, लभ्येतोपाय आर्तिहा ॥ ३ ॥

राजा— कः कोऽत्र भोः ?

द्वारपालः— (प्रविश्य प्रणम्य च) निवेद्यतां तावत् अभीष्टसेवा ।

राजा— श्रीवसिष्ठाश्रमं गन्तव्यम् । सत्वरं रथः आनीयताम् ।

द्वारपालः— यथाज्ञापयति महाराजः ।

[सर्वे निष्क्रान्ताः]

(२)

[वसिष्ठाश्रमः, आश्रमकन्याः द्वाराद् बहिः आगत्य परस्परं संवदन्ति]

पुष्पा— अयि लते ! रथध्वनिः श्रूयते ।

लता— महाराजः आगच्छति प्रायेण ।

मीना— चिरेण खलु आगमनं महाराजस्य ।

लता— (निरीक्ष्य) सखे, महाराज्ञी अपि रथे दृश्यते ।

मीना— किमपि विशेषं कारणं स्यात् ।

पुष्पा— अचिरादेव ज्ञातं भवेत् ।

[राजा रथात् अवतीर्य राज्ञीं हस्तेन अवतारयति]

वसिष्ठः— (पुरः उपेत्य) (सस्मितम्) सुस्वागतम् (उभयोः प्रणामं स्वीकृत्य) स्वस्ति उभयोः । अंतः प्रविश्य स्वं स्वमासनं अलङ्क्रियताम् । (तथा कृते) हस्तौ पादौ च प्रक्षाल्य शीतोदकं प्राश्य श्रमपरिहारः क्रियताम् ।

राजा— गुरुचरणदर्शनेनैव श्रमपरिहारः नूनं सञ्जातः । तथापि गुर्वाज्ञायां तिष्ठावः । (तथा अनुतिष्ठतः)

वसिष्ठः— अपि सर्वशः क्षेमम् ?

राजा— आम् । भवदग्निहोत्रेण पर्जन्यः काले वर्षति । भूमिश्च धनधान्यफलसमृद्धा । प्रजा सुखं शेते । भवदीयमन्त्रसामर्थ्येन युयुत्सवः रिपवः प्रस्थाने एव गलितोत्साहाः भवन्ति । परम्—

वसिष्ठः— किं परम् ? अलं संकोचेन ।

राजा— इयं भवत्स्नुषा (वधूः) शोचती अनपत्यत्वं पुत्रार्थं सर्वे उपायाः विफलतां गताः ।

वसिष्ठः— (सचिन्तं) ज्ञातम् । स्थाने एव सा शोचति । तिष्ठ तावत् । ध्यात्वा निरीक्षे प्रजाप्रतिबंधकारणम् । (कतिपयनिमेषानन्तरं ध्यानं विसृज्य) राजन्, अभिज्ञातं कारणम् । (राजा राज्ञी च सोत्कण्ठं शृणुतः)



पुरा, शक्रकार्यं कृत्वा भुवं प्रति यास्यता त्वया मार्गस्थिता सुरभिः नादृता । अतः शप्तोऽसि तया कृतावमानात् ।

राजा— न स्मरामि सा दृष्टेति ।

वसिष्ठः— गेहागमनोत्सुकस्त्वं पत्नी- विषयकविचारे निमग्न आसीः । अतः सम्मुखस्थितापि सा न दृष्टा, यतः—

व्यग्रेऽथ चित्ते पुरतः स्थितोऽपि
नायात्यहो ! दृष्टिपथं पदार्थः ॥

राजा— धिङ्माम् ! पूजार्हावमानिनम् । ललाटलेखो ह्यनिवारणीयः । भगवन् ! कीदृशः शापः । शापोऽपि स्यात् कारुणिकायाः तस्याः ?

वसिष्ठः— शृणु-

अवजानासि मां यस्मात्तस्मात्ते न भविष्यति ।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ॥ ४ ॥

राजा— हन्त ! पूज्यपूजा व्यतिक्रमः एवं श्रेयः प्रतिबध्नाति, उपदिशतु भगवान् इदानीं किं कार्यमिति ।

वसिष्ठः— सपत्नीकः अत्र वन्यवृत्त्या वसन् सुरभेः कन्यां नन्दिनीनाम्नीं सेवया प्रसादय। आर्य ! पश्य सा वनात् प्रत्यागच्छति । नामोच्चारणे एव सा दृष्टा, अतः युष्मत्कार्यसिद्धिः नातिदूरा इति मन्येथाम् ।

राजा— गुरुकृपाभाजां किमलभ्यम् । (द्वारोपस्थितां नन्दिनीं प्रणमतः राजा राज्ञी च पुरः गत्वा ।)

(धेनुरपि सस्नेहं पश्यति राजदम्पती)

× × ×

(३)

(रात्रौ फलदुग्धाहारसेवनोत्तरम्)

(ततः प्रविशन्ति वसिष्ठः राजा राज्ञी च)

वसिष्ठः— राजन्, नन्दिनीसेवा सद्यः एव आरभ्यतां उभाभ्यां प्रतिनिवर्तन्तां तव सेवकाः ।

राजा— यथाज्ञापयन्ति गुरुचरणाः । मन्निदेशात् सेवकाः निवर्तन्ताम् ।

वसिष्ठः— प्रातः ते गमिष्यन्ति । शृणुतं इदानीं सेवाविधिक्रमम् ।

राजा राज्ञी च— अवहितौ स्वः ।

वसिष्ठः— रात्रौ गोशालायामेव स्वपितव्यम् । एकैकेन क्रमेण जागरितव्यम् । कण्डूयनेन तृणदानेन, मूत्रपात्रधारणेन, गोमयनिःसारणेन च नन्दिनी सेवितव्या ।

उभौ— आम्, ततः ?

वसिष्ठः— कुक्कुटारावे उषसि श्रुते शय्यां विहाय, प्रातर्विधिं सम्पाद्य, गोशाला सम्मार्जयितव्या, गोमयमिश्रितजलसिञ्चनेन च शुद्धीकर्तव्या ।

उभौ— ततः ?

वसिष्ठः— ततः आर्यया बध्वा नन्दिनी गन्ध–पुष्पाक्षताभिः पूजयितव्या । तदा दोहनानन्तरं वत्सेन पयःपाने कृते, निबद्धे च धेनुः वनाय मोचयितव्या। कतिपय पदानि गत्वा इयं प्रत्यागच्छतु आश्रमम् ।

उभौ— ततः ?

वसिष्ठः— ततः छायेव सा त्वया अनुसर्तव्या ।

प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः ।
निषण्णायां निषीदस्यां पीताम्भसि पिबेरपः ॥ ५ ॥

चलतं, नन्दिनीं कथयामि युष्मन्मनोगतम् । (तस्याः समीपं गत्वा) अयि वत्से ! एतौ जायापती त्वां सेवितुं इच्छतः । अनुज्ञायतां सेवा आप्रसादम् ।

(शिरोऽवधूय नन्दिनी स्वानुमतिं सूचयति ।)

× × ×

(४)

(एकविंशति–दिनानन्तरम्)

(गंगाप्रपातसमीपं, नन्दिनी चरति, राजा च तां उपतिष्ठते ।)

नन्दिनी— सन्तुष्टाहं खलु राजदम्पतीकृतया एकनिष्ठसेवया । गतैकविंशतिदिनानि ताभ्यां निद्रां क्षुधां तृषां वा विगणय्य, मां प्रसादयितुं स्वस्वदेहः भृशं क्लेशितः । राजैश्वर्यं सुखोपभोगांश्च त्यक्त्वा वनेचरौ इव अत्र न्यवसतां ससन्तोषम् । अतः तयोः इष्टकामनां पूरयितुं उत्सुका अस्मि । परम्—

हेम्नः परीक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ।

मायया मत्सङ्कटाभासं निर्माय राज्ञः एकनिष्ठा मुहूर्तं परीक्षितव्या । परीक्षायां उत्तीर्णश्चेत् प्रसादः कर्तव्यः मया इत्येव समीचीनं स्यात् । एतादृशी परीक्षा च परीक्ष्यमाणस्य यशोवृद्धिमेव तनुयात् । तत्र गङ्गाप्रपातान्तः मृदुहरितं नवविरूढं मधुरं तृणं दृश्यते । अतः तत्रैव प्रविशामि मन्दपदैः इतस्ततः चरन्ती यथेष्टम् ।

राजा— (नन्दिनीं प्रपातान्तः प्रविशन्तीं दृष्ट्वा) अयि ! अद्य सा हरितनवतृणाकृष्टा गुहां प्रविष्टा । परं कुतः तस्याः भयं स्यात् ।

सा दुष्प्रधर्षा मनसाऽपि हिंस्रैः
प्रत्यक्षमेनामभिभूय दिव्याम् ।
धेनुं स्वरक्षाविषये समर्थो
स्वयं विशेत् कोऽनु कृतान्तवक्त्रम् ॥ ६ ॥

इमां तावद् हिमनगशोभां पश्यामि । अहो ! निर्मलधवलकार्पासराशीरिव अयं पर्वतः । अस्य गगनचुम्बिशिखराणि । मानदण्डः इव सा मेदिन्याः । परिरक्षकः इव सा भारतस्य उत्तरदिशायाम् ।

[नन्दिन्याः सहसा करुणापूर्णं आक्रोशं श्रुत्वा तां च सिंहाभिभूतां दृष्ट्वा साश्चर्यं ससम्भ्रमं धनुः सज्जीकृत्य तूणीरात् इषुं उद्धर्त्तुकामः बाहुप्रतिष्टंभनं अनुभूय अगतिकः सचिन्तं सक्रोधं च ।]

राजा— हन्त ! किमेतत् सम्भूतम् । कथं नु सः वनराजः एनां स्वावनक्षमां कामधेनुं धर्षितुं प्रवृत्तः । कथं नु सा स्वसामर्थ्यं प्रकटीकृत्य तं न विद्रावयति । हा ! दुर्विधिना कथं अहमपि बाहुष्टंभनेन तद्रक्षणे असमर्थतां प्रापितः । कथं न्वहं धेनुं विना मुनिं उपगच्छेयम् । धिङ्मे क्षात्रतेजः । मन्त्रौषधिरुद्धवीर्यभोगीव अन्तर्दहामि ।

सिंहः— (मनुष्यवाचा)

अलं महीपाल तव श्रमेण
प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्तिरंहः
शिलोच्चये मूर्च्छति मारुतस्य ॥ ७ ॥

अहं भगवतः शङ्करस्य किङ्करः कुम्भोदरनामा। वृषभध्वजेन पुत्रीकृतं अमुं देवदारुं अग्रतः पश्य। सः लालितः पालितः संवर्धितश्च पयःसिञ्चनेन भवान्या। एकदा कण्डूयमानेन वन्यद्विपेन अस्य त्वग् उन्मथिता। तदा गौरीशोकहरणार्थं तरुरूपपुत्ररक्षणार्थं च अहमत्र नियुक्तः पशुपतिना सिंहरूपेण। अङ्कागतानि सत्त्वानि भक्षयित्वा उदरभरणं मया कार्यं इति स्वामिनः निर्देशः। सुचिरक्षुधितस्य मम गुहायां दिष्ट्या सा सुपुष्टा धेनुः आगता। अतः तां भक्षयित्वा क्षुधाशान्तिं करोमि। अलं शोकेन विषादेन च। ईश्वरेच्छा बलीयसी।

राजा— वनराज! हास्यास्पदं खलु संरुद्धवीर्यस्य मादृशस्य वचः। परं भवान् प्राणिनां अन्तर्गतं भावं सम्यग् जानाति। अतः ब्रवीमि। भगवतः शूलपाणेः व्यवस्था मे मान्या। परं गुरुणा न्यासीकृतां इमां धेनुं भवत्क्षुधाशान्तये अनुमत्य कथं मया एकाकिना गुरुपुरतः क्षणमपि उपस्थातुं शक्यम्। लज्जाकलङ्कितमिदं मुखं गुरवे दर्शयितुं न धृष्णोमि। अतः प्रार्थये—

वनराजः— क्षुधिताग्रतः भक्ष्ये प्राप्ते विपरीतप्रार्थना निष्फला एव। निवर्तनं न ते लज्जाकारणम्। यतः 'शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति।'

राजा— परं मदीयदेहेन क्षुधापारणा कर्तुं भवता शक्या। अतः कृपया धेनुः मुच्यताम्। सायं तद्वत्सः सोत्कण्ठं मातरं प्रतीक्षेत। तद्भावनां कल्पयित्वा दयां च कृत्वा विसृज्यतां इयं मुनिधेनुः।

वनराजः— (विकटं विहस्य) राजन्! विचारमूढः खलु त्वं इति मे भाति। एकातपत्रं जगतः प्रभुत्वं, नवं वयः, इदं कान्तं च वपुः, क्षुद्रधेनुकृते त्वं नाशयितुं प्रवृत्तः। अल्पस्य हेतोः यः बहुत्यजति, सः मूर्खः इति बुधाः वदन्ति।

राजा— परं राज्ञा प्राणपणेनापि पाल्यः रक्षणीयः इति नीतिशास्त्रम्।

वनराजः— तव भूतानुकम्पा मे मान्या। त्वत्प्राणार्पणेन एकैव सा सुखं जीवेत्। परं तत्बलिदानेन त्वं जीवन् कोटिसङ्ख्य-प्रजाः उपप्लवेभ्यः पालयिष्यसि। किमधिकं लाभकरम्।

राजा— कथं नु परं गुरुकोपः प्रशमितव्यः?

वनराजः— ईदृशीः कोटिशः पयस्विनीः गाः समर्प्य।

राजा— (नन्दिनीं सकरुणं ईक्षमाणां विलोक्य) इयं न सामान्या धेनुः। सुरभेः अपत्यमिदम्। कामधेनुः सा अलौकिकसामर्थ्यशालिनी। यत् भवता सा इदानीं अभिभूता, तत् रुद्रौजसा एव। यथा भवान् परवशः तथा अहमपि। कथं मया रक्ष्यं विनाश्य अक्षतेन स्वामिनः अग्रे स्थातुं शक्यम्। अन्यश्च, आवयोः संभाषणेन स्नेहसम्बन्धः निर्मितः। अतः मदीयां प्रार्थनां अवमानयितुं भवान् नार्हति। यद्यपि

भवन्मतेन अहिंस्यः अहं तथापि मम नश्वरशरीरमेव भक्षयित्वा, मे यशःशरीरं मम पाल्यं च कृपया रक्षतु भवान् । माधिकविचारेण ।

वनराजः— तथास्तु ।

[सद्यः एव राजा विमुक्तबाहुः भवति, अधोवदनश्च देहार्पणाय सिद्धः तिष्ठति । परं सिंहस्य उग्रनिपातं अवेक्षमाणः सः वियतः विद्याधरहस्तमुक्तया पुष्पवृष्ट्या आव्रियते ।

नन्दिनी— (मन्दमधुरस्वरेण) वत्स उत्तिष्ठ । प्रसन्नास्मि नितरां तव एकनिष्ठभावदर्शनेन । परीक्षितः क्षणं मया मायां निर्माय ।

राजा— (उत्थाय प्रणम्य च) मातः अभिवादये ।

नन्दिनी— वरं वृणीष्व ।

राजा— वंशयशोवृद्धिकरं पुत्रं इच्छावः, राज्ञी तथा अहमपि ।

नन्दिनी— तथास्तु । इदानीं मां पत्रपुटे दुग्ध्वा पयः भुङ्क्ष्व ।

राजा— अम्ब, प्रथमं वत्सः पयः पिबतु । गुरोः होमविधिः सम्पाद्यताम् । ततः तदनुज्ञां अवाप्य एव पयः-प्राशनं मे उचितं भवेत् । क्षन्तव्यः अयं जनः ।

नन्दिनी— धर्ममर्यादापालने तव प्रवृत्तिं तु वीक्ष्य त्वं मे प्रियतरः अभवः । तथास्तु । आश्रमं सत्वरं गच्छावः ।

राजा— जयतु सुरभिपुत्री या दयार्द्रा नतेषु
जयतु च गुरुवर्यो योऽपहन्तापदानाम् ।
जयतु च गुरुवाक्येष्वेकनिष्ठा स्थिरा या
सततमवति शिष्यं शं च तस्यातनोति ॥ ८ ॥

卐 卐 卐

(११) ४

श्री विश्वनाथ केशव छत्रे

☞ कीचक-हननम्

★

[नाट्याचार्यैः कै. काकासाहेब खाडिलकर-महोदयैः महाराष्ट्रभाषायां प्रणीतं 'कीचकवध' नाम बृहन्नाटकं 'महाराष्ट्र-नाटक-मंडली' नाटयति स्म प्रभाविरीत्या अस्य शतकस्य प्रारंभे । परं केनापि-स्वजनेनैव प्रायेण तदानींतनस्य आंग्लशासनस्य कर्णे प्रकटितः तस्य गुप्तहेतुः, यद् 'यथा कीचकेन हठात् धृष्यमाणा सैरंध्री बल्लवेन कपटव्यूहेन तं निहत्य प्रमुक्ता, तथैव शासनेन नितांतं पीड्यमाना भरतभूः, कपटप्रयोगेन पीडाप्रदानां अधिकारिणां हननेन प्रमोक्तव्या, इति प्रेरयति इदं नाटकं जनान् आंग्लशासनद्रोहाय इति' । ततः सद्यः एव अस्य नाटकस्य पठन-नाटनादि प्रतिषिद्धं शासनेन । कालेन, नेतॄणां तद् बद्धमुक्तं दिष्ट्या प्रेक्ष्य सुप्रीतो-ऽहम् प्रभावितश्च सुचिरं, इमां नाटिकां स्वतंत्ररीत्या रचितवान् महाभारतकथां अनुसृत्य । नाट्यपूर्णाः अपि केचन प्रसंगाः, कैः खाडिलकरैः केनापि कारणेन अचि-त्रिताः स्वकृतौ, मया चित्रिताः अत्र-उदा. कीचकेन वेण्याकर्षणेन अवमानिता रात्रौ उन्निद्रा सैरंध्री महानसे सुप्तं बल्लवं रहः उपेत्य प्रार्थयते स्वशीलरक्षणं सर्वप्रयत्नैः । मराठी-कीचकवधस्य संस्कृतानुवादः कैः कृ. वा. चितळेमहोदयैः संपूर्णतया कृतः तिष्ठति इति ज्ञायते । गद्यं नाटकम् इदम् ।]

☞ श्री मधुकर-सदाशिव फाटक-(रामबाग-कल्याण) महोदयैः स्वसहकारिभिः अभिनीता इयं नाटिका मोहमयी नभोवाणीतः २७-४-१९६६ दिनांके रात्रौ ध्वनिक्षेपिता । (सर्वेऽधिकारा लेखकाधीनाः)

स्त्री–पात्राणि

१ सैरंध्री – अज्ञातवासि–द्रौपदी
२ सुदेष्णा – विराट्–राज्ञी
३ कनकांगी – कीचकपत्नी

पुरुषपात्राणि

१ राजा – मत्स्याधीशः विराटनामा
२ कीचकः – विराट–सेनापतिः
३ महामात्यः – विराटस्य
४ बल्लवः – अज्ञातवासी भीमः
५ कंकः – अज्ञातवासी युधिष्ठिरः

प्रवेशः १

[नेपथ्ये]

विजयिनः सेनापतिकीचकस्य राज्ञा गौरवः

जयतु जयतु धीरः कीचकः ख्यातवीरः
रिपुदलनपटुर्नः शूरसेनापतिश्च ।
सुचिरसुदृढमत्स्याधार एकः प्रसंगे
नरपतिदयिताया एष बंधुः प्रियश्च ॥ १ ॥

[विराटराजस्य सभा। राजा, महिषी सुदेष्णा, दासी सैरंध्री, महामात्यः सदस्याश्च स्वस्वस्थानेषु उपविष्टाः]

[कीचकः प्रविशति, राज्ञा सह सर्वे त्वं सभाजयितुं उत्तिष्ठंति । सर्वे 'सेनाप्रमुखः कीचकः जयतु' इति उद्घोषयंति]

राजा— स्वागतम्, सेनापते, स्वागतम् ! [समीपस्थं आसनं निर्दिश्य] इदमासनम्, अलंक्रियताम् । अपि कुशलम् ?

कीचकः— आम् ।

राजा – अनुगृहीताः सर्वे वयं आक्रमकनिर्दलनेन ।

कीचकः— सेनाप्तेः विशेषेण तु राजश्यालकस्य इदं कर्तव्यमेव ।

विराटः— वीरवर, एतद्विजयार्थं किं ते प्रियं मया कर्तव्यम् ?

कीचकः— महाराज ! किं मे ऊनं येन मया कोऽपि विशेषः प्रसादः अर्थयितव्यः भवेत् ?

विराटः— अहो सौजन्यं, समाहितत्वं च अस्य प्रतापशालिनः पुरुषस्य ! यद्यप्यसौ न कांक्षति किमपि, मम कर्तव्यं मया अनुष्ठातव्यमेव। भोः सदस्याः ! (कण्ठात् रत्नहारं निष्कास्य) अयं अमूल्यः रत्नहारः अस्मै वीरश्रेष्ठाय मया उपायनीक्रियते। (कीचककण्ठे निदधाति) (सर्वे–'जयतु सेनापतिः कीचकः' इति उद्घोषयंति ।) अन्यच्च 'नरशार्दूलः' इति उपाधिप्रदानेन सः मया गौरवं

नीयते । ('जयतु नरशार्दूलः कीचकः' इति सर्वे सदस्याः उद्घोषयंति)
(भेरीशृंगशंखादिवाद्यनादः श्रूयते)

कीचकः— महाराज, अनुगृहीतोऽस्मि अनेन गौरवेण । परं नाहं एकाकी श्रेयोभाग् अस्मिन् विजये । सन्ति केचन अधिकारिणः सैनिकाः तदितरे च यैः समये विशेषं धैर्यं शौर्यं च प्रकटितम् । तेऽपि एवं यथोचितं सभाजयितव्याः इति सूचयामि ।

राजा— नेता अनुचरान् श्रेयोभाग् कर्तुं इच्छति इति प्रशंसनीयं खलु । सेनापते, सत्वरं पुरस्कर्तव्यानि ईदृशानां गौरवार्हाणां नामानि प्रकटसम्मानार्थम् ।

कीचकः— यथाज्ञापयति महाराजः ।

महामात्यः— प्रजाभिरपि युद्धकाले, गृहकलहं, मतभेदांश्च तावत् अपसार्य शांतता-रक्षणेन, नवनवोद्घोषितनिर्बंधपालनेन अन्नवस्त्रादिकृच्छ्रसहनेन गुप्तशत्रु-प्रकटनेन च सर्वथा सहकार्यं कृतं, एतदर्थं ताः अपि अभिनंदनीयाः विजयिगौरव-समारोहे ।

राजा— स्थाने एव महामात्यसूचितम् । प्रजासन्तोषस्तु दृढाधारः कस्यापि राज्यस्य । महामात्य, अस्मत्-प्रतिवेशिराष्ट्रं नित्याक्रमणशीलत्वात् सुचिरं शिरोवेदना-कारणं आसीत् । प्रजाभिः बहुवारं लघु लघु तस्य आक्रमणदुःखं खलु सोढम् । सा इदानीं समाहिता भवेत् ।

महामात्यः— आं महाराज, धनदारापहरणं नवशस्यकृंतनं, गोमहिषी यूथलुंठनं इत्यादिभिः पीडिताः प्रजाः नैकवारं प्रतिनिधिद्वारा प्रार्थयन्त रिपोः समूलं निःपातम् । समयं परिपालयितुं उपदिष्टाः ताः साशंकाः अपि आबभूः ईदृशस्य शत्रुदंडनस्य विषये ।

राजा— प्रजासु वात्सल्यं धारयता तासां दुःखं च पश्यतापि राज्ञा देशकालस्थितिं सम्यग् अपरीक्ष्य न सहसा युद्धाय प्रवर्तितव्यं इति राजनीतिः । राज्ञः हि दुःखं राजैव जानाति ।

महामात्यः— सत्यमाह महाराजः ।

राजा— महामात्य, यद्यपि अस्मत्प्रतिवेशिनः आक्रमणं विध्वंसितं, तस्य नित्या आक्रमणवृत्तिः न निर्दलिता । न च निर्दलयितुं शक्यम् । अतः सर्वथा सामर्थ्य-संपन्नैः अस्माभिः भवितव्यम् नित्यम् । अस्मद्गुप्तचरव्यवस्था सुदृढा रक्षणीया । शत्रोः गुप्तचराः विविधच्छद्मैः अस्मद्राज्ये व्यापारयेयुः इति संभवति । लावण्यवत्यः स्त्रियः अपि इदानीं गुप्तचरकार्यं कुर्वंति इति श्रूयते । अतः यदि केऽपि परदेशीयाः शंकास्पदरीत्या विचरंति इति प्रतीयेत सद्यः एव ते निबध्य मम पुरतः आनेतव्याः दण्डनाय ।

महामात्यः— स्वामिनः तर्कः यथार्थः । सकृत् विद्रावितोऽपि शत्रुः पदाहतद्विजिह्वः इव समयं प्रतीक्षते वैरनिर्यातनाय ।

कीचकः— पुराणेषु इतिहासेषु च नैकानि उदाहरणानि साक्षिभूतानि एतदर्थम्। अतः सीमप्रदेशेषु प्रचण्डसैन्यं सततं सिद्धं रक्षितव्यं अस्माभिः, राज्ये विजयोत्सवं कुर्वद्भिरपि।

राजा— अवश्यमेव। अन्यच्च शत्रुः स्वसामर्थ्यसंवर्धनाय अस्माकं अपरशत्रुणा सह सख्यं कुर्यात् इत्यपि न अशक्यम्। समानशत्रुत्वं सख्योत्पादकं इति सुप्रसिद्धम्।

महामात्यः— अतः अस्मद्गुप्तचराः शत्रुराज्यं गत्वा सर्वमपि शत्रुवृत्तं निरीक्ष्य विज्ञापयिष्यंति।

कीचकः— (सैरंध्रीदर्शनेन–स्वगतम्) अहो! का नु खल्वियं मेघमण्डलं मोहितचेताः विद्युल्लतेव इमां राजसभां स्वसौंदर्यविशेषेण उद्भासयन्ती सुंदरी भगिनीसमीपं स्थिता? किं साक्षात् रतिः सुरलोकात् अवतीर्णा भूतले शापोपभोगाय। अप्सराः वा काचन शापिता केनापि तपस्विना स्वतपोभंगोद्यमरता? हन्त! दृष्टमात्रया तया उद्दीपितः मयि कुसुमशरः। दहतीव सः मे सर्वांगानि। न चिरं अत्र अवस्थातुं शक्नोमि। केनापि निमित्तेन सत्वरं इतः निर्गन्तव्यम्।

बल्लवः— (स्वगतम्) आः। अयं दुरात्मा कीचकः साभिलाषं सैरन्ध्रीं प्रति अवलोकयति इति दृश्यते। (सरोषं मुष्टिं दृढं बध्नाति) मया तस्य चेष्टाः सर्वथा अवहितेन रहः निरीक्षितव्याः। पाप्मन्, मा मंस्थाः यद् सैरंध्री अरक्षिता अस्मिन् नगरे तिष्ठति। रे उन्मत्त! 'घृतं पश्यति मार्जारो, न दण्डं पार्श्वे उद्यतम्॥'

कंकः— (अपवार्य) रे, बल्लव, किं त्वयि वीरपुरुषदर्शनेन द्वंद्वातुरता समुत्पन्ना? नायं अनुकूलसमयः इति अवधेहि। निगृहाण तावत् आत्मनः आवेशम्।

राजा— इदानीं दीर्घप्रवसनेन सेनापतिः श्रान्तः दृश्यते। अतः विश्रामसुखं सः अनुभवतु। सभायाः कार्यं तावत् समाप्तम् इति उद्घोषयामि।

जवनिकापातः

× ×

प्रवेशः २

सैरंध्रीकृते सुदेष्णायाः साहाय्याभ्यर्थना कीचकेन

[सुदेष्णामन्विरस्य आलिंदः। सैरंध्री भूमौ उपविष्टा पुष्पहारग्रथनमग्ना]

सैरंध्री— (स्वगतम्)–सौंदर्यं स्त्रीणां भूषणं परं संकटे तदेव दूषणम्। अज्ञातवासस्य एकादशमासाः मया कथमपि यापिताः। परं अवशिष्टे अल्पे एव काले महद् भयं मे समुत्पन्नम्। अद्य राजसभायां सेनापतिः मयि अनिशं साभिलाषं पश्यन् आसीत् इति मम प्रतीतम्। सभायां उपस्थातुं नाहं ऐच्छम्। परं राज्ञी अवदत् 'सैरंध्री, विजयिनं मम भ्रातरं अभिनन्दयितुं सर्वेषु अपि राजपुरुषेषु सपरिवारं राजसभां गतेषु, किं त्वं एकाकिनी शून्यमंदिरे करिष्यसि? किमर्थं तं पराक्रमिपुरुषं न पश्यसि अभिनंद्यमानम्?' इति स्वामिन्या, निर्बद्धा

अहं गतवती तया सार्धम् । परं दुर्दैवं छायेव मां अनुव्रजतीव । हन्त ! किमर्थं मम दक्षिणनेत्रं स्फुरति । किं तु अशुभं मत्कृते उत्पादयितुं दुर्दैवं प्रवृत्तं, न जाने । भ्रातः ! द्वारकाधीश, त्वमेव इदानीं मे शरणम् । (चक्षुषी निमील्य । बद्धाञ्जलिः प्रार्थयते ।)

कीचकः— (प्रविश्य, सैरंध्रीं दृष्ट्वा सहर्षम् स्वगतम्) अहो, मे भाग्यम् !

मदीप्सितेयं तु सुचारुगात्री, प्रायेण मद्ध्यानपरैव नूनम् ।
जिग्रंथिषुर्हारमसुं मदर्थं समुत्सुकाभाति समागमाय ॥ २ ॥

विनायासं एकांते लब्धा इयं सुंदरी (पृष्ठतः स्थित्वा) पृष्ठतः सहसा बाहुपाशे सुदृढं निबध्य विस्मापयितव्या किम् ? (विचिंत्य) परम्, असांप्रतं खलु एनां इदानीं उपरोद्धुम् । यथा समरे तथा प्रणयेऽपि अतित्वरा कार्यहानिकरी भवति । भगिनीं तावत् प्रथमं दृष्ट्वा वशीकरोमि ।

[पटेऽपसारिते सुदेष्णा दृश्यते मंचोपविष्टा । सैरंध्री कीचकशब्दश्रवणमात्रेण भयाकुला सत्वरं पुष्पहारसाहित्यं गृहीत्वा निष्क्रामति]

सुदेष्णा— (उत्थाय) स्वागतं, भ्रातः, स्वागतम् । त्वया संपादितेन विजयेन मम मातृकुलं अद्य धन्यतां नीतम् । राजश्यालः निष्क्रियः भगिनीवैभवपरिपुष्टः केवलभोगासक्तः च प्रायः तिष्ठति इति जनप्रवादः त्वया स्वपराक्रमेण अवितथः कृतः । अयि ! त्वं चिंताकुलः अस्वस्थः च दृश्यसे । अपि क्षुधा त्वां बाधते । सैरंध्रीं तावत् शब्दापयामि ।

कीचकः— (सरभसम्) मा खलु ! मा खलु ! मां क्षुधा न बाधते, परं सैरंध्री बाधते ।

सुदेष्णा— (साश्चर्यम्) भ्रातः, सैरंध्री बाधते ?

कीचकः— आम् ! सैरंध्रीलावण्यं मां बाधते ।

सुदेष्णा— (स्वगतम्) इदं तु कृच्छ्रम् समुदितम् ! तस्याः नियुक्तिसमये एव एतदर्थं साशंका आसम् । (प्रकाशम्) भ्रातः; न सुलभा सा ।

कीचकः— (साश्चर्यम्) न सुलभा प्रतापशालिनः कीचकस्य ?

सुदेष्णा— न सा सामान्या मानुषी स्त्री ।

कीचकः— अतः एव कांक्ष्यते ।

सुदेष्णा— तस्याः भर्तारः—पंचगंधर्वाः—तां रहः रक्षंति । अतः ब्रवीमि—

कीचकः— रक्षंतु गंधर्वाः, वा देवाः अपि । सभायां प्रातः दृष्टमात्रा सा व्याकुलीचकार मे प्राणान् ।

सुदेष्णा— तर्हि प्रयतस्व प्रणयाराधनेन साधयितुमभीष्टम्—परं सावधानम् ।

(निष्क्रांता)

कीचकः — (स्वगतम्) दिष्ट्या भगिनी तु अनुकूला संवृत्ता । अयं नूनं शुभशकुनः ।

सैरंध्रीमपि वशीकरोमि । पौरुषे का नु सुंदरयुवती न मोहिता भवेत् ।

(निष्क्रांतः)

(जवनिकापातः)

× ×

प्रवेशः ३

कीचककृतं सैरंध्र्याः प्रणयाराधनम्

[सुदेष्णामंदिरस्य पूर्वोक्तः आलिंदः । एकतः पुष्पहारहस्ता सैरंध्री प्रविश्य श्रीकृष्ण ध्यानपरा भूत्वा प्रार्थयते । अन्यतः कीचकः प्रविश्य तां ध्यानमग्नां दृष्ट्वा कोणे तिष्ठन् तया विधीयमानां प्रार्थनां शृणोति ।]

सैरंध्री– नरवर ! शरणं त्वां सर्वथा त्वागताहं
रिपुदमन ! न मोघा मा कृथा अर्थनां मे ।
अतुलबल ! मदर्थे रे त्वरस्व ! त्वरस्व
हृदयगतमशेषं वेत्सि भावं, किमुक्तैः ॥ ३ ॥

कीचकः— अहो ! हारग्रथनं समाप्तं प्रियया । प्रायेण मामेव सा आह्वयति सत्वरम् । मम पराक्रमवर्णनश्रवणं, कमनीयरूपं च इत्येताभ्यां सापि मयि मोहिता आभाति । नरवर, रिपुदमन, अतुलबल, इत्येतानि मत्प्रशंसापरविशेषणानि अस्याः चारुगात्र्याः मुखात् श्रुत्वा ननु धन्यः अहम् । विनोदयामि एनां तावत् ।

[पृष्ठतः तस्याः नयने कराभ्याम् आवृणोति]

सैरंध्री— (भुजंगस्पृष्टा इव कीचकहस्तौ सर्वशक्त्या अपसार्य उत्थाय च)– कः ! महाराजः कीचकः ! क्षुद्रदासी अहम् । अनुचितं खलु ईदृशं विनोदनं मया नीचपदस्थया सह ।

कीचकः— सुंदरि, कोपारक्तकपोला त्वं नूनं अधिकमनोज्ञा दृश्यसे । तव नीचपदस्थत्वं च आवयोः प्रणयसाधने न प्रत्यवरोधनिर्मितिक्षमम् । यतः उच्चावचपदप्राप्तिः अस्मादृशाधिकारिभ्यः एव । दासीपदस्थामपि त्वां क्षणार्धे सेनापतेः अंतःपुरस्वामिनीपदे आरोपयिष्यामि । देहि मे आलिंगनम् । (बाहू प्रसारयति)–

सैरंध्री— महाराज ! अलं एतेन साहसेन । मम पतयः अदृश्यरूपेण मां रक्षन्ति दिवानक्तम् । सकृत् क्रुद्धाः ते न मर्षिष्यन्ति भवतः अतिक्रमम् ।

कीचकः— आः ! न कोऽपि मदग्रे स्थातुं प्रभवति ।

शक्रादपि न भीतोऽस्मि, न हराद्वा हरेरपि ।
गंधर्वा मयि नंक्ष्यंति, पतंगा इव पावके ॥ ४ ॥

सैरंध्री— महाराज ! परांगनाभिलाषः अनुचितः । सः विनाशे एव परिणमति इति स्पष्टं नैकैः उदाहरणैः–सीताभिलाषेण रावणः नष्टः, शच्याः आसक्त्या नहुषः

अधः पतितः, अहल्यायाः कामेन च देवेंद्रः सहस्रभगांकितः अभवत्। अतः मनः संयम्यतां स्वहिताय एव।

कीचकः— मृगनयने, किं उपदेशेन। मानवीजीवनं उपभोगाय इति विस्मरसि। मूर्खाः एव ते ये दिष्ट्या लब्धान् सुखोपभोगान् स्वहस्तेन अपसारयंति।

(पश्य तावत्)

लब्ध्वापि नन्वनुपमं रुचिरं शरीरं
किं क्लेशयस्यपि ! वृथा जडधीरिवेदम्।
हा ! हीनदास्युचितकर्मभिरीदृशैस्त्वं
धार्या हि मूर्ध्नि कलिका न पदा प्रहार्या ॥५॥

सैरंध्री— (स्वगतम्) कामातुराणां न भयं न लज्जा। विवेककथाः अस्मिन् नरपशौ विफलीभवेयुः अधोमुखघटस्योपरि वारिधाराः इव। किं कुर्याम्। इदानीं कपटभाषणं विना नैव मोक्षः स्यात्। आशांकुरः मया पल्लवितव्यः अस्य हृदये।

कीचकः— किं विचारयसि।

सैरंध्री— भवान् मयि अनुरक्तः। अहं तु पत्यधीना। हठात् संपादितः प्रणयः पुनः रसहीनः। अतः चिंतयामि यदि केनाप्युपायेन भवन्मनोरथपूरणं शक्यमिति।

कीचकः— (पल्लविताशः)—अवश्यम् ! विचारय अवश्यम्।

(निष्क्रांतः)

(नेपथ्ये—सैरंध्रि ! हला सैरंध्रि !)

सैरंध्री— इयं आगतास्मि।

(निष्क्रांता)

(जवनिका ऊर्ध्वं नीयते)

× ×

प्रवेशः ४

सुदेष्णायाः मनोदौर्बल्यम्

(सुदेष्णामंदिरम्)

मंचोपविष्टा सुदेष्णा— (स्वगतम्)

दुष्कृत्यं गतकरुणेव कर्तुमेतन्निर्बद्धा बहु खलु बंधुनोद्यताहम्।
सैरंध्रीमहह ! गृहेऽस्य चोदयामि दीनाजामिव वदने हठाद् वृकस्य ॥६॥

भगवन् ! मादृश्या राज्ञीपदाधिष्ठितया स्त्रिया दत्ताभया साध्वी सैरंध्री तन्मनोविरुद्धं कामांधपुरुषस्य बाहुपाशे बलात् प्रचोद्यते इति नूनं अपूर्वं विपरीतं च दृश्यम्। एतत् नृशंसं कर्म कुर्वन्त्याः मम हृदयं कथं कंपते, प्रखरशरेणेव च भिद्यते तत् परमात्मन्। त्वमेव जानासि। किं करोमि। असहाया एव संवृत्ता अहम्। भ्राता कीचकः

राज्यस्य दृढः एकः एव आधारः । तस्य रोषः नाम नाशः राज्ञीपदस्य, आर्यपुत्रस्य राजपदविनाशेन सार्धम् । न केवलं जंतुः परं मानवोऽपि, उच्चः वा नीचः अंते स्वार्थ-परः एव सर्वः । वेदान्तः वक्तव्यः श्रोतव्यश्च यथेष्टं, परं आचरणसमये अपसारितव्यः निर्दयम्, इत्येव सामान्यरीतिः । अनुसरामि ताम् ।

[अस्वास्थ्यं नाटयति । उच्चैश्च आह्वयति]

सैरंध्रि ! हला, सैरंध्रि ! त्वरस्व त्वरस्व ।

सैरंध्री-- (प्रविश्य) स्वामिनि ! का आज्ञा ?

सुदेष्णा-- (व्यथां नाटयन्ती) अतीव तृषार्ता अस्मि ।

सैरंध्री-- तर्हि, शीतोदकं आनयामि शीघ्रम् ।

सुदेष्णा-- नहि ! नहि ! न शीतोदकं मम तृषां हर्तुं समर्थम् ।

सैरंध्री-- तर्हि उच्यतां सत्वरं किं इष्यते इति ।

सुदेष्णा-- मदिरा इष्यते मया ।

सैरंध्री-- मदिरा ! कुतः आहर्तव्या मया ? कुत्र निहिता ब्रवीतु महाराज्ञी ?

सुदेष्णा-- कीचकभवनात् !

सैरंध्री-- (भयाहता) कीचकभवनात् ! तर्हि प्रहिणोमि कुमुदिनीं वा मनोरमाम्

सुदेष्णा-- हन्त ! सैरंध्रि । त्वां विना न कामपि दासीं प्रवेशयामि इति भ्रात्रा स्पष्टं मे विज्ञापितम् । गच्छ, गृहीत्वा एतत् सुवर्णचषकम् ।

सैरंध्री-- क्षाम्यतु मां स्वामिनी । अत्रभवती जानाति सम्यक् मां सः अभिलषतीति। प्रहिणोमि कामपि दासीं भवदादेशात् ।

सुदेष्णा-- (विवृद्धां व्यथां नाटयन्ती) अलं भयेन, त्वरस्व । त्वरस्व ।

सैरंध्री-- भवत्या आश्रयदानसमये संमतः मे समयः--

सुदेष्णा-- (सकोपम्) किं अवसरं न जानासि । गच्छ शीघ्रम् । किं कीचकः त्वां भक्षयिष्यति !

सैरंध्री-- (अगतिकतया मदिरापात्रं गृहीत्वा साश्रु कष्टेन च प्रस्थिता स्वगतम्)

धिग् धिग् दास्यं, स्त्रीत्वमप्यस्तु धिग् धिग् !
द्वेऽप्येते स्तो मानभंगाय जंतोः ।
दैन्यं प्राप्ता पंचवीरांगनेयम् ।
एनां भानो ! रक्ष ! रक्षासहायाम् ॥ ७ ॥

(निष्क्रांता)

× ×

प्रवेशः ५

कीचकेन सैरंध्र्याः प्रधर्षणम्

[कीचकः स्वभवने सैरंध्रीं प्रतीक्षमाणः तिष्ठति]

कीचकः— (स्वगतम्) भगिन्या प्रतिश्रुतं मम निर्बंधात्, यत् 'मदिराया

*

आहरणस्य अपदेशेन सैरंध्रीं प्रेषयिष्यामि भवद्भवनं इति। कथं अद्यापि सा सुंदरी नागता। मन्मनोरथपूरणाय कमपि उपायं चिंतयामि इति तयापि मे दत्तं वचः। अप्येतत् औपचारिकम्, केवलं समयानुसारं उक्तं स्यात्–वा मनःपूर्वकम्। भवतु तत् सत्यं वा अन्यथा। भगिनी स्ववचनं अवश्यं प्रतिपालयिष्यति। मम प्रेयसी च अत्र आगमिष्यति। यत्सत्यं, प्रणये प्रेयस्या आविष्कृतेन अधिकाधिकविरोधेन तस्याः आकर्षणम् अधिकाधिकं वर्धमानं प्रतीयते प्रियकरस्य। आ! अनया लावण्यलतिकया विमोहितः अहं न गृहमपि गतवान् धर्मपत्नीं द्रष्टुं, सुखं संलपितुं च राजसभाकृतगौरवानन्तरम्। वराकी कनकांगी गृहे चिरविरहव्याकुला मां प्रतीक्षमाणा स्यात् सोत्कण्ठम्। परं सा मम सर्वथा स्वाधीना कटिप्रदेशे रक्षितं धनमिव कस्मिन्नपि क्षणे सुलभा च, अस्मादृशाः प्रतापिनः राजपुरुषाः नित्यं नवनवां रमणीं कामयन्ते यथा नवनवं तृणं काननस्थपशवः। किमर्थं न कामयितव्या। ततः अपहृत–समर–श्रमाः वयं प्रोल्लसिताः भवामः नवपराक्रमाय। (कंचित् कालं इतस्ततः भ्रमित्वा मंचे उपविशति सैरंध्रीं च ध्यायति)

सैरंध्री— (प्रविश्य स्वगतम्) अयि! महाराजः निमीलितलोचनः दृश्यते। कथं नु सः प्रबोधयितव्यः। न काऽपि दास्यपि दृश्यते अत्र। अहह! कंपते मे हृदयम्। हस्ते अपि वेपथुः समुदितः। किमपि घोरं संकटं उत्पश्यामि। हन्त! पात्रं अधः पतितम्। (तस्य ध्वनिना कीचकः प्रबुध्यते)

कीचकः— (दृष्टिं उन्मील्य सानंदं स्वगतम्) अहो! ध्यायमाना एव रमणी अग्रतः उपस्थिता। (प्रकाशम्) आगच्छ। सुंदरि, आगच्छ उपविश च मत्समीपम्।

सैरंध्री— (निर्विकारतया) देव्या मदिरा इष्यते सत्वरम्। अस्वस्था सा तीव्रतृषोपद्रवेण। दीयतां मदिरा द्रुतम्।

कीचकः— नेष्यति तां कापि दासी। आयाहि इतः। किमर्थं अपरिचिता इव वर्तसे मया सह। त्वया प्रतिश्रुतं मे विचारयामीति।

सैरंध्री— नाद्यापि मद्दृष्टिपथं आगतः कोऽपि उपायः। क्षम्यताम्। दीयतां मदिरा अविलंबेन। देवी मयि कोपं कुर्यात्।

कीचकः— अलं देवीकोपचिंतया (बाहू प्रसार्य) प्रक्षिप तत् मदिरापात्रं, प्रविश च मम भुजद्वयाभ्यंतरम्।

सैरंध्री— महाराज! मा मर्यादायाः अतिक्रमणेन। यदि भवान् जिजीविषति।

कीचकः— (सकोपम्) भूयोऽनुनीतापि त्वं न प्रसीदसि। अतः बलप्रयोगं एव करोमि। (यावत् तस्याः पाणिं बलात् धर्षितुं सः प्रवर्तते तावत् सूर्येण प्रहितः गुप्तरक्षकः सैरंध्र्याः पार्श्वस्थितः–लत्ताप्रहारेण कीचकं दूरं कंदुकमिव

उत्क्षिपति । सैरंध्री मुक्तहस्ता विद्रवंती उत्थितकौचकेन केशपाशे गृहीत्वा अनुधाव्यते ।

(जवनिकापातः)

× ×

प्रवेशः ६

विराटसभायां सैरंध्र्या स्वशीलरक्षार्थं अभ्यर्थनम्

[राजसभायां सैरंध्री कीचकेन केशेषु गृहीता, अनुधाव्यमाना च सहसा भयविह्वला प्रविशति]

सैरंध्री-- महाराज । परित्रायताम् । परित्रायताम् ।

कीचकः-- क्षुद्रदासी त्वम् । कः अत्र त्वां परित्रायेत । मां अवधीरयन्तीं त्वां न केवलं सर्वेषां सभासदां, राज्ञः अपि समक्षं एवं ताडयामि । (कटौ लत्ताप्रहारं करोति) पश्यामि कस्त्वां परित्रास्यते इति ।

(बल्लवः कोपसंरक्तलोचनः प्रांगणस्थं विशालवृक्षं उन्मूल्य आहर्तुं उत्थातुं प्रयतते । तद्दृष्ट्वा कंकः सद्यः स्वांगुल्या तस्य पदांगुष्ठं निपीड्य तं स्तंभयति)

रे बल्लव ! प्रांगणस्थितं वृक्षं किमर्थं कामयसे इंधनार्थम् । किं वने वृक्षाः दुर्लभाः संवृत्ताः ।

सैरंध्री— (सकरुणम्) महाराज ! किमर्थं तूष्णीं आस्यते । किमर्थं अयं साध्वीप्रधर्षकः न दम्यते । किं न्यायदेवता निःसारिता संसदः ।

विराटः— सैरंध्रि, उभयोः कलहवृत्तं समग्रं अज्ञात्वा कथं न्यायदानं कर्तुं शक्यं मया ।

सैरंध्री— (रुदती)-श्रूयतां तर्हि सर्वैः । अतितृषितदेव्या मदिरां आहर्तुं अस्य मंदिरं बलात् सानुनयं प्रेषिता अहं परामृष्टा अनेन नृपशुना, कथमपि आत्मानं मोचयित्वा अत्र धावंती, केशेन पार्श्वतः गृहीता अनुद्रुता च ।

बल्लवः— (स्वगतम्) आः ! दुरात्मन् ! अस्याः साध्व्याः हस्तं बलाद् गृह्णता त्वया कृतांतहस्तः एव गृहीतः ।

सैरंध्री— साभिलाषं मयि पश्यन् सः दुरात्मा मया भूयः सानुनयं च विज्ञापितः यत् मत्र भर्तारः गंधर्वाः मां रहः रक्षंति, हनिष्यंति च क्रुद्धाः कमपि मम धर्षकं इति । परं कामांधः सः, बधिरः इव अस्मिन् हितबोधे, न पश्यति घोरं पर्यवसानं परांगनाधर्षणस्य ।

कीचकः— (साधिक्षेपं विहसन्) हः ! हः ! हः ! । गंधर्वाणां भयं दर्शयति मां प्रति । भण ! कुत्र ते इदानीं तिष्ठंति ।

सैरंध्री— हन्त ! धर्मपाशेन सुदृढं बद्धास्ते अनेन सूतपुत्रेण स्वभार्यां पादप्रहारेण अवमन्यमानां दृष्ट्वापि, षंढाः इव मर्षयंतः किं प्रतिपालयंति न जाने । राजन्

इदानीं त्वदाश्रयमागताहं त्वयैव तावत् रक्षितव्या अस्मात् आततायिनः, इति उचितम्, नहि, त्वत्कर्तव्यम् ।

कंकः— सैरंध्रि ! कथं नु त्वं समयं न जानासि । यतः, समर्थाः अपि तव भर्तारः तव रक्षणाय न धावंति, उचितक्षणः न प्राप्तः इति मन्ये । राजसभायां इदं तव रुदनं अयोग्यं निरर्थकं च अरण्यरुदनमिव । राजपुरुषाणां दीवने किमर्थं विघ्नं उत्पादयन्ती अत्र आक्रोशसि । गच्छ राज्ञीं प्रति आश्रयार्थं अविलंबेन । गंधर्वास्तं अत्याचारिणं विदंण्डय निःसंशयं ते प्रियं करिष्यंति इति विस्रब्धा भव ।

(निष्क्रांता सैरंध्री)

जवनिकापातः

× ×

प्रवेशः ७

कीचकेन कृतं कनकांग्याः प्रणयाराधनं अवधीरणं च

[कनकांगी स्वमन्दिरे कीचकं प्रतीक्षमाणा मंचकोपविष्टा]

कनकांगी— (स्वगतम्) कथं नु आर्यपुत्रः नाद्यापि गृहं प्रत्यागच्छति । कथं नु मां न स्मरति । राजसभायां शत्रुपराजयार्थं यथोचितं राज्ञा सम्मानितः सः भगिनीगृहं गतः तत्रैव रममाणः आभाति । समरभुवं गतस्य मम प्रियपत्नी चिरविरहव्याकुला मां सोत्कंठं प्रतीक्षमाणा सदने तिष्ठति, दर्शनं, आलिंगनं सुखसंलापं च सत्वरं कांक्षति इति कथं न प्रस्फुरति हृदये आर्यपुत्रस्य । (सगद्गदं रोदिति) धिग् ! इदं स्त्रीजन्म, सर्वथा परवशं अथवा—

मा मा स्त्रियो जन्म विधेऽस्तु भूयः चलं हि चित्तं पुरुषस्य नूनम् ।
प्रतीक्ष्यमाणोऽनुदिनं हि साध्व्या भर्तान्ययोषार्जनयत्नशीलः ॥८॥

प्रायेण सैरंध्रीलावण्येन विमोहितः स तस्याः प्रणयाराधने निमग्नः स्यात् । सा यदा राज्ञीमन्दिरे प्रवेशिता तदैव मया सभयं शंकितं यत् सा प्रत्यूहः भवेत् मम आर्यपुत्रसंगतौ इति । का गतिः ? किं इदानीं मे अलंकारधारणेन वा पुष्पहारमण्डनेन ? (कोपात् अंगेभ्यः भूषणमालादीनि अपसार्य भूमौ क्षिपति) । पाषाणहृदयाः खलु पुरुषाः—

कीचकः— (प्रविश्य)–प्रिये, पुरुषाः पाषाणहृदयाः अतः एव शत्रुंजयाः । (भार्यां विमुखीभूतेति दृष्ट्वा) किं त्वं न मोदसे मद्विजयेन । (स्वगतम्) अयि । मौनं अवलंबितं अनया । अतिकुपिता दृश्यते । इदानीं आराधना एव उपायः अस्याः प्रसादनाय, मौनमोक्षाय च । [जानुनी भूमौ निधाय बद्धांजलिः]

अयि ! प्रिये दासममुं क्षमस्व विहाय कोपं सकलं सुशीघ्रम् ।
वीक्षस्व मां स्नेहसुपूर्णदृष्ट्या मंजूक्तिभिर्मे सुखय श्रुती च ॥९॥

(पत्नीपादयोः शिरः निदधाति)

कनकांगी— (झटिति अपसृत्य) ज्ञातम् ! ज्ञातं सुष्ठुपुरुषाणां कैतवं स्त्रीविषये । क्षणे पादप्रहारः, क्षणे आराधनाव्यापारः ।

कीचकः— अहो, भाग्यं यत् मौनव्रतं समापितं प्रियया। (इतस्ततः अवलोक्य) अयि! इमानि भूषणानि भूमौ विकीर्णानि। प्रक्षिप्ताः पुष्पहाराः अपि इमे स्वामिन्याः कोपं सूचयंति। (सर्वाणि विचिनोति) (प्रकाशम्) अहो! स्त्रीणां चातुर्यम्। अभिज्ञातं मयां। प्रिया मत्करात्यां इमानि सर्वाणि परिधातुमिच्छति इति तर्कयामि। पूरयामि सद्यः तन्मनोरथम्। अत्र किं लज्जाकारणम्? [एकैकं गृहीत्वा प्रियया परिधापितुं प्रारभते]

कनकांगी— (ईषत्कोपेन) अलम्। अलं एतैः पुरुषानुचितैः सायासैः। यदि परमार्थतः मम प्रेम कांक्ष्यते तर्हि दीयतां मे वचनम्।

कीचकः— दत्तम्। किं अदेयं वसुधायां विक्रमशालिनः कीचकस्य?

कनकांगी - तर्हि त्यज्यतां सैरंध्री-प्रणयाराधनम्।

कीचकः— अशक्यम्। प्रिये, अशक्यम्।

कनकांगी— कथम्, अशक्यम्? किं वचनभंगः क्रियते।

कीचकः— प्रतिष्ठाभंगापेक्षया प्रियावचनभंगदुःखं सुसहं अस्मादृशानां वीराणाम्।

कनकांगी— क्षुद्रदासीकृते किमर्थं एवं प्रतिष्ठा पण्यते?

कीचकः— क्षुद्रदास्या अस्मदिच्छा-आज्ञा अवमानिता; अतः एव सा बलवत्तरं काम्यते अस्माभिः।

कनकांगी— नाथ, सैरंध्री महापतिव्रता वर्तते; अतः तस्याः अभिलाषा रोरवाय स्यात् इति—

कीचकः— स्वर्गं नरकं नैव चिंतयामः वयं शासकाः। ऐहिकोत्कर्षे तु दत्तावधानाः तिष्ठामः। अस्माकं आज्ञाः सद्यः अविरोधं परिपालयितव्याः प्रजाभिः, किमुत दासजनैः।

कनकांगी— किं अन्याय्या अपि—

कीचकः— आम्, प्रिये, अन्याय्यापि! न्याय्यान्याय्यविचारे नाधिकारः दासजनस्य। 'आज्ञा प्रभूणां ह्यविचारणीया' इतिः नीतिः अवलंबिता सर्वशासकैः।

कनकांगी— परं नाथ! सैरन्ध्र्याः अश्रुपूर्णनयने, म्लानमुखकमलं च मां प्रेरयंति अनुनेतुं आर्यपुत्रं तत्कृते। किं भवेत् यदि सा क्षम्येत।

कीचकः— किं भवेत् इति पृच्छसि? परमार्थतः मत्स्यराजः अहं, तस्य आज्ञा लघूकृता क्षुद्रदास्या इति लोकवादः परिणमेत् अस्मदाज्ञाभंगप्रवृत्तौ प्रजामनःसु। तन्न मर्षयितुं शक्यं राज्यकर्तृभिः अस्मादृशैः। प्रिये! सत्यं वदामि। यदि सैरंध्री मदाज्ञानुसारेण मां सद्यः अभ्यगमिष्यत्, प्रार्थनापूर्वकं च मां अन्वनेष्यत् पातिव्रत्यरक्षणाय, तां अस्पृष्ट्वैव तस्याः भर्त्रा सह सानंदं अयोक्ष्यम्। यन्मे हृदयं तप्तांगारमिव तीक्ष्णं दहति, तत् अवधीरणं मदाज्ञायाः क्षुद्रदास्याः। अतः यावत् सा हठान्न वशीकृता तावत् नैव मे हृदयदाहस्य उपशमः स्यात्। तेन तव प्रेम्णा वंचितः भवितुमपि सिद्धः अहम्। गच्छामि।

[निष्क्रांतः]

कनकांगी— हा! दुर्विधे! (मूर्च्छति)

अमृतलता ऑगस्ट १९८७

श्री. विश्वनाथ केशव छत्रे

कीचक--हननम्

*

(गताङ्कतोऽग्रे)

प्रवेशः ८

कीचकावमानितायाः सैरंध्र्याः बल्लवे एव विश्वासः

[सैरंध्री शय्यायां अस्वस्था; समयः–रात्रिः]

सैरंध्री— (स्वगतम्) हा ! उग्रे मानभंगाग्नौ अंतःकरणे उग्रं प्रज्ज्वलिते कुतः निद्रासंभवः । पंचप्रतापिपुरुषाणां धर्मपत्नी अहं कियद् दयनीयाम् अवस्थां इदानीं प्राप्तास्मि । (रुदती) दुःशासनहतकेन वेण्या मां गृहीत्वा बलाद् राजसभां आकृष्य, भीष्म–द्रोण–कृपादिगुरुजनानां पश्यतां, मां विवस्त्रां विधातुं, मन्नीवी स्पृष्टा–अहह ! तद् भीषणप्रसंगस्मरणेनैव मम सर्वांगेषु कंपः उदितः । तदा प्रार्थितेन करुणावत्सलेन मम बंधुवर्येण श्रीकृष्णेन रक्षिता अहं समये अनर्थात् । ततः वनवासे दुष्टेन जयद्रथेन परामृष्टा अहं मोचिता भर्तृभिः इदानीमपि ते समीपमेव संति, परं भस्माच्छादित–पावकाः इव । सर्वेऽपि धर्मपाशबद्धाः मंत्रविद्धभुजंगाः इव । ज्येष्ठः द्यूतरतः । अनेन दुर्व्यसनेनैव सर्वेषां पाण्डवानां उपरि इयं अनर्थपरंपरा आपतिता । भोः भगिन्यः ! स्वस्वपतिः द्यूतव्यसनासक्तः यथा न भवेत् तथा नित्यं प्रयतितव्यम् । मदिरेव द्यूतं सर्वनाशे परिणमति । अतः समये एव अवधेयम् । मनागपि तत्र प्रवर्तितं दृष्टं पतिमनः सर्वप्रयत्नैः परावर्तयितव्यम् । अहो ! अनेन ज्येष्ठेन मत्पतिना स्वभार्या द्यूते पणिता ! द्यूतं मदिरेव विवेकं नाशयति, बुद्धिं भ्रंशयति, शत्रोः वशं च निभृतं प्रापयति, निंदास्पदतां च तदासक्तं पुरुषं गमयति लोकेषु । द्वितीयः मम पतिः भीमसेनः समरे स्वगदया शत्रुशिरःकमलानि सलीलं

कंदुकमिव अंतरिक्षे उत्पातयन् अजेयः प्रवीरः, इदानीं विराट्राजस्य महानसे वल्लवमिषेण सेवमानः गदास्थाने हस्ते, बृहद्दर्वीसदृशानि पाकक्रियोपकरणानि धारयन् आस्ते। (विचार्य) हूं ! सः एकाकी मे सदैव प्रियकरः संकटनाशनश्च इदानीमपि मच्छीललुंठनोद्युक्तं कीचकं हत्वा मम प्रियं निःसंशयं करिष्यति। सः रहः द्रष्टव्यः महानसे। निभृतं गच्छामि।

(निष्क्रांता)

× ×

प्रवेशः ९

कीचक–दंडन–निश्चयः

[महानसे घुर्घुरायमाणः भीमसेनः अद्वितीयः]

सैरंध्री— (निःशब्दं प्रविश्य भीमसेनं सुखं प्रसुप्तं विलोक्य च) अहो ! यस्मिन् अहं विस्रब्धा भूत्वा साहाय्यार्थिनी अत्र रहः कथमपि आगता, सः एव मम नाथो भीमसेनः निश्चितः घुर्घुरायमाणः स्वपिति। प्रबोधयामि तावदेनम्। (कर्णे मुखं नीत्वा आह्वयति) प्राणनाथ भीमसेन ! अयि प्राणनाथ भीमसेन !

वल्लवः— (प्रबुध्य) कस्त्वम् ? सैरंध्री ? (बाहुभ्यां आलिंगति)

सैरंध्री— (मुखे करं निधाय) आम् ! सैरंध्री अहम्। अज्ञातवासे वयं इति मा विस्मर्यताम्। अतिमंदं संवदावः, अन्यथा अकालिकप्रकटनेन पुनः द्वादशवर्षवनवासः सोढव्यः भवेत्।

वल्लवः— (उत्थाय) आम्। परं किमर्थं मम गुप्तदर्शस्य एतत् साहसं त्वया आचरितम्।

सैरंध्री— धर्मपत्नीं कामांधनरपशुना परामृष्टां समक्षं दृष्ट्वा, पतिः रात्रौ सुखं स्वपिति वा आततायि–दंडनं चिंतयति इति द्रष्टुम्। (साश्रु) हा ! वंचिता अहं कृतविश्वासा विपरीतदर्शनेन !

वल्लवः— (अश्रु प्रमृज्य) मा ! मा एवं प्रिये। मयि भीमसेने जीवति नैव त्वया रुदितव्यम्।

सैरंध्री— तत् किं कामार्तकीचकलषितं पूरयितव्यम्।

वल्लवः— पांचालि, त्रयोदशदिवसाः एव अवशिष्टाः तावत् प्रतिपालय कथमपि।

सैरंध्री— नैकमपि दिवसं प्रतिपालयितुं शक्यं मया। किमर्थं त्रयोदशदिवसवार्ता।

वल्लवः— प्रिये, जानासि त्वं मे धर्मपरवशताम्। राजसभायां नराधमेन तेन कीचकेन कृतं तव धर्षणं अवलोक्य, क्रोधावेगेन तं तत्रैव निष्पेषयितुं उत्थातुकामः सामर्थ्यसंपन्नोऽपि अहं वारितः अग्रजेन मत्पदांगुष्ठनिपीडनेन। द्रुपदजे ! किं

*

करोमि गजेंद्रोपमवीरोऽपि । रात्रौ तव रक्षणोपायं चिंतयन् चिरं उन्निद्रः अहमासम् । दीर्घचिंतनांते उपायं च अपश्यन् यावत् विमनस्कः शय्यां आश्रित्य नेत्रे न्यमीलयं तावत् एव दिनपरिश्रमैः सहसा निद्रावशं गतः अहं त्वया दृष्टः ।

सैरंध्री— स्तोकमात्रं सांत्वनं एतत् । परं न मे मनः समादध्यात् यावत् नराधमः सः न हतः ।

वल्लवः— (अगतिकत्वेन) तत् कथं शक्यं, याज्ञसेनि ।

सैरंध्री— (सकोपम् उत्थाय) न शक्यम् ? तर्हि श्रूयताम् ।

प्रतापशाली पुरुषोऽपि पंढो न त्रायते यो नृपशोः स्वपत्नीम् ।
देहेऽथ पंढुस्नुषयोज्झिते श्वो भग्नप्रतिज्ञो भविताऽस्ति भीमः ॥ १० ॥

वल्लवः— किं त्वं आत्मघातं करिष्यसि ?

सैरंध्री— अनाथया स्त्रिया शीलरक्षणार्थं किमन्यत् कर्तुं शक्यम् ।

वल्लवः— प्रिये अग्रजवशोऽहम् । तस्याज्ञां विना न कीदृशमपि कीचकदंडनं कर्तुं प्रभवामि । तेन सह मंत्रयित्वा अवश्यं साधयामि ते मनोगतम् ।

सैरंध्री— मंत्रणा ! मंत्रणा !! मंत्रणा !!! अनया मंत्रणोपासनयैव स्वशत्रुः प्रबलीकृतः युष्माभिः । किं न धृष्णोसि स्वप्रज्ञया समयोचितं शीघ्रं कर्तव्यं संपाद्य पश्चाद् अवाप्तुं अनुमतिं अग्रजस्य ।

वल्लवः— नहि ! नहि ! सैरंध्रि, एतावत्कालपर्यंतं अग्रजनिर्देशे स्थितः प्रतीपं गंतुं न शक्तोऽस्मि ।

सैरंध्री— (हताशम्) तर्हि दुःशासनहतकशोणितेन मम वेणीं यथाप्रतिज्ञं संहर्तुमपि न शक्नोषि इति मन्ये । हंत ! एकं एव मम आश्रयस्थानं विनष्टम् । दुर्भगे द्रौपदि ! निरर्थकं ते जीवितं संवृत्तम् ।

वल्लवः— समाश्वसिहि ! प्रिये, पश्यामि अग्रजं, कीचकहननाय च तस्यानुमतिं संपादयामि । गच्छामि । अयि ! अग्रजः इतः एव आगच्छति ।

(बल्लवे प्रस्थिते एव कंकः प्रविशति)

कंकः— कीचकहननम् ?

वल्लवः— तर्हि कोऽन्यः उपायः अवशिष्टः ?

कंकः— राजमहिष्या सुदेष्णया वा कीचकपत्न्या कनकांग्या तन्मनः परावर्तयितव्यं प्रयत्नैः ।

वल्लवः— किं कामांधे विवेकः प्रभवेत् । तात ! इदानीं कीचकहननमेव उपायः । अनुमन्यतां सः ।

कंकः— अस्मत्प्रकटनभयं तस्मिन्, वत्स, तव अतुलसामर्थ्यात्। (सैरंध्रीं प्रति) देवि समाश्वसिहि। समाश्वसिहि।

सैरंध्री— मर्यादां अतिक्रांतः खलु आर्यपुत्रस्य समाश्वासनोपदेशः।

व्रजंति ते मूढधियः पराभवं भवंति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नंति शठास्तथाविधान्
असंवृतांगान् निशिता इवेषवः ॥ ११ ॥

वल्लवः— अग्रज, उत्स्फूर्तः एकः कपटोपायः मन्मनसि।

कंकः— निवेदय तावत्।

वल्लवः— श्वः अधमः सः पुनः अनुनयेत् सैरंध्रीं इति तर्कयामि; यतः कामांधः पुरुषः दीपज्योतिषि दह्यमानोऽपि पतंगः इव, प्रेयस्यां विधीयमानां प्रणयाराधनां, तया भूयः अवधीरितः अपि न त्यजति।

सैरंध्री— आम्। परं भीतास्मि ततः।

वल्लवः— सैरंध्री, इदं कपटनाटकं इति विस्मरसि।

सैरंध्री— बाढम्। उच्यतां कथं मया वर्तितव्यं तेन अनुनीतया इति।

वल्लवः— शृणु—

रुरुत्सुः सबलं नूनं मूर्ख एव सुदुर्बलः।
रुन्धन्नग्निशिखां याति नाशं तृणचयः स्वयम् ॥

इति विचार्य, रात्रौ निर्मनुष्यतां गतायां नाटकशालायां घनांधकारे निर्दीपशय्यायां शयानेन त्वया अहं प्रतीक्षितव्या इति तस्मै निवेदय रहः।

सैरंध्री— नाथ, परं कपटार्थमपि एवं वक्तुं कथं पारयामि इति शंके अहम्।

वल्लवः— नान्या गतिः सैरंध्रि, नान्या गतिः।

कंकः— साध्वी जिह्वा पापसंकल्पं कपटार्थमपि उच्चारयितुं नेच्छति इति स्वाभाविकमेव। ततः किम्?

वल्लवः— सः मूर्खः ततः उल्लसितः तस्याः वचसि विश्वसेत् प्रतीक्षेत च तां सोत्कण्ठं नृत्यागारे। रात्रौ भोजनान्ते सर्वेषु सुप्तेषु अहं रहः कृष्णावस्त्रावगुंठितदेहः सैरंध्रीमिषेण संकेतस्थानं गत्वा घनतिमिरे तं कामातुरं, अकस्मात् अभ्युपेत्य, निष्पेषयामि।

सैरंध्री— साधु! साधु!

कंकः— प्रतापिन्! अवधेहि तावत्। भावनाविवशतां मा स्म गमः। कीचकसदृशः विक्रमशालिपुरुषः वृथा न हंतव्यः। तं पांडवानां वशीकर्तुं प्रथमं त्वया प्रयतितव्यं सर्वप्रकारैः। सर्वेषु च प्रयत्नेषु विफलीभूतेषु हंतव्यः सः दुराग्रहः अगतिकत्वेन।

वल्लवः-- अवश्यं प्रयतिष्ये, तात, तं वशीकर्तुं यथादिष्टम् ।

कंकः-- यदि च सः दुर्दैवेन हंतव्यः स्यात्, तर्हि तस्मै अवसरः नैव दातव्यः आक्रोशितुम् । रहः निःशब्दं एव स्वकार्यं संपादयितव्यम् ।

वल्लवः-- आज्ञा प्रमाणं तातस्य । श्रूयतां मम विचारः ।

कंकः-- ब्रूहि । अवहितोऽस्मि ।

वल्लवः-- प्रथममेव तस्य मुखं वस्त्रेण दृढं बध्नीयाम् । सकलमपि कार्यं यथा भित्तिपारमपि न ज्ञायेत केनापि, तथा संपादयिष्यामि । यज्ञीयपशुः यथा निःशब्दं व्यापाद्यते तथैव तं नरपशुं व्यापादयिष्यामि । अग्रज, चिंतया अलम् ।

कंकः-- राजसभादुर्घटनया चिंताक्रांतः अहं सुचिरं निद्रां न लब्धवान् । सैरंध्री त्वां उपेष्यति त्वया संकटनाशनोपायं आयोजयितुं इति स्थाने तर्कयित्वा अहं अत्र आगच्छम् ।

वल्लवः-- तात । समये एव भवान् आगतः मद्रचितकपटव्यूहाय भवतः संमतिः कथं रहः संपादयितव्या इति चिंतयन् आसं सैरंध्र्या सह ।

कंकः-- सर्वथा सावधानं त्वया वर्तितव्यम् । अथ साधयामि ।

(निष्क्रांतः)

वल्लवः-- अपि समाहिता असि ?

सैरंध्री-- आम् ।

दृढाशा मे बद्धा भवति महदापत्तिहरणे
कृतार्था पूर्णाद्येत्यपि ! दयित ! मन्ये गतभया ।
प्रतिज्ञा पूर्येत त्वरितमरिरक्तेन भवता
कचान् मे बद्ध्वेति स्वपिमि च सुखं शेषरजनौ ॥ १२ ॥

× ×

प्रवेशः १०

सैरंध्र्याः प्रणयस्य कपटनाटकम् ।

(सैरंध्री राजोद्याने पुष्पाणि चिनोति अद्वितीया)

सैरंध्री-- (स्वगतम्) पतिव्रतया परपुरुषेण सह कृतः प्रणयालापः पापाय कल्पते इति जानत्यापि मया तदर्थं सिद्धया भवितव्यं इदानीं कठिनहृदयेन पातिव्रत्यरक्षणाय एव । पथभ्रष्टां धेनुं मृगयमाणाय सैनिकाय, धेन्वा अनुसृतं मार्गं जानतापि, तज्जीवित-रक्षणाय विपरीतमार्गकथनं पृष्टपथिकस्य यथा पापाय न भवति, तथा इदानीं मम कपटभाषणमपि पापाय न भवेत् इति श्रद्दधामि ! भगवन् ! चराचरस्य अंतर्गतभावं अभिजानंस्त्वं मम भावविशुद्धत्वं जानास्येव । अतः कपटभाषणार्थं मां अगतिकां क्षंतुमर्हसि । प्राणनाथेन

भीमसेनेन सम्यक् आश्वसितायाः अपि मम इदं हृदयं प्रकंपते भीत्या यावद् अभीष्टं न सिद्धम् । यतः—

प्रौढा अपीष्टलाभार्थमधीरा बालका इव ।
भूयः प्रदर्श्यते बालैर्भावः प्रौढैस्तु रुध्यते ॥ १२ ॥

परम्–कथं नु विज्ञापयितव्यः सः गुप्तसंदेशः तस्मै। (पुष्करिणीतटे सचिता उपविशति, कीचकः अचिरात् पृष्ठतः निभृतं प्रविश्य, तां निरीक्षते साभिलाषं, शृणोति च तस्याः स्वगतं भाषणम्,) मां कामयमानः सः अवधीरितः मया भूयः। इदानीं मया कामयमानः सः तु न लभ्यते सुचिरं जिह्रेषि खलु तस्य रहोऽन्वेषणे। किं करोमि । प्रायेण इतः एव सः एष्यति अपूरितार्थः मां मृगयमाणः, वत्सः धेनुमिव, द्यूतगृह वा द्यूतकारः इव । प्रतिपालयामि अत्रैव मुहूर्तम् ।

(तूष्णीम् आस्ते)

कीचकः— (प्रहृष्टः स्वगतम्) अहो ! जितं मया । सा सुंदरी अनुतापदग्धा त्यक्ताखिलप्रतीकारा मामेवाभिलषंती प्रतीक्षमाणा च अत्र उपविष्टा । पृष्ठतः एनां सहसा आलिंगितुं समुत्सुकोऽपि निगृह्णामि तावद् आत्मानम् । शब्दापयामि तां मंजुलाक्षरैः । (प्रकाशम्) सुंदरि ! अयि सुंदरि !

सैरंध्री— (मुखं परिवर्त्य भयचकिता, क्षणार्धेन तु तिष्ठति स्मयमाना) अयि ! महाराज ! क्षम्यताम् । मया न ज्ञातं भवदागमनम् । विज्ञापयामि यत्—

कीचकः— विज्ञापयामि ? नहि ! नहि ! आज्ञापयामि इत्येव शब्दप्रयोगः समुचितः त्वादृशीनां रमणीनां वदनकमले ।

सैरंध्री— भवतु भवदिच्छा प्रमाणम् । आज्ञापयामि यत् अद्य—

कीचकः— भण ! भण शीघ्रम् । मम कर्णौ अतीव तृषितौ तव शब्दामृतस्य पानार्थम् ।

सैरंध्री— बिभेमि कोऽपि शृणुयात् आवयोः रहस्यम् । अतः वदामि मंदस्वरेण ।

कीचकः— वद यथेष्टं मंदस्वरेण । अवहितोऽस्मि ।

(कर्णं सैरंध्रीमुखस्य समीपं करोति)

सैरंध्री— रुरुत्सुः सबलं नूनं मूर्ख एव सुदुर्बलः ।
रुंधन्नग्निशिखां याति नाशं तृणचयः स्वयम् ॥ १३ ॥

इति विचार्य मया सर्वोऽपि विरोधः संहृतः ।

कीचकः— चतुरासि नूनं चतुरासि !। दृष्टं त्वया यद् सिंहासनस्थः राजा विराटोऽपि मां विरोद्धुं ह्यः भीतः । अन्ते, प्रबलः एव सर्वत्र विजयते ।

सैरंध्री— मान्यम् । सर्वथा मान्यम् ! (स्वगतम्) रात्रौ त्वां इदं प्रत्याययिष्यति नाथः भीमसेनः (प्रकाशम्) अतः अद्यैव रात्रौ—

कीचकः— (सानंदं तालिकावादनेन) मया सह रंतु निश्चितं त्वया:। इत्येव ननु।

सैरंध्री— अलं उद्घोषेण । श्रूयतां तावत् ।

कीचकः— हा ! विस्मृतं मया हर्षातिरेके ।

सैरंध्री – अद्य मध्यरात्रौ निर्मनुष्यतां गतायां नृत्यशालायां अहं प्रतीक्षितव्या अत्रभवता ।

कीचकः-- अवश्यम् ! अवश्यम् ! अहो मे भाग्यम् ।

सैरंध्री-- समयः कोऽपि तत्र परिपालनीयः ।

कीचकः-- समयः ? कः ? अलंकाराः, कुसुममालाः सुगंधिद्रव्याणि, व्यजनानि दास्यः--

सैरंध्री-- नहि ! नहि तादृशः समयः महाराज । रहः एव सर्वः अयं व्यवहारः कर्तव्यः । घनांधकारे निर्दीपे नृत्यागारे निःशस्त्रेणैव भवता प्रवेष्टव्यं तदा ।

कीचकः-- (साश्चर्यं) किं घनांधकारे निर्दीपे नृत्यागारे ! निःशस्त्रेण च मया आगंतव्यम् । अहो ! भीरुत्वं रमणीनाम् । सैरंध्रि ! असिलतायाः सपत्न्याः इव त्वं भीता इति पश्यामि । परं किमर्थं निर्दीपत्वं नृत्यागारस्य ।

सैरंध्री-- महाराज ! अद्य एव सः समयः प्रतिपालयितव्यः । बिभेमि गंधर्वेभ्यः अतः- (भयकंपं नाटयति)

कीचकः-- अनुमतः सैरंध्रि ! अनुमतः ते समयः ।

सैरंध्री-- विलंबितं मया अत्र सुचिरम् । अथ साधयामि ।

(प्रस्थिता)

कीचकः-- सुंदरि ! सकृत् देहि मे आलिंगनम् (बाहू प्रसारयति)

सैरंध्री-- अलम् अधीरतया । रात्रौ-(निष्क्रांता)

कीचकः-- (सोत्कंठम्)

त्वरस्व, भानो ! नभसि त्वरस्व प्रतीक्षते त्वां हि गृहे प्रियार्ता ।
कामाभितप्तां समुदारबुद्धे ! प्रशाम्य तां पूरय मेऽपि कामम् ॥१४॥

(निष्क्रांतः)

× ×

प्रवेशः ११

कीचकहननम्

(रात्रौ निर्दीपनृत्यशालायां कीचकः सैरंध्रीसंगमोत्सुकः प्रतीक्षते तां पुष्पहार-भूषणादि-सामग्र्या सह)

कीचकः-- (स्वगतम्)

सौवर्णाक्षरमंडनार्हदिवसो मज्जीवनेऽद्योदितः
सैरंध्री नचिरान्मयाभिलषिता सार्धं मया रंस्यते ।
स्निह्यंत्यप्रतिमप्रतापपुरुषे लावण्यवत्यः स्त्रियः
सामर्थ्यं समुपास्यतामविरतैर्यत्नैरतो भो ! जनाः ॥ १५ ॥

अहो, मम बाहुबलप्रभावः ! अंते जयति जगति सामर्थ्यसंपन्नः एव इति इदानीं सुप्रतीतं लोकानाम् । सैरंध्री मम पौरुषस्य दर्शनेन स्तिमितलोचना प्रभाविता च मां शरणं ययौ ! सा नूनं न सैरंध्री परं कापि शापभ्रष्टा देवांगना इति मन्ये । तां इदानीं मद्भुजलताश्रितां मम नैकस्त्रीणां मूर्ध्नि स्थापयामि । अर्हत्येव सा तत्पदम् । परं किमर्थं तया अत्र विलंब्यते आगमनम् । तां प्रतीक्षमाणोऽहं सुचिरं अत्र स्थितः । विलंबः सर्वदा शंकामुत्पादयति । सा मां वंचयेत् किम् ? नहि ! नहि ! स्वयमेव मह्यं संकेतं निवेदयंती ईदृशी सुंदरी नैव वंचयेत् । परं इमाः लावण्यवत्यः स्त्रियः छंदानुवर्तिन्यः समयेषु अभिरुचिं दधानाश्च । भणितं तया समयप्रकटने 'निर्दीपे घनतिमिरे एव सर्वः प्रणयव्यवहारः कर्तव्यः' । आः ! कियन्मूढत्वम् ! परं का गतिः । भवतु सर्वं तस्याः छंदानुसारेण । तदर्थं सुरभिपुष्पमालाः नानाविधैः रुचिरैः आभरणैः सह मया सिद्धीकृताः । हा ! प्रतिक्षणं तया क्रियमाणः विलंबः मम अधीरतां वर्धयति । कष्टं खलु इदं प्रेयसी-प्रतीक्षणम् ! (पदध्वनिं श्रुत्वा सानंदम्) अहो ! आगता सा सुंदरी स्मृतमात्रा । (बल्लवः कृष्णवस्त्रावगुंठितकायः मंदं प्रविशति मंचकसमीपं च गत्वा तिष्ठति) प्रिये, अपसारय ते अवगुंठनम् । उपविश मत्-समीपम् । (बल्लवेन अग्रतः कृतं हस्तं गृहीत्वा स्पृष्ट्वा च) अयि ! सुंदरि ! कियान् कठिनः ते करतलः !

बल्लवः— (स्त्रीशब्दं नाटयित्वा) महाराज, राज्ञ्याः अंतःपुरे सुचिरं कृतस्य कठिनकार्यस्य अयं परिणामः !

कीचकः— अहह ! अनुचितं खलु दास्यं त्वादृश्यः लावण्यवत्यः स्त्रियः ललाटे लिखितं विधिना । इतः परं अवसिताः ते कष्टाः । अयि ! कुतः कंकणविहीनस्ते हस्तः ।

बल्लवः— मया अपसारितानि कंकणानि शब्दभीत्या ।

कीचकः— अतीव भीरुस्त्वम् । अपसारय ते अवगुंठनम् । देहि से आलिंगनं सत्वरम् । सुचिरं तप्तं मे शरीरं ग्रीष्मर्तुमध्याह्ने निर्वृक्षमार्गे पथिकस्य इव ।

बल्लवः— लज्जितास्मि महाराज । अपनयतु तद्भवानेव ।

[कीचकेन सत्वरं अपनीते अवगुंठने, अधीरतया च आश्लिष्टमात्रायां अग्रस्थितायां आकृत्यां वज्रकायः भीमः सहसा उत्पत्य तस्य कंठं बलात् सुदृढं गृहीत्वा तं मंचके पातयति तस्य च वक्षसि उपविशति]

कीचकः— (स्खलद्भिः अक्षरैः) का त्वम्—हा ! दुष्टे ! वं-चि-तो-ऽहम् ।

बल्लवः— भीमोऽहम् ! दुरात्मन् । अग्रजस्य धर्मराजस्य आज्ञया त्वां मोचयिष्यामि यदि त्वं सैरंध्र्याः—द्रौपद्याः—अभिलाषं त्यक्त्वा तत्क्षमां च याचित्वा

पांडवानां सुहृद् भविष्यसि । तव प्रतापानुरूपं ते त्वां आदरयिष्यंति । त्वां कस्यापि राज्यस्य आधिपत्ये ते स्थापयिष्यंति । भण नरपशो ! भण सत्वरं ते मनोगतम् ।

कीचकः— किं सैरंध्री ! द्रौपदी ? परं भीम, किमर्थं त्वं कपटेन भीरुरिव सहसा मां अभिभवसि । तिष्ठ तावत् । गदाद्वंद्वं करवाव ।

भीमः— रे मशक, किं गदायाः आवश्यकता तव हननाय । परांगनाधर्षणपरः आततायी त्वं, अकस्मात् अभिभवयोग्यः एव । अथ अलं विलंबेन । ब्रूहि सत्वरं किं इच्छसि शरणं वा मरणम् ।

कीचकः— किं प्रतापी पुरुषः शत्रुं शरणं गच्छति ? सैरंध्र्याः—नहि द्रौपद्याः—बाहुपाशं शरणं गन्तुमिच्छामि ।

भीमः— रे नराधम ! मृत्युमुखं प्रविष्टप्रायोऽपि साध्वीं अभिलषसि । न त्वं क्षमार्हः । तर्हि ददामि ते प्राणदण्डं धर्मानुज्ञया (कीचकवक्षसि वज्रमुष्ट्या भीषणप्रहारं कृत्वा तत्प्राणान् हरति)

साध्वीप्रधर्षणपरो नृपशुर्दुरात्मा प्राप्स्यत्यवश्यमतिभीषणदंडमेवम् ।
आर्तावनाय खलु पौरुषमीशदत्तं
लोका ! न तन्निरपराधिनिपीडनाय ॥ १६ ॥

कार्यसिद्धिं द्रौपदीधर्माभ्यां निवेदयितुं महानसं गच्छामि । तौ प्रतीक्षमाणौ स्याताम् ।

(निष्क्रांतः)

× ×

प्रवेश : १२

कीचकहननांते सैरंध्र्याः आकांक्षितम्

[कंकः सैरंध्री च महानसे उपविष्टौ]

कंकः— चिरं प्रतीक्षमाणौ आवां भीमसेनम् । किं करोति सः इति चिंता मां बाधते ।

सैरंध्री— निःसंशयं सः तं नराधमं व्यापादयिष्यति ।

कंकः— परं कीचकसदृशः प्रतापी पुरुषः यदि पांडवानां पक्षपाती भवेत्—

सैरंध्री— दुरात्मनः हृदयपरिवर्तनं अशक्यं खलु, प्रतीपं यापनं इव सरिदोघस्य । अस्वाभाविकं तत् ।

कंकः— कीचके हते त्रिगर्ताः अभिभवेयुः मत्स्यान् । वयं च नवसंकटे पतिष्यामः । विराटस्य साहाय्यदाने अस्माकं प्रकटनभयम्; अन्यथा च आश्रयदातुः ध्रुवं नाशं पश्यतां अस्माकं अपकीर्तिः मनोव्यथान्विता । द्रौपदि, महती एव मे चिंता ।

वल्लवः— (प्रविश्य) तात, नष्टं चिंताकारणम् । व्यापादितः मया सः नरपशुः निःशब्दं यथादिष्टम् ।

सैरंध्री-- साधु ! साधु ! प्रियं खलु आचरितं मम अत्रभवता ।

कंकः-- अथ प्रयतितं किं त्वया तं स्ववशीकर्तुम् ।

बल्लवः-- अवश्यं, तात, भूरि प्रयतितम्, परं व्यर्थतामेव गताः मम प्रयासाः ।

सैरंध्री-- मया पूर्वमेव कथितं इदम्, दुरात्मनः परिवर्तनं अशक्यं इति ।

कंकः-- परं वत्स, एकस्मिन् संकटे निवारिते द्वितीयं समुत्पन्नम् ।

बल्लवः-- किं नु तत् ?

कंकः-- प्रातः कीचकस्य मृतदेहे दृष्टिपथं आगते, केन इदं घोरकर्म कृतं इति चर्चा निश्चयेन भविष्यति सर्वत्र राजसभायां लोकेषु च। भीमसेनं विना ईदृशं निःशस्त्रं कीचकहननं अन्येन नैव शक्यं इत्यपि प्रवादः उत्स्थास्यति । ततः अस्मद्-अभिज्ञानभयं कथं निवारयितव्यम् ।

सैरंध्री-- अलं चिंतया तस्मिन् विषये । मम भर्तृभिः गंधर्वैः क्रोधात् रहः एतत् कर्म कृतं स्यात् इति अंतःपुरे स्वाभिप्रायं प्रकटयिष्यामि। तस्मिंश्च विश्वसिष्यंति सर्वे विना संशयं मदिरायाः आहरणसमये स्वभवने मद्धर्षणोद्यमे रहो निपातितस्य कीचकस्य पूर्ववृत्तस्य श्रवणेन ।

कंकः-- अथ कीचकवधेन दुर्बलतां गते मत्स्यदेशे, अनुकूलसमयं प्रतीक्षमाणैः विजिगीषुभिः त्रिगर्तैः आक्रमिते कथं अज्ञातवासः शक्यः स्यात् अस्माकम् ।

बल्लवः-- अग्रज, कृष्णसखैः किमर्थं चिंता कर्तव्या ।

सैरंध्री-- नाथ, नैव कर्तव्या । येन एतावत् कालपर्यंतम् अस्मत्सहाय्यं कृतं सर्वेषु अपि संकटेषु, सः भगवान् गोपालकृष्णः दूरस्थः अपि अस्मिन् संकटे अस्मद्रक्षकः भविष्यति अंतःप्रेरणादानेन इत्यस्मिन् विषये नास्ति मे संदेहलेशोऽपि।

कंकः-- तथास्तु ।

बल्लवः-- सैरंध्रि, मन्मनोगतमेव त्वया खलु प्रकटितम् । गतचिंतया त्वया इदानीं किं आकांक्ष्यते ।

सैरंध्री-- श्रूयतां तावत्--

भीमेनामिततेजसा द्रुपदजा त्राताद्य धर्माज्ञया
पातिव्रत्यविभंजनोद्यतखलं हत्वा रहः कीचकम् ।
मन्ये द्राग्भुवि पांडवाः प्रकटिता भास्वानिवाभ्रच्छदात्
दीप्येरन् कृतदारधर्षकवधा नव्यौजसाप्तश्रियः ॥ १७ ॥

बल्लवः-- अवश्यमेव ! सैरंध्री, अवश्यमेव ।

(जवनिकापातः)

इति कीचकहननम्

❀ ❀ ❀

*

अन्वेषको लालबहादुरोऽभूत्

नाट्यकथा

जवाहरलाल निधनोत्तरं महामात्यपदे एकमत्येन मॉनिमंडलेन नियुक्तः श्रीलालबहादुरः स्वकर्तव्यस्य यथावत्परिपालने क्षणं साचेतः संभ्रांतः जवाहरलालं प्रार्थयते मार्गदर्शयितुमन्तःप्रेरणा प्रदानेन। तदा अकस्मात् अशरीरवाचा तेन सः आश्वास्यते धैर्यं अवलंब्य सर्वात्मना स्वकर्तव्यमनुष्ठातुं। पत्नी ललितागौरी अपि वर्धयति धैर्यं आत्मविश्वासं च, कथयंती यत् श्रीतुलसीरामायणस्य तेन क्रियमाणं नियतपठनं तेन संपादिता मनसः एकाग्रता, मातुः शुभाशीषः सहधर्मचारिण्या आचरिता शिवोपासना इत्यादिकानामेतत्प्रभावः तं निःसंशयं तारयेत् कस्मिन्नपि कृच्छ्रे इति।

गृह-परराष्ट्र-संरक्षण-विभागमंत्रिणः, भू-वायु-नौ-दलानां प्रमुखाः च प्रविश्य अभिनंदंति शास्त्रिमहाशयं सर्वशः सहकार्यं च प्रतिश्रुवंति धैर्यावलंबनाय च प्रार्थयंतो चिंताकुलतया भगवद्ध्यानपरेण आत्मना अशरीरवाचा जवाहरलालात् कथं मार्गदर्शनं लब्धम् इति तेन निवेदिते, ते सर्वे विस्मिताः भवंति।

अन्वेषको लालबहादुरोऽभूत् 2

नाटकथा

पाकप्रेरिताः गुप्तागंतुकाः काश्मीरे सरारम्भ उत्थानं चिकीर्षवः काश्मीर-नागरिकैः स्वयंस्फूर्त्या आवेष्टिताः दंडाय च शासनस्य स्वाधीनाः कृताः इति ज्ञात्वा भारतशासनं मंत्रिमंडलं विमर्शं यथोचितं क्रियायै च प्रेरयाते। विमर्शान्ते नव-महामंत्री श्रीलाल० शास्त्री पाकं प्रति निषेधप्रदर्शक-पत्रमात्रप्रेषणं निरर्थकं भीरुताद्योतकं च इति मन्यमानः पाकेन कृतम् प्रकटाक्रमणं शस्त्रबलेनैव प्रति कर्तव्यं विचिन्त्येति स्वमतं प्रकटी करोति। संरक्षणमंत्री अनुमन्यते तत् परं पूर्वम् आश्वासनं प्रार्थ्यते यत् काश्मीरस्य प्रथमाक्रमणप्रतीकारे यथा सैनिकानाम् उत्साहभंगः कृतः शासनेन स्तैगतप्रायविजयक्षणे दत्तेन युद्ध-विरामादेशेन तथा न कर्तव्यः इति। तथाश्वासने दत्ते, काश्मीरे क्षणे शत्रुप्रतीकाराय भिन्नदलानां सर्वशः सिद्धता अस्ति इति प्रतिवचनं ददाते। सत्वरं ततः प्रतीकारादेशः दीयेत इति

महामंत्री विज्ञापयति ।

तथा कृते जिदलसेना साधारणेन युध्यमाना शत्रुं स्थले स्थले न केवलं पराजयत् परं पाकप्रदेशमपि प्रविश्य लाहोरस्य समीपं सध्येयम् उपतस्थौ। इमानि युद्धकौतुकानि सकौतुकं शृणोति सपत्नीकः पुण्यपुरीनागरिकः दिवाकरः प्रतिवेशीनः अरविंदस्य भागिनेयात् डॉ० अभयात् रणात् नाचिरात् निवृत्तात्

राशेया- अमेरिका प्रभृतिप्रयत्नैः युनोसभया ऐकमत्येन उपदेशपरं कृतं निर्णयमादृत्य विजयिनापि भारतेन युद्धविरामः सद्यः उद्घोषितः पाकेनतु मंदगत्या। नाचिरात् ताश्कंदनगरम् आमंत्रितयोः भारत-पाकयोः संधिः राशेया ध्यक्षेण कोसीजिनेन निर्वर्तितः। परं निर्जितप्रदेशं पाकं प्रति प्रत्यर्पयितुं राशेयादृढाग्रहार्थं सदसद्विवेकबुद्धिविरुद्धं दत्तसंमतिः श्रीशास्त्री व्याधितात्मा संधिविधानोत्तरं मध्यरात्रौ एव दिवं गतः।

—×—

नाट्यकथा

महामंत्री विज्ञापयति ।

तथा कृते त्रिदलसेना साधारणेन युध्यमाना शत्रुं स्थले स्थले न केवलं पराजयत् परं पाकप्रदेशमपि प्रविश्य लाहोरस्य समीपं सधैर्यम् उपतस्थौ। इमानि युद्धकौतुकानि सकौतुकं शृणोति सपत्नीकः पुण्यपुरीनागरिकः दिवाकरः प्रतिवेशिनः अरविंदस्य भागिनेयात् ऑ० अभयात् रणात् नचिरात् निवृत्तात्

राशेया- अमेरिका प्रभृति प्रयत्नैः युनोसभया ऐकमत्येन उपदेशपरं कृतं निर्णयमादृत्य विजयिनापि भारतेन युद्ध विरामः सद्यः उद्घोषितः पाकेन तु मंद-गत्या। नचिरात् ताश्कंदनगरम् आगमितयोः भारत-पाकयोः संधिः राशेया ध्यक्षेण कोसीजिनेन निर्वर्तितः। परं निर्जितप्रदेशं पाकं प्रति प्रत्यर्पयितुं राशेयादृढाग्रहार्थं सदसद्विवेकबुद्धि-विरुद्धं दृत्तसंभातेः श्रीशास्त्री व्याधितात्मा संधिविधानोत्तरं मध्यरात्रौ एव दिवं गतः!

—×—

अमृतलता मे रखे
१८
विश्वनाथ केशव छत्रे
गोगळेकरवाडा, सिद्धेश्वर आळी
कल्याण (जि. ठाणे.)

श्री विश्वनाथ केशव छत्रे

अन्वर्थको लाल 'बहादुरो'ऽभूत् ♣

—: पात्राणि :—

शास्त्री– महामंत्री
देवी रामदुलारी– शास्त्रिणः वृद्धा माता
ललितादेवी– शास्त्रिणः पत्नी
भगवंतरावः– संरक्षणमंत्री
नंदः– गृहमन्त्री
स्वर्णसिंहः– परराष्ट्रमंत्री
चौधरिः– भूदलप्रमुखः
अर्जुनसिंहः– वायुदलप्रमुखः
सोमणः– नौदलप्रमुखः
कोसीजिनः– रूस–महामंत्री
आयूबखानः– पाकाधिपतिः
द्वारपालः– महामंत्रिणः
दिवाकरः– पुण्यपुरीनागरिकः
उषा– दिवाकरपत्नी
अरविंदः– दिवाकरप्रतिवेशी
अभयः– सेनादलभिषग्वरः } अरविंदस्य भागिनेयः

(दिल्लीनगर्यां महामात्यपदप्राप्तिः)

[प्रवेशः— १]

[शास्त्रिनिवासः, वृद्धा रामदुलारी देवी, ललिता देवी च]

रामदुलारी— वत्से, सुभगा असि नूनम्। भारतस्य महामात्यस्य पत्नी इति इतः परं उल्लिखिता भविष्यसि।

♣ बहादुरः = महाराष्ट्रभाषायां विक्रमशाली।

ललिता— (प्रणम्य) अम्ब ! भवदाशीर्वादस्येव इदं सुमधुरं फलम् । वस्तुतः नाहं इमं अर्हामि गौरवम् ।

रामदुलारी— कथं नु ?

ललिता— विनैव अध्ययनायासं यथा भिषजः पत्नी 'डॉक्टरणि' वा विधिज्ञस्य पत्नी 'वकिलीण' नाम उपाधिं अधिगच्छति, तथैव महामात्यपत्नीपदं मम। राजकारणस्य लेशमात्रेणापि वस्तुतः नास्ति मे परिचयः ।

रामदुलारी— वत्से ! प्रीताऽस्मि ते प्राञ्जलभाषणेन। अथ नीराजनं सिद्धं कुरु। वत्सः नचिरात् गृहं आगच्छति ।

शास्त्री— (प्रविश्य, मातृचरणयोः शिरः निधाय) मातः, अभिवादये ।

रामदुलारी— (स्नेहेन पृष्ठं परामृश्य) वत्स, विजयोऽस्तु ते सदैव । ललिते, आनय दीपं नीराजनं प्रकाशय च वत्सस्य मुखकमलं, अग्रतः वर्तुलाकारं भ्रमयित्वा सकलमंगलाय ।

(ललितादेवी यथादिष्टं विदधाति)

शास्त्री— अम्ब ! सम्भ्रान्तोऽहं खलु, शिरसि सहसा पतितेन भारतशासनस्य गुरुभारेण ।

रामदुलारी— वत्स, अलं संभ्रमेण। यस्मिन् सुदृढं विश्वस्य त्वया एतावत् कालपर्यंतं निष्कामं देशसेवारूपं स्वकर्तव्यं सर्वात्मना अनुष्ठितं, तस्मिन् एव भगवति श्री शंकरे निहितसर्वचिंताभारः प्राप्तं कर्तव्यं कुरुष्व । मर्यादापुरुषोत्तमस्य श्रीरामचंद्रस्य गुणोत्तमान् संस्मृत्य शाधि स्वदेशम् । जात, अतीव प्रीताऽस्मि ते अनेन अभ्युदयेन। यदि तव जन्मकाले, कोऽपि ज्योतिषिकः माम् अकथयिष्यत् यद् 'अयं पुत्रः भारतस्य महामात्यः नूनं भविष्यति' इति तर्हि तत्कथनं पारितोषिकलिप्सया कृतं तेन इति अगणयिष्यम् ।

शास्त्री— अम्ब ! स्थास्यामि ते निदेशे सर्वथा । तव सद्गुणबीजारोपणस्य आशीर्वादस्य च इदं फलं मदुत्कर्षरूपं इति मन्ये । अस्तु तथैव मयि तवाशीः पुरतः अपि ।

रामदुलारी— अवश्यम् । अनया वत्सया कृता श्रीशिवोपासना अपि तवोत्कर्षाय साहाय्यभूता इति मा विस्मर । (स्नुषायाः मुखं हस्तेन परामृश्य) वत्से, मुदिताऽस्मि ते परमभाग्यदर्शनेन । अथ साधयामि नियतजपार्थम् ।

[निष्क्रांता]

लाल०— (स्वगतम्) (निमीलितलोचनः आसनोपविष्टः) भगवन्, लोके उच्चाधिकारपदं संपादयितुं सुकरं, परं तत् चिरं रक्षितुं खलु दुष्करम् । जवाहरलालेन आस्वातंत्र्योदयं मुख्यामात्यपदं आमरणं सप्तदशवर्षाणि यद् अधिराक्षितं

तत् असामान्यव्यक्तिमत्त्वेन, लोकप्रियत्वेन, पैतृकसुकृतेन, सर्वस्वत्यागेन, स्वातंत्र्योदयार्थं विसोढैः बंदिवासादिकष्टैश्च। तस्य एतद्गुणविभवस्य स्तोकांशमात्रं बिभ्रतः मम तद्यशः प्राप्तिप्रयत्नस्तु 'प्रांशुलभ्ये फले मोहात् उद्बाहुरिव वामनः', इत्यत्र कविकुलगुरुकालिदासेन यथा वर्णितः तथा लोके उपहासपात्रतां गच्छेत् इति जानामि। परं नेतृभिः ऐकमत्येन मुख्यमंत्रिपदे वृतेन मया यथाशक्ति स्वकर्तव्यं अनुष्ठातुं प्रयतितव्यम् इत्येव इदानीं समीचीनम्। न अन्या गतिः। परं भीषयंति मां उग्रं अंतर्बाह्यकृच्छ्राणि, यैः भारतं इदानीं समाक्रांतम्। जवाहर! वयस्य जवाहर!! किं कुर्याम्। दर्शय मे प्रकाशम् सर्वतः व्याप्ते घनांधकारे।

वयस्य जवाहरलाल, (स्मरति तद्रूपम्) त्वया सुचिरं स्वतेजसा उद्भासिते पदे नेतृभिः आरोपितं मां स्वकर्तव्ये यथापूर्वं मार्गदर्शनं कर्तुं अर्हसि इदानीं अपि अंतःप्रेरणादानेन। (तत्स्मृतौ विस्मरति आत्मानम्, अशरीरिणी वाक् श्रूयते) वयस्य, मा भैषीः, धैर्यम् अवलम्ब्य आक्रमस्व मार्गं मन्नीतिमनुसृत्य। मातुः

एतत्कलाकृतिनिर्माणकारणम्

'काव्यं नाभिलषामि 'शास्त्रि' विषये, हृद्यां परं नाटिकां'
प्राप्याकल्पितमित्यहोऽ 'मृतलता' संपादकात् × प्रेरणाम्।
वाग्देवीं शरणं गतो व्यरचयल्लब्धप्रकाशः कवि-
रेतन्नाट्यमहंकृतेरवसरस्तस्यात्र नूनं कुतः॥

—श्री वि. के. छत्रे

शुभाशिषः, सहधर्मचारिण्या आचरितं सुकृतं, त्वया विहिता उत्कृष्ट-देशसेवा इत्येतैः सार्धं मत्तः अंतःप्रेरणापि त्वां कियदपि भीषणं कृच्छ्रं उल्लंघयितुं साहाय्यं करिष्यति इति विश्वासितव्यम्।' (अर्धजागरितः) हा? स्मृतमानः जवाहरः अव्यक्तरूपेण माम् संदिश्य मुक्तचिंतं अकरोत्। अभिज्ञातः मया तस्य शब्दः। मित्रवर्य, अनुगृहीतोऽस्मि। (नेत्रे उन्मीलयति)

ललिता— आर्यपुत्र—

लाल०— उच्यतां तावत्।

ललिता— अहं चिरम् अत्र अतिष्ठम्, भवन्तं च चिंताव्यग्रं दृष्टवती। मया शब्दापितमपि द्वित्रिवारम्, परम्—

× पं. श्री श्रुतिशीलशर्मा महोदयः

*

लाल०— परं किम्—

ललिता— परमिदानीं निरस्तमेघपटलं चंद्रबिंबमिव दृश्यते उज्जवलं भवन्मुख-मंडलम् ।

लाल०— (स्मयन्) अयि ! काव्यं स्फुरति तव हृदये—

ललिता— अयं प्रभावस्तु गोस्वामिनः श्री तुलसीदासस्य काव्यस्य नियतपठनस्य ।

लाल०— साधु ! साधु !

ललिता— तर्कयामि यत् जवाहरलालाः प्रार्थिताः मार्गदर्शनार्थम् ।

लाल०— आम् । कथं त्वया इदम् अभिज्ञातम् ?

ललिता— अस्फुटशब्दानां मार्गदर्शनं श्रुतं मया ।

लाल०— तत एव गतचिंतः अभवम् ।

ललिता— शोभनम् । रक्षिताऽस्मि दिष्ट्या ततः चिंतानिवारणप्रयासात् । यथा पर-मार्थे तथा राजकारणेऽपि ध्यानयोगः सफलो भवति इति प्रतीयते । अथ किं मार्गदर्शनं कृतं जवाहरलालैः ?

लाल०— मातुः शुभाशिषः, सहधर्मचारिण्या आचरितं सुकृतं, सर्वदा लभ्यमाना मत्तः अंतःप्रेरणा च त्वां संकटं उत्तारयिष्यंति इति आश्वासितं तैः ।

ललिता— लोकोत्तरः पुरुषः खलु सः अभूत् यः निर्गतोऽपि स्मृतमात्रः प्रेरणां ददाति वयस्याय ।

लाल०— इदानीं त्वया राजकारणं, वक्तृत्वं, भूगोलज्ञानं च एतत् त्रयं अध्येतव्यम् । मया सह देशांतरगमनायापि सिद्धया भवितव्यम् । न इतः परं त्वं केवला सचिवगृहिणी ।

ललिता— आर्यपुत्र ! वस्तुतः न मे रुचिः लौकिकप्रसिद्धौ, परं मुख्यामात्यस्य सह-धर्मचारिण्याः उचितकर्तव्यस्य अनुष्ठाने मदीयं न्यूनत्वं न प्रकटीभवेत् इति विश्वसितव्यम् ।

लाल०— 'गृहिणी सचिवः सखी मिथः' इति बहुविधभूमिकाः अपि त्वया कर्तव्याः इतः परं सकौशलम् ।

ललिता— अवश्यम् । (द्वारस्थघंटानादं श्रुत्वा) अयि, कोऽपि आगतः । पश्यामि (द्वारम् उद्घाटयाति) (यशवंतरावः, स्वर्णसिंहः, नंदश्च प्रविशंति । ललिता अंतर्गृहं गच्छति)

लाल०— (सस्मितम् उत्थाय अग्रेगत्वा) सुस्वागतम् । वयस्याः, आस्यताम् । (सर्वे प्रणमंति मुख्यामात्यम्)

नंदः— प्रमुदिताः खलु वयं दृष्ट्वा प्रसन्नतां भवन्मुखमंडले । भवतः चिंतानिवारणाय

धैर्यप्रदानाय च वस्तुतः आगमनं अस्माकम्, एवं सफलीभूतं दिष्ट्या सुपूर्वमेव अस्मत्प्रयत्नं विना। किंनु साधनं अनुष्ठितम्?

यशवंत०— अस्माकं औत्सुक्यं तदर्थम्। ताद्विज्ञाय वयमपि अनुष्ठातुं यतिष्यामहे, समुदिते मनोदौर्बल्ये।

स्वर्णसिंहः— अवश्यं निवेदयतु महामंत्री।

लाल०— न महामंत्री अपि तु लालबहादुरः एव पूर्ववत् मिथः मेलने।

नंदः— तथास्तु उच्यताम्।

लाल०— सर्वप्रथमं मातुः शुभाशिषः।

नंदः— वाढम्! 'न मातुः परदैवतम्' ततः—

लाल०— सहधर्मचारिण्याः शिवोपासना। नैकवारं तया रक्षितोऽस्मि।

यशवंत०— शिवोपासना शिवकरी स्यात् इति वक्तव्यं किम्? ततः—

लाल०— जवाहरलालस्य मार्गदर्शनम्– अभयप्रदानं च।

त्रयोऽपि— (साश्चर्यं) कथम्? कथं नु तद् लब्धम्?

लाल०— न तत्र किमपि आश्चर्यम्। चिंताक्रांतः अहं तद्ध्यानपरः अभवम्। ईषद् नष्टे देहभाने तस्य वाणी श्रुता मया सुस्पष्टम् अभिज्ञाता च।

नंदः— एवं ध्यानयोगः फलति। एकाग्रता मनसः तत्र अत्यवश्या। वयस्य, निःशंकं भवच्छासनं यशस्वि भविष्यति।

यशवंत० — निःशंकं खलु।

स्वर्ण०— लाल महाशय, सहमतोऽस्मि नंदयशवंतयोः। परम् इदानीं भावनाविश्वं विहाय वस्तुस्थितिं विचारयाम। संकटत्रयं अस्मान् भीषयति दारुणम्। पाक–चीनाऽऽक्रमणं, अन्नप्रश्नः, अंतर्गतकलहश्च।

लाल० — अस्त्येव तत्। तच्च मे चिंताकारणम् आसीत्। भवतां त्रयाणां मनोमय-सहकार्यं विना नैव शक्नोमि अनुष्ठातुं मे कर्तव्यं यशस्वितया।

त्रयोऽपि— सर्वशः मनःपूर्वकं सहकार्यं दास्यामः। अलं चिंतया।

लाल०— अनुगृहीतोऽस्मि।

'परस्परं भावयंतः श्रेयः परमवाप्स्यथ'
इति भगवन्निदेशे स्थास्यामः [क्रमशः]

जोगळेकरवाडा, सिद्धेश्वर आळी,
कल्याण (थाना)

अमृतलता आगस्ट १९५६

श्री विश्वनाथः केशवः छत्रे

अन्वर्थको लाल 'बहादुरो'ऽभूत्

*

(सुचिरपीडाकरपाकविमर्दनस्य निश्चयः)

[प्रवेशः— २]

[लालबहादुरः, यशवंतरावः, स्वर्णसिंहः नंदश्च काश्मीरे पाकस्य गुप्तागंतुकानां उत्थानयत्नविषये चर्चां कुर्वंति]

लाल०— वयस्याः, अस्माकं नवमंत्रिमंडलेन अद्यावधि अन्तर्गतानि नैककृच्छ्राणि लंघितानि सहकार्येण। केरळस्य पक्षकलहोद्भवा अशांतता शमिता केंद्रशासनप्रवर्तेन। मद्रदेशीयं हिंदीविरोधि भीषणमांदोलनं सुवर्णमध्यस्य आश्रयेण सांत्वेन शमं नीतम्। भ्रष्टाचाराश्च उच्चपदस्थाः अधिकारिणः शासनयंत्रणायाः अपसारिताः।

परराष्ट्रसंबंधे पाकचीनयोः सततताऽऽक्रमणं तु शोषयति अस्मद्रक्तं चिराय। पाकस्तु जन्मतः एव लघुगुरुविषयेषु सकारणं वा अकारणं अस्माभिः कलहायमानः वैरभावे प्रविष्टः। बालः इव अभीष्टार्थदानेन प्रदीर्घकालं लालितोऽपि सः दुराग्रहः नैव परितुष्यति। तेन कृतं नूतनं कच्छाक्रमणं संयुक्तराष्ट्रसभायाः मध्यस्थत्वेन अस्माभिः कथमपि साम्ना शमितं अपरिहार्यतया। यतः

आस्वातंत्र्यलाभात् भारतपाकयोः सीमनिश्चितिः अस्माभिः अनवधानेन असंपादिता तस्थौ।

काश्मीरप्रश्नस्तु निरंतरचिंताकारणं अस्माकम् । अंतर्गतमपि तं प्रश्नं संयुक्तराष्ट्र-सभायां नीत्वा जटिलजाले स्वयमेव वयं प्रविष्टाः, सुचिरं न्यायस्य च अलाभेन स्वास्थ्यं न लभामहे स्वोत्कर्षसंपादनाय ।

इदानीं सशस्त्राः उत्थातुकामाः पाकस्य गुप्तागंतुकाः काश्मीरनागरिकैः स्वयंस्फूर्त्या आविष्कृत्य दंडनाय शासनस्य स्वाधीनाः कृताः, तद्वेषणे च पाकस्य भीषण-क्रांति-व्यूहः प्रकटितः इति घटना द्रुतं निर्णायक-क्रियायां नः प्रेरयति । यथापूर्वं निषेधप-त्रपरंपरा इदानीं निरर्थका स्यात् ।

यशवंतः— महामंत्रिणा मया सुचिरं चिंतितं एव इदानीं प्रकटितं इति मुदितो-ऽस्मि । लौकिकदृष्ट्या हि निषेधपत्रप्रेषणमात्रं नूनं हास्यास्पदं संवृत्तम् ।

नंदः— कच्छसामविरुद्धं जनसंघेन कृतं भीषणं निदर्शनं स्पष्टं बोधयति यद् जनाः इतः परं नैव मर्षयिष्यंति अस्माकं निष्क्रियं निषेधपत्रप्रेषणम् । प्रकृतिकोपश्च सर्वकोपेभ्यो गरीयान् ।

यशवंतरावः— केवलनिषेधपत्रप्रेषणपरंपरया, संयुक्तराष्ट्रसभायाः मध्यस्थ-त्वाय भूयः प्रार्थनया, शांततामंत्रपरायणतया च मन्यते पाकः भारतं नष्ट-पौरुषम् ।

लाल०— अतः पौरुषप्रदर्शनं अवश्यं इदानीमिति मन्ये ।

नंदः— इयं मंत्रणा समुचिता परं को जानाति आंग्ल-अमेरिका-मनोगतम्, प्रति क्रियां च । पाकेन सह समरे सकृत् प्रवर्तिते, धूर्ते आंग्लामेरिके यदि तस्य साहाय्यं कुर्यातां, चीनः पूर्वपाकश्च युगपत् उत्तिष्ठेतां, अस्माकं विजयः संश-यितः स्यात् । अतः विमर्शितव्यः विरुद्धः अपि पक्षः ।

स्वर्ण०— पश्चिमपाकपक्षपातेन असंतुष्टः पूर्वपाकः उत्तिष्ठेत् वा न । बहुंशेन नोत्ति-ष्ठेत् । सुदूरत्वाच्च तत्र सेना-सामग्र्यादि-साहाय्यस्य प्रेषणमपि दुष्करं स्यात् पश्चिमपाकस्य ।

लाल०— गोमंतकमुक्तिसमरे अस्माभिः दृष्टं गर्जनमात्रं पाश्चिमात्यानां । यशवंत-राव, अस्ति किं सैनिकसिद्धता समरप्रवर्तनस्य ।

यशवंतः— (क्षणैकं विचार्य) अवश्यम्, परम्—

लाल०— किं परम् ।

यशवंतः— किंचित् सुस्पष्टं वक्तुमिच्छामि भवदनुज्ञया ।

लाल०— उच्यतां मुक्तमनसा ।

यश०— सेनाधिकारिणां सैनिकानां च मनसि यद् वर्तते तद् प्रकटीकरोमि । सकृत् निष्कोषितं शस्त्रं हस्तंगतप्रायविजयक्षणे एव कोषे प्रवेशयितुं आदेशः न दीयेत इति आश्वसितव्यम् ।

लाल०-- काश्मीरस्य प्रथमाक्रमणप्रतीकारे यथा उत्साहभंगः कृतः सैनिकानां अस्मच्छासनेन तथा इदानीं न विधीयेत इति आश्वसिमि।

यशवंतः-- तर्हि प्राणपणेन युध्येरन् सैनिकाः आविजयप्राप्तिः।

लाल०-- यशवंतराव, संरक्षणमंत्रिपदात् मया सैनिकसिद्धता अवगता। इदानीं प्रत्यक्षं समरं करिष्यमाणानां, भू-नौ-व्योम-दल प्रमुखेभ्यः तां सिद्धतां अवगंतुमिच्छामि।

यशवंतः— बाढम्। आह्वयामि तान्। कः कोऽत्र भोः।

द्वारपालः— (प्रविश्य प्रणम्य च) आज्ञापयतु स्वामी।

यशवंतरावः— चौधरी-अर्जुनसिंग-सोमण-महाशयाः उपविष्टाः संलग्नकोष्ठे। महामंत्री तैः सह मंत्रणां इच्छतीति विज्ञापय।

द्वारपालः— यथादिशति प्रभुः। (निष्क्रांतः)

नंदः— भूतपूर्वं महामात्ये अदृष्टपूर्वं खलु धैर्यं नवमहामंत्रिणा प्रकटितम्।

स्वर्णसिंगः— आम्। चिंतितं साहसमपि तथैव।

यशवंतः— शिशुपालस्य अपराधशतं मर्षयित्वा भगवता श्रीकृष्णेन यथा भूयः कृतापराधे तस्मिन् स्वचक्रं प्रक्षिप्तं तथैव, नैकशतापराधं रचयति पाके, महामंत्री सर्वात्मशक्त्या प्रहर्तुं व्यवस्यति।

[चौधरि- अर्जुनसिंग-सोमण-महाशयाः प्रविश्य अभिवादयंति महामंत्रिणं ततश्च नंद-यशवंत-स्वर्णसिंगान्।]

लाल०— भोः! भू-व्योम-नौदल प्रमुखाः। काश्मीरे पाकेन महान् क्रांतिव्यूहः रचितः आविष्कृतः काश्मीरनागरिकैः इति ज्ञातमेव भवतां त्रयाणाम्। इदानीं न निषेधपत्रं, न संयुक्तराष्ट्रसभां प्रति धावनं, परं अकृतपूर्वः तीव्र-प्रतीकारः, पाकप्रदेशं प्रविश्य तस्य मर्मस्थानेषु च तथा प्रहारः अवश्यः यथा शत्रुः भूयः भारतं आक्रमितुं न धृष्णुयात्। उच्यतां। यदि पर्याप्ता विद्यते अस्माकं सिद्धता तदर्थम्। विशेषकार्ये भू-व्योमदलयोः अत्र वर्तते।

चौधरिः— (क्षणमानं विमृश्य) सुष्ठु चिंतितं महामंत्रिणा। परं यदि अनुमन्येत तर्हि किंचित् स्पष्टतया वक्तुमिच्छामि अस्मत्त्रयाणामपि मनोगतम्।

लाल०— उच्यतां निःशंकम्।

चौधरिः— यदि यथापूर्वं विजयक्षणे एव युद्धविरामादेशेन सैनिकानामुत्साहभंगः न क्रियेत तर्हि—

लाल०— आश्वसितं तथा संरक्षणमंत्रिणे मया नचिरात्।

चौधरिः— तर्हि दीयतां आदेशः। अस्मत्सैनिकानां बाहवः एतदादेशश्रवण-मात्रेण प्रस्फुरिष्यंति कार्याय इति विश्वसितव्यम्। वर्तते सिद्धता पर्याप्ता।

अर्जुनसिंगः— न चिंता कार्या व्योमदलविषये। प्राणपणेन योत्स्यंते वैमानिकाः मातृभूरक्षणाय, आक्रमकनिबर्हणाय च इत्यत्र न संशयितव्यम्।

लाल०— बाढम्। सोमणमहाशय, नौदलेनापि अवहितेन स्थातव्यं सर्वशः, भंक्तव्यञ्च शत्रोः जलमार्गेण आक्रमणं गुप्तं वा प्रकटम्।

सोमणः— अवश्यम्। सर्वप्रकारेण सहकार्यं दीयेत नौदलेन, भू-व्योमदलयोः।

लाल०— शोभनम्। वयस्याः तर्हि सद्यः एव आदेशः दीयते आक्रमक-निबर्हणाय, शत्रोश्च प्रदेशं प्रविश्य मर्मस्थानविच्छेदनाय। अपि संमन्यते एकमतेन सर्वैः?

नंदः
यशवंतः
स्वर्णसिंगः } — संमतम्

लाल०— प्रत्यहं त्रिवारं प्रगतिः मे विज्ञापयितव्या।

यशवंत०— अवश्यम्। शास्त्रिवर्य, भारतीयजनता अस्य अभूतपूर्वनिर्णयस्य सहर्षं स्वागतं करिष्यति।

नंद०— पक्षोपपक्षाश्च अंतर्गतकलहान् अपसार्य, पुरा स्वातंत्र्यसमरार्थमिव ऐक्येन समोदं सर्वप्रकारेण सहकार्यं दीयेरन् इति विश्वसिमि।

लाल०— तथास्तु। स्वस्वकार्ये अवहिताः भवामः इदानीम्।

(जवनिकापातः)

[नेपथ्ये]

जयतु जयतु शास्त्री येन धैर्यं त्वपूर्वं
प्रकटितमतिमत्तं मर्दितुं जिह्मपाकम्।
परकृतचिरपीडामर्षणं साधुयोग्यं
परमतिशयगर्ह्यं लोकशास्तुस्तदेव॥

[प्रवेशः— ३]

[पुण्यपुर्यां प्रातः समयः, उषा नभोवाणीं वृत्तं श्रुत्वा पतिदेवं सत्वरं प्रबोधयति]

उषा— आर्यपुत्र। आर्यपुत्र! उत्तिष्ठतु भवान्।

दिवाकरः— अयि! किमर्थं ते त्वरा?

उषा— शुभा वार्ता! युद्धविरामः उद्घोषितः!

दिवाकरः— (सहसोत्थाय दीर्घं निःश्वस्य) साधु। साधु! यूनोप्रयत्नः दिष्ट्या सफलीभूतः।

उषा— न दिष्ट्या। न तत्र दैवं यशोभाक् भवितुमर्हति।

दिवाकरः— आश्चर्यं खलु!

अरविंदः— (प्रविश्य) आश्चर्यम्? किमाश्चर्यम्।

दिवाकरः— इयं महिलापि दैवे न विश्वसिति। किं नैतत् स्त्रीस्वभावविरुद्धं आश्चर्यकारकं च?

अरविंदः— नाश्चर्यं, यतः 'दैवायत्तं कुले जन्म मदायत्तं च पौरुषम्' इति तेजस्विवचः प्रमाणीकुर्वता जनकेन सा संवर्धिता।

दिवाकरः— विस्मृतं खलु मया। अयि! स्पष्टीक्रियता यूनो-साम-प्रयत्नः दैववर्जं कस्मात् कारणात् सफलीभूतः इति।

उषा— महामंत्रिणा अंगीकृतेन विजिगीषुणा नीत्या, सैनिकैः प्रदर्शितेन पौरुषेण, लोकैः सोत्साहं समर्पितेन सर्वशः सहकार्येण च।

दिवाकरः— झांशीराज्ञी प्रेरयतीव अंतः अस्मत्सहधर्मचारिणीम्।

अरविंदः— भगिन्या एकस्मिन्नेव वाक्ये भारतयशसः मीमांसा कृता।

दिवाकरः— तां तन्मुखात् श्रोतुं, प्रोच्यमानायाश्च तन्मुखे उत्तरोत्तरं वर्धमानं तेजश्च द्रष्टुं मया 'दिष्ट्या' इति शब्दप्रयोगः बुद्धिपुरःसरं अक्रियत।

उषा— (कृतककोपेन) एष कपटिस्वभावः सर्वेषां पुरुषाणाम्।

अरविंदः— अनपेक्षितं खलु धैर्यं तेजश्च प्रकटितं शास्त्रिवर्येण।

दिवाकरः— आम्। 'सूर्या नूनं लघुरपि गुरुः शोभतेऽसौ सुकीर्त्या।' इति कस्यापि वर्णनं लालबहादुरमपि नूनं शोभते।

उषा— बहाद्दुरेण स्वाभिधानं अन्वर्थकतां खलु नीतं, 'बहाद्दुरी' नाम पराक्रमं विधाय।

दिवाकरः— अरविंद, पश्य स्वभगिन्याः बुद्धिविभवम्।

उषाः— अत्र गुरुः आर्यपुत्रः। भ्रातः, शंकते मे मनः समयपरिपालनविषये पाकेन।

अरविंदः— भगिनि, स्थाने ते शंका। अद्यापि हि सर्वेऽपि समयाः पाकेन उल्लंघिताः।

दिवाकरः— न सहमतोऽस्मि वाम्। स्वसेनायाः आंतरिके अनुत्साहे, भारतेन नूतनत्वेन अंगीकृतायां जयिष्णुवृत्त्यां, ततश्च तत्सेनायां प्रस्फुरिते विशेषसामर्थ्ये लब्धप्रत्ययः पाकः न धृष्णुयात् भूयः रणप्रवर्तनाय इति मे मतिः।

अरविंदः— परं सामचर्यायां प्रवृत्तायामपि आक्रमणात् न विरतः पाकः इत्यपि सत्यम्। नातप्तलोहो लोहेन संधीयते।

दिवाकरः— आसन्ननिर्वाणप्रदीपार्चिः यथा द्योततेतरां तथैव पाकस्य इदं चेष्टितं मंतव्यम्।

उषा— अपूर्वः खलु अदृश्यत उत्साहः लोकानां स्वातंत्र्यलाभोत्तरम्। गतेषु अष्टादशवर्षेषु ते अवसरं नैव लेभिरे स्वतेजःप्रकटनाय।

अरविंदः— अंते सोपहासं सततमवधीरिता स्वातंत्र्यवीर-सावरकरमहोदयानां जयिष्णुनीतिरेव संकटे साहाय्यं अकरोत् शासनस्य अपगतमोहपटलस्य।

दिवाकरः— आम्। एतद्वृत्तश्रवणमात्रेण उज्जीवितः इव आभात् अतिक्षीणः सः वीरवरः इति श्रूयते।

उषा— अस्मिन् प्रकरणे अमेरिकांग्लभ्रुकुटीभंगः सर्वथा उपेक्षितः महामंत्रिणा इति विशेषेण अभिनंदनार्हम्।

अरविंदः— असामान्यं खलु इदं मनोधैर्यम्।

दिवाकरः— स्वसंरक्षणाय एव अमेरिकातः संपादितानि पॅटन नामगतिमद्रणयंत्राणि भारतविरुद्धं पाकेन उपयोजितानि इत्यस्मिन् अधमा पाकमनोवृत्तिः सूर्यप्रकाशवत् आविरभूत् ।

अरविंदः— आश्चर्यं परं यत् शांतिपुरस्कारपरया अमेरिकया शब्दमात्रेणापि पाकः तदर्थं न पृष्टः । तर्जनस्य वार्ता तु दूरतः एव ।

दिवाकरः— नाश्चर्यम् । यतः कौटिल्यप्रणीतां 'संधिविग्रहोपादानं द्वैधीभावः' नाम नीतिं नित्यं अवलंबते अमेरिकांग्लसदृशानि प्रबलराष्ट्राणि ।

अरविंदः— को नाम अयं द्वैधीभावः ।

दिवाकरः— नित्यकलहायमानयोः दुर्बलराष्ट्रयोः बाह्यतः स्नेहस्य अंतश्च कलहस्य परिपोषणं स्वप्रतिष्ठारक्षणाय ।

अरविंदः— आं ज्ञातम् ।

उषा— अहो ! कुटिला खलु राजनीतिः । परं वराकाः पाकसैनिकाः समर्थान्यपि तानि अमेरिकायाः प्राप्तानि रणवाहनानि शस्त्रास्त्राणि च उपयोजयितुं नाशक्नुवन् ।

अरविंदः— प्रशिक्षणाभावः, आंतरिकश्च युद्धाय अनुत्साहः पाकसेनायाः पराभवकारणं इति ज्ञायते ।

(नेपथ्ये 'मातुल अरविंद ! मातुल !)
इति शब्दः श्रूयते)

अयि ! मम भागिनेयस्य शब्दः अयं (द्वारं गत्वा) इतः इतः अभय !

अभयः— (प्रणम्य उषादिवाकरौ) नमोनमः मातुल ! प्रणमामि त्वाम् ।

अरविंदः— भद्रं अस्तु ते । (उषादिवाकरौ प्रति उद्दिश्य) अयं मम भागिनेयः डॉ. अभयः ।

उषादिवाकरौ— सुस्वागतम् । श्रुतं भवन्नाम । इदानीं प्रत्यक्षदर्शनेन मुदितो आवाम् ।

अरविंदः— समरभुवं गतः सः, सामनिश्चयं अनुलक्ष्य द्रुतमेव विमुक्तः विलंबितविवाहसंपादनाय । सत्यं किं भागिनेय ?

अभयः— आम् ।

उषादिवाकरौ— अभिनंदनम् । समये एव भवदागमनम् । इदानीं समर-सामचर्चा कुर्वन्तः आस्म । भवान् साक्षात्कृतानि कौतुकानि निवेदयितुमर्हति । कदा प्रत्यागतः भवान् ।

अभयः— ह्यः रात्रौ दशवादनसमये । प्रातः एव मातुलदर्शनं शक्यं इति विचिन्त्य सत्वरं आगच्छम् ।

दिवाकरः— देवि ! तर्हि चायः सिध्यताम् ।

उषा— (उत्तिष्ठन्ती) अवश्यम् ! परं आर्यपुत्र, भवता मुखप्रक्षालनं कर्तव्यं अस्ति ।

दिवाकरः— कृतमेव यदा त्वं दुग्धं आहर्तुं गता आसीः तदा ।

उषा— समीचीनम् ।

अभयः— भगिनि ! मया चायपानं कृत्वैव गृहं त्यक्तम् । अतः न त्वरा कार्या चायार्थम् । समरकौतुकश्रवणे भवत्याः अपि औत्सुक्यं स्यात् ।

दिवाकरः— अहो ! परमनोगतस्य अभिज्ञत्वम् । तथास्तु, निवेद्यताम् ।

अभयः— समरे विजयेच्छुना प्रथमं निरोद्धव्यः शत्रोः सततसंयोगः तव सैन्यस्य अन्नशस्त्रास्त्रादि सामग्र्याश्च इति नीतिं अनुसृत्य, स्वसेनानायकैः हाजीपीर-दुर्गमगिरिमार्गं लक्ष्यीकृत्य अनपेक्षितरीत्या निशायां रात्रौ अभ्यापतितम् ।

उषा— यथा षाहिस्तेखाने शिवरायेण वा सिंहदुर्गपाले उदयभानौ तानाजिना ।

अभयः— भगिनि, यथार्थमेव उपमितं भवत्या, उत्तरतः भारतसेनाक्रमणं अपेक्षितं पाकसेनाधिकारिभिः । परम् दयालमुख्यैः रणनीतिपटुभिः रणजितसिंगभारतीयैः अधिकारिभिः अस्मत्सेना पश्चिमदिशि, रजन्यां वृष्ट्यां च पंकपरिक्लिन्नेन मार्गेण चतुःसहस्रपदमुच्चं गिरिशिखरं आरोपिता, वियतः धारासार इव च सहसा निपातिता असन्नद्धायां शत्रुसेनायाम् ।

दिवाकरः— अहो ! कौशलं रणधुरंधराणां भारतसेनानायकानाम् ।

अरविंदः— धैर्यं साहसं च सैनिकानाम्, ततः—

अभयः— कथमपि प्रतिकारं कुर्वता रिपुणा सह मुहूर्तं युद्ध्वा अन्येद्युः एव प्रातः दशवादनसमये तत्स्थानकं जित्वा भारतध्वजः तत्र उच्चैः उद्धृतः अपि । गृहीतशत्रु-सेनायाः अन्नेऽपि अस्मत्सेनया सहभागित्वं संपादितम् ।

उषा— युद्धस्य कथाः रम्याः ! ततः—

अभयः— पाकप्रदेशं यथेष्टं प्रविश्य तस्य मर्मस्थानेषु सर्वात्मशक्त्या प्रहर्तव्यं इति प्राप्ते आदेशे अवसराभावात् सुचिरं अंतर्दह्यमानः भारतीयसैनिकानां रणोत्साहः सहसा उत्पूर्य तेषां मुखश्रियं देदीप्यमानः, साक्षात् कृतान्तेऽपि प्रहर्तुं सन्नद्धः इव आभात्, यथा निपुणविलंबितमत्तगजेंद्रदर्शनेन क्षुधाव्याकुलमृगेंद्रस्य ।

दिवाकरः— सुवर्णाक्षरैः लिखितः स्यात् अयं आदेशः शास्त्रि-जीवने भारतस्य ऐतिह्ये च ।

अरविंदः— स्मरामि नेताजिसुभाषचंद्रकृत-स्वातंत्र्यसमरस्य ईदृग्वर्णनं नाम 'योद्धुं कृतांतेन तदा तु साक्षाद् । वीराः सुसिद्धा इव ते विरेजुः ॥'

अभयः— मातुल, सुतीव्रा खलु ते स्मरणशक्तिः ।

अरविंदः— अथ निवेदय अन्यकौतुकानि

अभयः— अस्माकं वैमानिकैः प्राणपणेन अमूल्यं साहाय्यं कृतं सैनिकानाम् । बंगलोरे निर्मितैः 'जेट' नाम लघुविमानैः, अमेरिकायाः प्राप्तानां 'सेबर' नाम पाकस्य गुरुविमानानां निपातने वा निःसारणे महत्कौशलं प्रदर्शितं अस्मद्वैमानिकैः ।

दिवाकरः— क्षुद्रपिपीलिकयापि मत्तगजेंद्रः परिभूयते, तत्कर्णप्रवेशनेन मर्माणि तीव्रदंशेन च । ततः—

अभयः— एवं निर्भिन्नशत्रुप्रतीकारैः अस्मद्वैमानिकैः लाहोरादिपाकतलाः उद्ध्वस्ताः, रहः निरीक्ष्य स्फोटकद्रव्य–शस्त्रास्त्रसंचयाश्च अग्निवृष्ट्या प्रज्वालिताः।

उषा— शोभनं शोभनम्।

अभयः— अस्मिन् कार्ये कीलरकपिलाभ्यां विशेषविक्रमार्थं, गौरवास्पदं वीरचक्रं संपादितं शासनात्।

उषा— महिलाभिरपि वैमानिकाभिः भवितव्यं, स्वकर्तृत्वं च प्रकटितव्यं इति प्रस्फुरति मद्हृदये एतद्वृत्तश्रवणेन।

अभयः— अवश्यम्। अस्मच्छासनं स्त्रीपुरुषयोः समभावेन वर्तते वृत्तिदानविषये। गुणवत्ता एव प्रमाणीक्रियते इदानीं तेन।

दिवाकरः— अथ गृह्यतां कौतुकनिवेदनसूत्रम्।

अभयः— चिनायनामा अस्मद्वैमानिकः शत्रुणा विद्धात् विमानात् छत्रहस्तः पाकभूमौ अवतीर्णः निरीक्षितः पाकचारैः।

अरविंदः— हन्त! अपि गृहीतः।

अभयः— न हि! युक्तिप्रयुक्तिभिः निभृतं लंघिता तेन शत्रोः दृष्टिः, प्राप्तं च स्वसेनास्थानकम्।

उषा— कथं नु?

अभयः— विरूढतृणक्षेत्रे अंतर्हितः सः प्रथमं महत्त्वपूर्णपत्राणि अग्निसात् अकरोत्। परं—

दिवाकरः— किं परम्—

अभयः— स्वस्य संभाव्यग्रहणेन शत्रुहस्ते पतिष्यमाणानि महत्त्वपूर्णपत्राणि नाशयता तेन प्रदीप्तज्वालया आत्मानमेव आविष्कृतं अनवधानात्।

अरविंदः— अहह! ततः—

अभयः— तेन प्रथमं स्ववेषे देदीप्यमानानि गंडस्वाधिकारमुद्रादिवस्तूनि (Buttons, badges etc.) पंकेन विलेपितानि।

उषा— अहो कौशलम्। अहो प्रसंगावधानम्। ततः—

अभयः— ततः तृणमध्यात् अनुभुवं सर्प इव शनैः निःशब्दं च स्वसेनास्थानकदिशं प्रति उपसर्पन् सः अशंकत यत् केनापि पौरेण अवलोकिता स्वोपस्थितिः।

दिवाकरः— दारुणं खलु संकटं उपपन्नम्। ततः—

अभयः— श्वासं कष्टेन विरुध्य आसूर्यास्तं तत्रैव, कथमपि कालं यापयित्वा निशान्धकारे धावित्वा स्वसेनास्थानकं प्रापः होराद्वयं च बद्धः, तस्य भारतीयत्वे लब्धप्रत्यये मुक्तः प्रेषितश्च स्वस्थानकम्।

उषा— श्रोतुं रमणीयाऽपि सा कथा–घटना प्राणसंकटं खलु नायकस्य।

अभयः— अथ श्रूयतां इच्छोगिलप्रवाह–विजय–कौतुकम्।

दिवाकरः— उच्यताम्।

अभयः— कलकत्ता–लाहोरमार्गं यत्र एनं प्रवाहं लंघयति तत्र डोगराई–नामग्रामः तिष्ठति। तस्य दक्षिणतः बर्कीनामग्रामे शत्रोः लोह–सुधारचितं स्फोटकसामग्री–युक्तं (Pill box) रक्षकनिवासं रात्रौरहः निरीक्ष्य बाला-

रामनाम्ना अस्मत्सैनिकेन तस्य द्वारे यावल्लताप्रहारः कृतः, तावत् अनवधानेन अंतः अबद्धं तत् सहसा अपावृतम्। तत्क्षणे हस्तगतः अग्निगोलकः बाळारामेण अंतः प्रक्षिप्तः !

उषा— साधु ! साधु ! स च प्रस्फोट्य पाकरक्षकान् स्फोटकद्रव्येण सह भस्मीचकार इत्येव न ननु परिणामः ?

अभयः— आं भगिनि, यथार्थं तर्कितं भवत्या। शत्रुरक्षकेषु भस्मीभूतेषु, तत्स्थानकं ग्रामेण सह विनायासं भारतीयसेनाहस्तं, आगतम्।

अरविंदः— ततः—

अभयः— डोगराई ग्रामोऽपि निशीथघनांधकारे जाटसेनाधिपेन-कर्नेल यूजीन हेड नामकेन महता पराक्रमेण शत्रोः हस्तात् गृहीतः, अवधीर्य अग्निवृष्टिं उपरिनिर्दिष्टसमान-रक्षकविशेषनिवासात् प्रभाते च इच्छोगिलप्रवाहस्य पूर्वतीरं आसाद्य भारतीयसेना परतीरस्थ-पाकसेनां स्वसामर्थ्येन निगृह्णन्तीव व्यद्योतत। लाहोरं तु ततः षट्क्रोशमात्रं दूरं तस्थौ।

उषा— यदि लाहोरं अग्रहीष्यत तर्हि—

अभयः— न दुष्करं कर्म तत् आसीत् परं न तथा उद्देशः आसीत् महामंत्रिणः पाकसमग्रराज्यं निर्जेतुम्। अन्यच्च स्वदेशे एव अन्नसमस्यायां जटिलायां संवृत्तायां, लाहोरसदृशस्य बृहल्लोकसंख्याकनगरस्य निर्वाहनियमनभारं स्वीकर्तुं अयोग्यं अभविष्यत्।

उषा— आम्, ज्ञातं उचितकारणम्।

दिवाकरः— महामंत्रिणा अवलंबितया नीत्या पाकस्य समरसामर्थ्यस्य विध्वंसनं उद्दिष्टं, न तु पाकप्रदेशसंपादनं इति अवधेयम्। किं विशेषं कथनीयं अवशिष्टम्।

अभयः— हुतात्मनां, अबदुल हमीदः, तारापोरः दुआ-नरेंद्रः इत्यादीनां कथाः यथावसरं कथयिष्यामि वा ज्ञायेत वृत्तपत्रेभ्यः। इदानीं नौदलप्रमुखेन सोमणमहाशयेन, सावधानं सिंधुसागरतटं भारतपश्चिमदिग्संस्थं रक्षता, द्वारकायां प्रतिष्ठितं, रिपोः वैमानिकाक्रमणस्य पूर्वसूचनां ददत् 'रडार' नाम अस्मद्यंत्रं पाक-प्रहारात् सुगुप्तमिति विशेषं कार्यं उल्लिख्य विरमामि।

दिवाकरः— अभयमहोदय, भवता अनुगृहीतौ आवां नवसमरकौतुकनिवेदनेन एतावत्कालपर्यंतं सोल्लासं परिश्रमेण च। (उषां प्रति दृष्टिं प्रक्षिप्य) देवि, कुरु मधुरं भूलोकामृतं नाम चायं सत्वरं मान्यवरनिवेदयितुः श्रमपरिहारार्थम्।

उषा— यथाज्ञापयति पतिदेवः। (उत्तिष्ठति)

अभयः— श्रोतॄणामपि श्रमपरिहारार्थं तैरपि अनुगृहीतोऽस्मि प्रियकथाकथनाय अवसरप्रदानेन, सावधानश्रवणेन च।

अरविंदः— यथार्थमाह भागिनेयः।

श्रोतोत्सुकस्तथा वक्ता कौतुकं वक्तुमातुरः।
ईदृग्योगः क्षुधार्तान्नदित्स्वोरिव सुदुर्लभः॥

[क्रमशः]

(जवनिकापातः)

अमृतलता - नो० ६६ व फे० ७८

श्री विश्वनाथः केशवः छत्रे

अन्वर्थको लाल 'बहादुरो'ऽभूत्

[गताङ्कतोऽग्रे]

[प्रवेशः— ४]

(ताश्कंद-संधिनिमंत्रण-विमर्शः)

[दिल्लीनगर्यां शास्त्री, यशवंतरावः, नंदः स्वर्णसिंगश्च विमृशंति ताश्कंदनिमंत्रणम्]

लालबहादुरः— वयस्याः, ताश्कंद-साम-मेलनाय कोसीजिनसमेन जागतिक-बलिष्ठेन राष्ट्रनायकेन मध्यस्थत्वेन प्रेषितं निमंत्रणं, शंकितेऽपि यशसि, अस्वीकर्तुं अनुचितं भवेत् इति मन्ये ।

स्वर्णसिंहः— आम् । निमंत्रणस्य अस्वीकारेण, शांतिमंत्रं जपन् भारतः प्रत्यक्षानुष्ठाने विपरीतमेव वर्तते इति जगन्निंदाभाजनं भविष्यति ।

लालबहादुरः— निमंत्रणे महदौदार्यं प्रदर्शयतः कोसीजिनस्य हृदये स्वार्थः निगूढः इति अभिज्ञातं किम् ।

स्वर्णसिंहः— स्वप्रतिष्ठाभिवर्धनस्य स्वार्थः इति तर्कयामि ।

यशवंतरावः— आम् । नचिरात् अपूर्वः उज्ज्वलश्च विजयः पाकपराभवेन भारतेन संपादितः स्वतंत्ररीत्या । ततः तस्य जगति प्रतिष्ठा अकस्मात् विवृद्धा निर्भरम् ।

नंदः— सा प्रतिष्ठा स्वयंस्फूर्त्या भारत-पाक-संधिं साधयित्वा ऊनीकर्तव्या स्वीया च वर्धयितव्या विना अधिकायासं इति कोसीजिनस्य हेतुः ।

यशवंतरावः— तथा सत्यपि निमंत्रणं अवश्यं स्वीकर्तव्यं भारतेन । परं सामभंग-शीलेन पाकेन नवसामपालनं कारयितुं आश्वासनं कोसीजिनतः सामचर्चा-पूर्वमेव अधिगंतव्यमिति युक्तं स्यात् ।

नंदः— मध्यस्थत्वं सः तत्र करोति इत्येव ननु लिखितं आश्वासनं तस्य ।

यशवंतरावः— परं साम-समये मनोगतां एनां शंकां प्रकटय्य तन्मुखेन संभाषणौघे तदाश्वसनं युक्त्या अधिगंतव्यं इति उचितम् ।

लालबहादुरः— आम् प्रयतामहै तथा ।

यशवंतरावः— शास्त्रिमहाशयाः, पंचागस्टदिनांके धार्यमाणं भुवं भारतसेनया निवर्तितव्यं इति सामपदं अनर्थावहं खलु भारतस्य, यतः अस्माकं सैनिकैः प्राणपणेन विजितानां हाजीपीर-कारगीलसमानां महत्त्वपूर्णानां सेनास्थानकानां त्यागेन भारतः न केवलं दुर्बलतां गच्छेत्, परं भूयः पाकाक्रमणाय आमंत्रणमेव ततः स्वयं दद्यात् इति मे निश्चितं मतम् । तथा च संवृत्ते शतावधिभारतीय-सैनिकानां बलिदानं निष्फलतां गच्छेत् ।

स्वर्णसिंहः— विचारणीयः खलु अयं प्रश्नः ।

नंदः— भारतेन जयिष्णुवृत्त्या सह सर्वपक्षोपपक्षाणां ऐक्येन स्वसामर्थ्ये अनपेक्षि-तरीत्या प्रथममेव प्रकटिते, पाकस्य मर्मस्थानानि च बलाद् गृहीत्वा उज्ज्वल-विजये संपादिते, सः आत्मनाशाय भूयः आक्रमितुं धृष्णुयात् इति न संभाव्यते ।

लालबहादुरः— तादृग्दुर्बुद्ध्या पाकः मा आहतोऽस्तु इति मनःपूर्वकं इच्छामः ।

स्वर्णसिंहः— परं काश्मीरप्रश्नः नैव उपस्थापयितव्यः सामचर्चायां इति आदौ कथमपि स्वीकृत्यापि काश्मीरमभिलषन् पाकः यदि तं उपस्थापयेत् साग्रहं, कोसीजिनमाध्यस्थेनापि च तं न अवलोपयेत्, सद्यः एव चर्चायाः विरम्य निषेधार्थं सभात्यागस्य धैर्यं अस्माभिः प्रदर्शयितव्यम् ।

लालबहादुरः— अवश्यम् । स्वर्णसिंग, यशवंतराव, उभाभ्यामपि मया सह साम-चर्चार्थं आगत्य सर्वशः सहकार्यं देयम् ।

स्वर्णसिंहः— }
यशवंतरावः— } अवश्यमेव । सर्वशः सहकार्यं दास्यावः श्रीमताम् ।

लालबहादुरः— नंदमहाशय, अस्माकं अनुपस्थितौ भवान् सर्वामपि शासनव्य-वस्थां सावधानयथोचितरीत्या च रक्षिष्यति इत्यस्मिन् नास्ति मे संशय-लेशोऽपि ।

नंदः— आशासे यत् मन्मूर्ध्नि न्यस्तं शासनस्य गुरुभारं तथा प्रयत्नपूर्वकं वक्ष्यामि यथा भवान् परितोक्ष्यति ।

लालबहादुरः— प्रमुखपक्षाणां नेतॄन् एकैकशः आहूय मंत्रयिष्ये तैः सह। ईदृक्-महत्त्वपूर्णप्रश्ने सर्वपक्षाणां विचारवतां नेतॄणां दृष्टिकोणः अभिज्ञातुं उपयुक्तः स्यात्।

नंदः— साधु ! ततः तेषां विश्वासं संपाद्य सहकार्यमपि लभ्येत।

स्वर्णसिंहः— ताश्कंदनिमंत्रणवार्तायां प्रसृतायामेव कैश्चित् महद्भयं प्रकटितं यत् ताश्कंदचर्चायां भारतस्य सहभागित्वं तु स्वयं पञ्जरप्रवेशसमं अश्रेयस्करं प्रतीयेत शीघ्रमेव। अन्यच्च कोसीजिनस्य तीव्राग्रहेण अंत्यक्षणे विपरीतमेव संमन्येत भारतेन।

स्वर्णसिंहः— दुर्दैववशात् तथा संवृत्ते हानिकरेऽर्थे प्रत्यक्षाचरणं नैव कर्तव्यं, लोकसभायाः असंमतिकारणं पुरस्कृत्य।

नंदः— यथा विवाहकारणे तथा राजकारणेऽपि हानिकरः समयभंगः क्षम्यः मतः।

लालबहादुरः— आम्। नंदमहाशय, तर्हि स्वीकुर्मः ताश्कंदनिमंत्रणम्। तदर्थं सर्वसिद्धता आयोजयितव्या।

नंदः— विधीयते सर्वापि समुचितव्यवस्था। महामंत्रिणा तत्र निश्चिंतेन स्थातव्यम्।

स्वर्णसिंहः— यत्सत्यं निरंतराक्रमणेन महतीं शिरोवेदनां उत्पादयता, भीषण-युद्धे च हठात् भारतं प्रवर्तयता दुर्जनेन सह मध्यस्थप्रेरणया निर्मलहृदयेन सामचर्चा दुष्करं खलु कर्म।

लालबहादुरः— अपरिहार्यमिदं सत्ताधीशानाम्। व्यवहारेऽपि ईदृशः प्रसंगः उत्पद्यते। अत्र धर्मराजः आदर्शभूतः तिष्ठति। सर्वस्वं कपटद्यूतेन अपहरन्, साध्वीं द्रौपदीं सभायां धर्षयन्, द्वादशवर्षाणि च वनवासं गमयन् दुर्योधनः न हि सुयोधनः– मातृभिः सह बद्धः गंधर्वैः इति श्रुत्वैव धर्मराजः, भीमार्जुनौ प्रेरयामास भ्रातृविमोचनाय गंधर्वपराभवेन।

भगवानपि गीतायाः एकादशाध्यायांते भक्तोत्तमलक्षणेषु "निर्वैरः सर्वभूतेषु" इति पदेन वैरिण्यपि परमात्मतत्त्वं द्रष्टुं उपदिशति।

यशवंतरावः— शास्त्रिमहाशयाः, भगवद्गीता सरहस्यं सम्यग् अधीता श्रीमद्भिः इति लब्धप्रत्ययः मुदितोऽस्मि। प्रेरितोऽस्मि बलवत् अद्य तस्याः अद्वैतामृत-वर्षिण्याः अध्ययने चिंतने च अनवरतम्।

नंदः— अद्य पुरा कृतो मम गीताभ्यासः उज्जीवितः इव।

स्वर्णसिंहः— शास्त्रिसहवासे सोदाहरणं गीतारहस्यश्रवणं तु अन्यतमः लाभः।

लालबहादुरः— जगन्मान्यः अयं ग्रंथः मम सुहृन्मनः आचकर्ष इति न चित्रम्। साधयामः वयं इदानीं स्वस्वकार्ये अवधातुम्।

—जवनिकापातः—

*

[प्रवेशः— ५]

[कोसीजिनः, आयूबखानः, लालबहादुरश्च ताश्कंद-सभागृहे]

कोसीजिनः— मान्यवरौ भारतपाक-प्रमुखौ, अभिनंदनं हार्दिकं युवयोः। भवद्भ्यां मन्निमंत्रणं आदृत्य, अत्रागत्य च गतसप्ताहे, मुक्तमनसा चर्चा मन्निर्दिष्टमार्गेण विहिता इत्यर्थं प्रीतोऽस्मि। सफलीभूतः इव मन्मनोरथः। इदानीं अंतिमकार्यं नाम (सामपत्रस्य) उभाभ्यां स्वस्व नामलेखनेन सनाथीकरणमेव अवशिष्टम्। तत् क्रियताम्। [सामपत्रं आयूबं प्रति ददाति] आयूबमहाशयाः, प्रथमं, भवता— कनीयसा भ्रात्रा।

(आयूबः सामपत्रे सकृद् दृष्टिं प्रक्षिप्य असंतोषं अनुत्साहं च प्रकटयति स्वाक्षरीकरणाय)

कोसीजिनः— (आयूबखानं स्वाक्षरीकरणे तादृशं निरुत्साहं अवलोक्य) खानमहाशयाः किमर्थं व्याशंक्यते भवता। क्रियतां स्वाक्षरी उभयोः देशयोः कल्याणाय निःशंकम्।

आयूबः— अस्मिन् काश्मीर-प्रश्नस्तु अनिर्णीतः!

कोसीजिनः— भारतस्य अंतर्गतप्रश्नः सः नैव चर्चायां समावेशं लप्स्यते इति आदौ एव स्पष्टीकृतम्।

लालबहादुरः— (स्वगतम्) साधु! कोसीजिन साधु!

आयूबः— परम्—

कोसीजिनः— न परम्— तु— मित्रवर्य, यदि दुराग्रहेण भवान् स्वाक्षरीमत्र न कुर्यात् संयुक्तराष्ट्रसभायां काश्मीरप्रश्ने भवत्प्रतिनिधिना उपस्थिते, रूसः निषेधाधिकारं उपयोक्ष्यति इति चित्ते अवधार्यताम्।

लालबहादुरः— (स्वगतम्) एषा तर्जनात्मिका सूचना मदर्थमपि मंतव्या मया अनभिहिता।

आयूबः— (स्वगतम्) बलिष्ठस्य पुरतः दुराग्रहः नाम निमंत्रणं आत्मनाशाय, विशेषेण तु पराजितस्य जगत्सहानुभूत्या च वंचित स्यमादृशस्य पाकाधिपस्य। अगतिकत्वेन करोमि स्वाक्षरीम् (प्रकाशं) अथ करोमि मित्रवर्यस्य इच्छानुसारम् (स्वाक्षरीं करोति)।

कोसीजिनः— (शास्त्रिणां पुरतः सामपत्रं कृत्वा) शास्त्रिवर्य, अलंक्रियतामिदं स्वाक्षरीलेखनेन।

लालबहादुरः— दीयताम्। करोमि सद्यः सुहृद्वर्यमनोरथपूरणम्। (स्वाक्षरीं करोति प्रत्यर्पयति च सामपत्रम्)

सीजिनः-- धन्योऽहमद्य खलु संवृत्तः। उदारधियौ पुरुषौ! हस्तांदोलनेन इदानीं आविष्क्रियतां उभयोः स्नेहोदयः (तयोः हस्तांदोलनं कारयति) वयस्यौ, पुराणभ्रातरौ इदानीं प्रतिवोशिनौ युवाम्। इतः परं समरः सर्वथा हेयः। समरे नाशः उभयोः नवस्वतंत्रयोः। कस्यापि वादस्य उपशमः कर्तव्यः परस्परभूमिकां प्रथमं निर्मलहृदयेन विज्ञाय, सौजन्येन भ्रातृभावेन च चर्चां विधाय, अवश्यं चेत् मध्यस्थसाहाय्यं याचित्वा, इति न विस्मर्तव्यम्। विगतं न शोच्यम्

× स्मृत्वा प्रभुं जीवति वर्तमाने।
कार्यं कुरुध्वं। मनसा कुरुध्वम्!!

इति प्रख्यातांग्लकव्युक्तिं अनुस्मृत्य स्वस्वराष्ट्रस्य उत्कर्षाय दत्तावधानाभ्यां भवितव्यमुभाभ्याम्। जगच्छांतये साहाय्यीभूतं इमं संधिं संमानयंतौ भवंतौ धन्यवादप्रदानेन मया संमान्येते। प्रतिपाल्यतां अयं संधिः यथाक्षरं यथाभावं च। आदर्शभूतः स भूयात् कलहायमानां राष्ट्राणां अखिले जगति चिराय, इत्युक्त्वा समाप्तं सामकार्यमिति उद्घोषयामि।

उभाभ्यां सह हस्तांदोलनं करोति।

(जवनिकापातः)

× × ×

[लालबहादुरः स्वनिवासे दूरध्वनियंत्रात् ललितादेव्या सह संवदति]

लबहादुरः— अयि देवि। अयं लालबहादुरः वदति ताश्कंदात्।

लितादेवी— (प्रतिभाषते) साधु! अपि कुशलम्।

लबहादुरः— आम्! भगवत्कृपया! समाप्तं सामकार्यम्। श्वः काबूलं गत्वा तत्र दिनैकं विश्रम्य परेद्युः गृहं आगमिष्यामि। प्रणामः जनन्यै कथयितव्यः।

लिता— अवश्यम्। प्रतीक्षेऽहं परेद्युः। निश्चयेन आगच्छतु आर्यपुत्रः।

लबहादुरः— अत्रत्यः यजमानः मम स्वास्थ्यचिंतां सर्वात्मना वहति। स्वगृहे एव अहमिति अनुभवामि। अतः मम चिंतया अलम्। इदानीं निद्रादेवी मामादिशति शय्याश्रयणाय। साधयामि।

लिता— बाढम्। (स्थाने निदधाति)

× Act! act! in the living present
Hea within and God overhead. — Longfellow

लालबहादुरः— (शय्यामाश्रित्य) (स्वगतम्) गतसप्ताहस्य प्रदीर्घवादविवादेन अतीव श्रान्तोऽस्मि इति प्रतीयते। भवतु। गाढनिद्रया श्रमपरिहारः स्यात्। सामकार्यं समाप्तमिति श्रमसाफल्यं खलु मंतव्यम्। न संतोषावहः सः संधिः परमार्थतः मम वा कस्यापि मातृभूभक्तस्य। परं किं करोमि? राजनीत्यां विशेषेण परराष्ट्रनीत्यां सर्वशः संतोषावहः संधिः अशक्यप्रायः। हाजीपीर–कारगीलसमयोः महत्त्वपूर्णयोः सैन्यस्थानकयोः त्यागः मया संमतः मनोविरुद्धम्। जनसंघादिपक्षाः तत्तद्वृत्तश्रवणमात्रेण क्षुब्धाः स्वकीयं उग्रं निषेधं प्रकटयिष्यंति यथा पुरा कच्छसंधिविरुद्धम्। न अस्थाने स्यात् सः क्षोभः तेषाम्। नैकशतसैनिकैर्हि बलिदानं मुदैव कृतं, शत्रोः हस्तात् सर्वशक्त्या ग्रहीतुं हाजीपीरकारगीलस्थानकौ। अनाथत्वं गताः तेषां भार्याः वा वृद्धमातरः अश्रुपूर्णनयनैः सरोषं तीक्ष्णं च मयि दृष्टिक्षेपं विधाय मा पृच्छंतीव उच्चैः। 'किं मम पतिदेवेन वत्सेन वा प्राणपणेन जितानि स्वीयानि सैन्यस्थानकानि शत्रवे भूयः प्रत्यर्पयितुं अपेक्षितानि आसन्। कोऽधिकारस्ते तस्य रुधिरस्रावं विफलीकर्तुम्।' नहि! नहि! भगिनि, अम्ब! सामपत्रे अगतिकत्वेन तत् संमतमपि लोक-सभायाः संमतिं विना नैव अनुस्थास्यामि इति विश्वसितव्यम्। हा! अम्ब! रामदुलारि, देवि ललिते, हृदये वेदना सहसा समुदिता। अयि! असह्या एव सा। (द्वारं धावित्वा) भोः भिषग्वर्य, इतः सत्वरम्। (शयित्वा नेत्रे निमील्य च) हा! देहत्यागक्षणः प्राप्तः इव आभाति। श्रीराम प्रभो! आगतोऽस्मि भवच्चरणसंनिधौ। तवाज्ञा मे प्रमाणम्।

भगवन्, नूतनः भारतपाकसंधिः विजयिनः भारतस्य प्रतिष्ठोचितो नास्ति इति जानतापि मया संमतः उभयोः देशयोः स्वास्थ्यार्थं अभ्युदयार्थं च। कोऽपि वादग्रस्तः प्रश्नः युद्धेन शमयितुं अशक्यः इति नूतनानुभवेन पाकाधिपः नचिरात् विजानातु। भोः श्रीराम, अखिलजीवने यद्यत्कर्म–यशस्वि वा अयशस्वि मया अनुष्ठितं, तत्तत् त्वत्प्रेरणयैव। अतः तत्सर्वं त्वच्चरणयोः समर्पयामि। हन्त! अम्ब रामदुलारि, देवि ललिते, क्षम्यतां अयं जनः वंचनार्थं प्रतिश्रुतदर्शनविषये। अगतिकोऽस्मि। अन्त्यक्षणे आवयोः परस्परदर्शनं आपृच्छां च नेच्छति भगवान्। तदिच्छा प्रमाणीकर्तव्या। अन्ते जीवः एकः–एकमात्रः–श्रीराम–श्री–रा–म–रा–म—

[शास्त्रिणः आत्मा पार्थिवं देहं त्यक्त्वा अनन्ते परमात्वतत्त्वे विलीयते]

❀ ❀ ❀

विषये-
प्रकाशनम्. नाटकमस्य हृदयम्
सञ्जलाकृतिविनिर्मितौ स्यात्
कारणं तु चरते ऽनयेप्सितम् ।
कौमुदीव मतिषोधितो दधौ
राघवस्य सुरसां कुले कथाम् ॥
मुंबापुर्यां पदपथे सार्धत्रयसप्तकं-
मूल्यं F. Y. Sanskrit poetical
Selections 1931 काव्यालोचनेन प्रकाश-
मे रिक्तस्थाने विद्यया आपकदर्शनेन
एव मया स्वकीयं अस्य नाटकस्य
निर्माणकारणम् ।
महाविद्यालयाशीर्वादात् छात्रमानु-
शोधनकृत्या सह दुर्दैवं मां बाधासीत्
एव अधरायं कुटुंबपोषणार्थं ए 3 P. Ry
कार्यालये लेखनैककृत्ते मया अगाहयत् ।
तत्र स्वकार्यं कुर्वन्नपि अहं अवृत्तौ
संस्कृतविशेषाध्ययनकालस्य सावलंबनेन
पूरयितुं शनैः शनैः प्रयतमानः अस्मि ।
दूरपिनृव्येण कै० बापुना नाथे संस्कृता
पिरुचेः बाल्ये उत्पादिता । कै० नाथोदेवी
माकरसो व्यासेश्वर मदज्ञानदशायां दिवंगतेत्य
[illegible] आजुवंशेकं संस्कारा

संस्कृताध्ययनप्रगतये मम साहाय्यार्थं अ-
कुर्वन् तथा १९५४ तमे अब्दे क्षयरोगेण
बाधितः मया ग्राहितः दीर्घकालं विरामोऽपि
भवेत्तथापि पुनरस्य नियुक्तयर्थं, तेन
सादरं प्रकाशीताः लघुकथाः कविताः
च तादृशरचनायै महां प्रोत्साहनं दत्तं
मया विरचितानायाः 'भारतीयनारीरत्ने-
मालायाः सद्यः प्रकाशः प्रकाशनं तु मयि
संस्कृतलेखने आत्मविश्वासं अजनयत्।

भासनाटकचक्रस्य, मराठी-अनु-
वादः, 'दशकेषो नाटके' नाम मराठी
पुस्तकं कै० स्कंदस्वोत विरचितानि
लक्ष्मीने संस्कृतनाटकानि, तथा मोह-
मयो-ग्राहयासमा-प्रदारीतानि स्वतंत्राणि
अनुवादात्मकानि च संस्कृतनाटकानि
मां संस्कृतनाट्यरचनायै बलवत् अभोद
यत्। 'स्वाक्षरी जवाहर' 'आद्यकोण
आँत्यजतर्पणम्' नाम मम नाटकानि
रासिकप्रीतिम् अवाप्नोत् इति दृष्ट्वा
प्रोत्साहितः अहं गुणवत्तरं संस्कृतनाट्यं
[illegible] आकरः भवेत्।

नाटककारस्य हृद्गतम्-

अमरनिर्देश्ट ए.ए संस्कृतपद्यसंग्रहे मया पठितः अश्वघोषविरचितबुद्धचरितस्य नगरभ्रमणसर्गः विशेषेण मे प्रीतिं जनयतां गतः, चिरेण सेवानेत्रोः अनतरं मां साधयं तत्काव्यं पठितुं प्रेरितवान् परं हेतो! अत्यंतहृदयस्पर्शी सिद्धार्थस्य प्रव्रजनप्रसंगः कविना न वर्णितः दुष्टः मया स्वकल्पनानुसारम्। अतः विनुद्दो-रसहेतुं इदं नाटकं मया विरचितं श्री-शारदाकृपया।

प्रा० सप्तर्षि, प्रा० रं० वा० देशपांडे, पं० श्रीगणेशशास्त्री-जोशी (पुण्यपुरी) श्री-भया राव-लिंडे इत्येतेभ्यः रसिकसुहृद्भ्यः धन्यवादान् अर्पयामि अभिवस्तुनार्थं, स्वा-प्रशंसार्थं च।

प्राक्तनपुस्तिकाम् अस्य हस्तलिखितं मत्तः अर्थयित्वा आदरात् तस्य प्रकाशनं सादरं कृतवतां 'विश्वसंस्कृतम्' (होशियार-पुरम्) संपादकमहाशयानाम् आनुकूल्यसंपाद-नाय तु नूनमसमर्थोऽहम् इत्यलम्।

नाट्यशास्त्रिकानां
वशंवदः
भ्रमेऽन्ते

वि० के० भ्रमेशास्त्री
जोशीकरवाडा, सिद्धेश्वर
[illegible]

सं० सिद्धार्थ - प्रव्रजनम् -

पात्र - परिचयः

१ शुद्धोदनः शाक्य ज्ञातिः
२ मायावती - राज्ञी
३ सिद्धार्थः युवराजः
४ गौतमी - सिद्धार्थस्य सापत्नमाता
५ नंदः गौतमीपुत्रः
६ यशोधरा - युवराज्ञी
७ राहुलः सिद्धार्थपुत्रः
८ मंगला - दासी
९ प्रतीहारी
१० कुलगुरुः राज्ञः
११ राजवर्मा - मुख्यामात्यः
१२ जयः युवराजसेवकः वयस्यरूपोऽपि
१३ वीरसिंहः राजपुत्रः
१४ आचार्यः राज - ज्योतिषिकः
१५ लंबोदरः स्थविरद्विजः
१६ विद्याधरः पुरोहितः
१७ मुकुंदः विद्याधरपुत्रः
१८ नारायणः कुलगुरु पुत्रः
१९ गौरिका - कुलगुरु - कन्या
२० न्यायाधीशः
२१ कार्यवाहः न्याय सभायाः
२२ देवदत्तः सिद्धार्थस्य प्रतिस्पर्धी राजपुत्रः

सिद्धार्थ-प्रव्रजनम्

विश्वनाथकेशवः छत्रे*

(प्रस्तावना)

[पटे अपगते सूत्रधारो गायन् दृश्यते]

वन्दनमयि ! मातः शारदे ॥ध्रु०॥

वससि कवीनां हृदये प्रीत्या जगतीति प्रथितम् ॥१॥
नवनवकाव्ये संप्रेर्य च तान्, प्रसादयसि विश्वम् ॥२॥
भावजगति विक्रीडतः कवेर् नश्यति भवदुःखम् ॥३॥
भावविदामपि; कृपाऽस्मासु ते, विलसत्वयि ! सततम् ॥४॥

(नेपथ्याभिमुखम् अवलोक्य) आर्ये ! यद् अशेषं नेपथ्य-विधानं यथोचितं विरचितम् इतस् तावद् आगम्यताम् ।

नटी—(प्रविश्य) आर्यपुत्र ! इयम् अहम् अस्मि ।

सूत्रधारः—प्रिये, इदानींतने कठिन-काले, अन्न-समस्या, निवास-प्रश्नः, शिक्षण-दुःस्थितिः, प्रत्यहं विवर्धमाना जीवनावश्यक-वस्तूनां महार्घता, वृत्यर्थं दैनंदिन-प्रवास-संकटं, वृत्ति-दुर्लभत्वम् इत्यादिभिः पीड्यमाना अप्य एते [युम्बापुरी]-नाट्य-रसिका गार्वाण-वाक्-प्रेम्णैव अत्रोपस्थिताः । एतेषां साप्ताहिक-विश्राम-दिवसस् तु कार्य-बाहुल्येन व्याप्तः, क्षणवत् कदा कथं वाऽस्तं गच्छतीत्य् अपि न ज्ञायते । स्वच्छन्दं प्रातः शय्या-त्यागः, स्त्रीपुत्र-कन्याभिः सार्धं सुख-संवादः, शाक-फल-वस्त्र-पात्रादीनां क्रयणम्, आप्त-मित्रादिकानाम् अभ्यागतानां च सत्कारः, संबन्धिनां सुहृदां च गृहं गत्वा तेषां कुशल-पृच्छा, विलम्बित-पत्र-लेखनम्, उद्यानस्य वा सागर-तीरस्य गमनं, चित्र-दर्शनं, काले च वर-वधूवरणम् इत्य् एतानि कार्याण्य् एकस्मिन् एव दिवसे सम्पादयितुं नित्यं प्रवर्तमाना एते अद्य स्वीयानि

*जोगळेकरवाडा, सिद्धेश्वर आळी, कल्याण (जि० ठाणे) ।

बहूनि कार्याण्य् अपमार्थं अत्र देववाणी-प्रेरणैव आगताः; अतस् ते विनोदयितव्याः सर्व-प्रयत्नैः ।

नटी—यथाऽऽदिशत्य् आर्यपुत्रः ।

सूत्रधारः—अद्य गीर्वाण-वाण्यनुरागिणा कल्याणनगरी-वास्तव्येन विश्वनाथकेशव छत्रे नामधेयेन स्वान्तःसुखाय विरचितं 'सिद्धार्थ-प्रव्रजनम्' नाम संगीत-नाटकम् अभिनेतव्यम् ।

नटी—यथाज्ञापयत्य् आर्यपुत्रः, तथैवाऽस्तु ।

सूत्रधारः—एतद् अवश्यम् अवधेयं यत् प्रथमोऽयं प्रयासो नाटककारस्य।

नटी—किं प्रथमम् एव नाटकम् इति ।

सूत्रधारः—आम् प्रथमम् एव, अत एव सर्वाभिर् नट-नटीभिः स्व-स्व-नियुक्तं कार्यं सावधानं सम्पादयितव्यम् ।

नटी—(मध्ये एव) येन अस्मिन् नाटके रसिकानां परितोषं गते नवनव-नाटक-रचनायां प्रवृत्तो भवेत् कविः ।

सूत्रधारः—प्रिये अभिनन्दनीयं ते वैदग्ध्यम् । धन्योऽस्मि त्वया ।

नटी—अल प्रशंसया (नेपथ्ये 'नाथ प्रबुध्यताम्' नाथ प्रबुध्यताम्') (कर्णदत्वा) आर्य ! राज्ञी मायावती प्रबोधयति हर्षातिशयाद् भर्तारम् । एते सज्जना अपि नाटक-दर्शनाय प्रोत्कण्ठित-मानसाः प्रतीयन्ते, पात्रोपविष्टा बुभुक्षिता इव भोजनारम्भाय ।

सूत्र०—तर्हि शीघ्रं गत्वा स्वनियोगे सावधानं तिष्ठाव । (निष्क्रान्तौ)

(इति प्रस्तावना)

प्रथमं दृश्यम्

[समयः-प्रातः । स्थलम् राजमंदिरस्थं शय्यागृहम् । राजा शुद्धोदनो मञ्चके सुप्तः]

मायावती—(सत्वर प्रविश्य) नाथ ! प्रबुध्यताम् । नाथ ! प्रबुध्यताम् ।

शुद्धोदनः—(ससंभ्रमम् उत्थाय) कोऽस्ति, किम् अस्ति ।

मायावती—(ससंभ्रमम्) अहम् अस्मि ।

शुद्धोदनः—किमर्थं ससंम्भ्रमा त्वम् ? कथं सुपूर्वम् उत्थिता । किं ते त्वरा कारणम् ।

मायावती—अत्यद्भुतः स्वप्नो मया दृष्टः ।

शुद्धोदनः—कीदृशः ?

मायावती—अननुभूतपूर्वो मधुरो आनन्दमयः ; मधुरः, अतीवमधुरः ।

शुद्धो०—(मायावतीं विलोकयन्) प्रिये, उपविश्य कथय तावत् सविस्तरम् ।

माया०—भणामि , अवधेयम् ।

शुद्धो०—अवहितोऽस्मि ।

माया०—चतुर्भिर् दिव्य-पुरुषैर् अहं सहसा मञ्चकाद् उद्धृता, उत्तुङ्गपर्वत-शिखरं च नीता । भव्यसाल-वृक्षस्य अधश् च स्थापिता ।

शुद्धो०—अद्भुतेयं घटना । ततस् ततः–

माया०—तदा देवाङ्गनास् तत्र समायाताः । ताभिः सुगन्धि-जलेन मे माङ्गलिकं स्नानं सम्पादितम् । दिव्य-वस्त्राभरणैर् अलंकृत्य वा मां मञ्चके अस्वापयन्, पुनश् चाऽन्तर्हिताः । अद्वितीयैवाऽहं तत्र मञ्चके आसम् ।

शुद्धो०—शोभनः खल्व् अयं ते स्वप्नः । ततस् ततः ।

माया०—अचिराद् एवैकोऽतीव निर्मलो धवलः सुकुमारः करविधृत-श्वेतक-मलो गज-कलभो मन्दं मन्दं समागतः ।

शुद्धो०—शुभ-सूचकं प्रतीयते इदम् । ततस् ततः ।

माया०—दोलायमान-गत्या स माम् उपेत्य उच्छुण्डो मञ्चक-संलग्नः तस्थौ । अहं तु सम्भ्रान्ता, भय-ग्रस्ता च संवृत्ता ।

शुद्धो०—अपि पदाक्रान्ता त्वं तेन ।

माया०—न हि, नहि । स्वभावत एव अहं तदा भयार्ता अभवं परं न तेनाऽहं मनाग् अप्य् अवमृष्टा । प्रत्युत, त्रिवारं मां प्रदक्षिणीकृत्य स स्वशुण्डाग्रेण मम सव्येतरम् उरो निष्पीडयितुं प्रवृत्तः । अहं तदा भृशं भयाकुलाऽभवम् ।

शुद्धो०—स्वाभाविकं खल्व् इदं हस्ति-सम-मत्त-प्राणिनो नारीणां विशेषतः ।

माया०—(मध्य एव) परम् आश्चर्यम् इदं यत् शुण्डाग्र-स्पर्शमात्रेण मम

अशेषा भीतिर् अस्तं गता। अतीव मधुरः स स्पर्शोऽननुभूतपूर्वश्च चानन्दः।

शुद्धो०—कथं न भवेत्!, ततः किं जातम्।

माया०—अनन्तरं स करि-शावक उत्तरोत्तर वपुषा सूक्ष्मो भूत्वा मम दक्षिण-कुक्षौ प्रविष्टः। तदानीं य आनन्दो मयानुभूतः सोऽपूर्व एव नितान्तं मधुरः स्वप्नः।

शुद्धो०—निःसंशयं मधुरः स्वप्नः। प्रायः प्रातःकालीनः स्वप्नः सत्यो भवतीति लोक-वादः। अस्तु तावत्। ज्योतिर्विदम् आहूय पृच्छाव फल-श्रुतिम्। प्रातर्विधिं तावद् निर्वर्तयावः।

[उभौ निष्क्रान्तौ]

द्वितीयं दृश्यम्

[शुद्धोदनो मायावती ज्योतिर्विच् च स्वे स्वे आसने उपविष्टा दृश्यन्ते]

शुद्धो०—आचार्य, अपि श्रुतोऽशेषः स्वप्न-वृत्तान्तो देवी-मुखात्।

आचार्यः—आम्।

शुद्धो०—कथ्यतां तावत् तत्-फल-श्रुतिः।

आचार्यः—(ऊर्ध्वं विलोक्य क्षणैकं विमृश्य) महाराज, देवि, श्रूयताम्—

स्वर्गीयाः पुरुषा दृष्टा देवीभिः स्नपनं शुभम्।
शिशुनोरःप्रपीडा च सूचयन्ति सुतोदयम्॥

शुद्धो० माया० च—अपि सत्यम्?

आचार्यः—सत्यं, सत्यं, सत्यम्।

शुद्धो०—यदि सत्या भवेद् भवदीया भविष्यवाणी, महाहं परितोषि दास्यामि। परम्……।

आचार्यः—परं किम्?

शुद्धो०—यदि सत्यं न भवेत्।

आचार्यः—किमर्थं संशयः। 'संशयात्मा विनश्यति'। सश्रद्धो ति

महाराजो महाराज्ञी च मदीय-भविष्य-वाण्याम् ।

शुद्धो०—श्रद्धा तु वर्तते, परं शङ्काऽऽकुलम् अति-मृदुलं मनः समाधातुं कोऽपि समयो विधीयताम् ।

आचार्यः—यदि मदीया वाणी दुर्विधिनाऽसत्यं भवेद् भविष्य-कथनं सद्य एव त्यजामि ।

शुद्धो०—समाहितोऽस्मि ।

राज्ञी—अहम् अपि तथा । परम् अस्त्य् अत्रैकः प्रश्नः ।

आचार्यः—भगतु महाराज्ञी ।

राज्ञी—कोऽवधिः प्रत्ययस्य ?

राजा—अर्थात् पुत्र-मुख-दर्शनस्य ।

आचार्यः—उभयोः कुतूहलं नैसर्गिकम् ।

'यत्नैरिष्टेऽप्यनाप्ते ना नैराश्यसुखमश्नुते' ।
इष्टे दृष्टे त्वसद्यैव तल्लाभार्थमधीरता' ॥

(श्रुणैकं विमृश्य) वर्षावधौ पुत्र-मुखं द्रक्ष्यथ उभौ ।

राजा—दिष्ट्या वर्धतां भवद्-यशः । कः कोऽत्र भोः ।

(प्रतीहारी प्रविशति)

प्रतीहारी—आज्ञापयतु महाराजः ।

राजा—आनय तावद् मुद्रा-शतकम् आचार्याणां सत्काराय ।

प्रतीहारी—यथाऽऽज्ञापयति महाराजः ।

(निष्क्रान्ता)

राजा—निवेद्यतां तावद् धर्मानुष्ठानं देवता-प्रसादनाय ।

आचार्यः—

शुभे विचारे रमतां मनोऽस्या
नित्यं तथा मङ्गलदर्शनेऽपि ।
विश्वेशलीलास्मरणानुगान-
ध्यानं विशेषेण भवेच्छिवाय ॥

प्रतीहारी—(प्रविश्य) देव, इदं मुद्राशतकम् (अर्पयति)।

राजा—(गृहीत्वा) आचार्य, स्वीक्रियताम् इदं पारितोषिकम्।

आचार्यः—(स्वीकृत्य) अनुगृहीतोऽस्मि। शीघ्रम् उद्भासतां राजभवनं युवराजस्य जन्मना।

[निष्क्रान्तः]

राजा—देव्याऽवहितया भवितव्यम् अतः परम् आचार्योपदेशे।

राज्ञी—अवश्यम् एव।

(निष्क्रान्तौ)

[शुद्धोदनो मञ्चके उपविष्टो दृश्यते]

शुद्धो०—कः कोऽत्र भोः।

प्रतीहारी—(प्रविश्य) आज्ञापयतु महाराजः।

शुद्धो०—कुत्र वर्तते तव स्वामिनीदानीम्।

प्रती०—राजोद्याने दोलायां निषण्णा स्वच्छन्दं गायतीति तर्कयामि।

शुद्धो०—कुत एषा वार्ता संपादिता।

प्रती०—महाराज, चिरपरिचित-मधुर-स्वरेणैव।

शुद्धो०—मार्गं दर्शय।

प्रती०—इत इतो महाराज।

(गमनं नाटयतः)

[जवनिकायाम् अपसारितायां राजोद्यानं दृश्यते]

शुद्धो०—अवितथम् ते तर्कः। दृष्टा स्वामनी गच्छेदानीं आत्मनो नियोगम् अशून्यं कुरु।

प्रति०—यथाज्ञापयति देवः। [निष्क्रान्ता]

शुद्धो०—(स्वगतम्) देवी गाननिमग्ना दृश्यते। अतोस्याऽऽम्र-वृक्षस्य पृष्ठतः प्रच्छन्नः शृणोमि तावद् अस्या मधुरालापान्।

माया०— सुखं यद्यज्जन्तुर्जगति विषयाज्जातु लभते।
न तत्तत्सर्वस्मिन् समय उत तावत्परिमितम्॥
सुखाय ग्रीष्मर्तौ भवति जलवृष्टिर्गगनतः।
परं सैवानिष्टा ननु परमदुःखाय शिशिरे॥

शुद्धो०—अहो स्वर-माधुर्यम् ! अहो अर्थगाम्भीर्यम्। तेजोविशेषेण देदीप्यमानं खलु प्रतीयतेऽद्य देव्या मुखमण्डलम् । अपि भविष्य-वाणी साफल्यस्य पुरःसरं प्रसाद-चिह्नम् भवेद् । दिष्ट्या एनां विनोदयितुं सुसमयः प्राप्तः । नीरव-पदैः पृष्ठतो गत्वाऽस्या अक्षिणी आवृणोमि पाणिभ्याम् । (तथा कृत्वा) अभिजानीहि कोऽहम् इति ।

माया०—मम प्राणनाथेतरः कोऽन्यः स्यात् ।

शुद्धो०—(स्त्रीशब्दं नाटयित्वा) न प्राणनाथः परं प्राणप्रिया सखी ।

माया०—नाथ, स्त्रीशब्दो नाटयितुं शक्यः, परं नैवोत्पादयितुं शक्यं नैसर्गिकं स्त्रियो मार्दवं स्वाङ्गुलिषु पुरुषेण । मुच्येतां मम नेत्रे कठोर-बन्धनात् ।

शुद्धो०—(नेत्रे विमोचयन्) जितं त्वया । पुरुषेण प्रबलतरोऽपि शत्रुर् जेतुं जातुचिच् शक्यः, परं न स्त्री-जनः ।

माया०—अलं स्त्री-जाति-प्रशंसनेन । क्षणे पादैः प्रहार्यते, क्षणे च शिरसि धार्यते स्त्री पुरुषेण ।

प्रतीहारी—(प्रविश्य) देव, देवदह-नगराद् दूत आगतः । इदं पत्रं तेन आनीतम् ।

(पुरस्करोति)

शुद्धो०—(उद्घाटय विलोक्य च) देवी निमन्त्रिता प्रसूत्यर्थं जनकेन ।

माया०—(सोल्लासम) मया तर्कितम् एव । किम् अभिप्रैति देवः ।

शुद्धो०—किं मेऽभिप्रायेण देव्या इच्छा प्रमाणं सर्वथा इदानीम् ।

माया०—ईदृक्-समये मातुः सांनिध्यं वरीय इति किं वक्तव्यम् ।

शुद्धो०—तथास्तु । (प्रतीहारीं प्रति) खाद्य-पान-वस्तु-विश्रमादिभिर् दूतः सत्कृतो वसत्व् अत्राद्य । श्वो ब्राह्मे मुहूर्ते देव्याः प्रस्थानं यथा भवेत् तथा व्यवसितव्यम् ।

प्रतीहारी—यथाऽऽज्ञापयति देवः (निष्क्रान्ता)

शुद्धो०—देवि ! वस्त्राऽऽभरणादिकम् आवश्यकं परिच्छदं सम्यग निबद्धुं दासीजना आज्ञापयितव्याः ।

माया०—सुष्ठु। परम् एतच्चरण-वियोगो मया कष्टेन सोढव्यो भवति।

(निःश्वसति दीर्घम्)

शुद्धो० - मा मैवम्। प्रसूतेर् अनन्तरम् अचिराद् एव त्वाम् प्रत्यानेष्यामि।

(उभौ निष्क्रान्तौ)

पटाक्षेपः

[सूर्यास्तसमयः। स्थानम्- नदीतटः। लम्बोदरः प्रविशति]

लम्बोदरः—(इतस्ततो विलोकयन्) भगवन् विचित्रा खलु तव लीला।

नदीतटं तीरमुदन्वनश् च
तारागणं नीलनभस्तथोर्ध्वम्।
सूर्योदयास्ते च विभो! विलोक्य
संसार-दुःखं शममस्त्यशेषम्॥

प्रभो! दुःखम् इव सुखम् अपि त्वया निर्मितम्। केवलदुःखेन प्राणिना जीवितुम् अशक्यम् इति विज्ञाय सुखम् अपि निर्मितम्। विद्युच्छलाकेव क्षणजीव्यपि तत् सुखं दुःख-राशिं क्षणार्धेन दहति, तूलराशिम् इव अग्निस्फुलिङ्गः। गृहे दारिद्र्यं प्रतिक्षणं हृदयं निर्भिनत्ति, पर्याप्तम् अन्न-वस्त्राद्यावश्यकवस्तु-जातम् अलब्ध्वा अपत्यान्य् आक्रन्दन्ति, गेहिन्य् अपि उद्विग्ना वाक्ताडनं करोति। अतः पलायनम् एव श्रेयसे। सायं प्रातश्च अत्रागत्य तव विश्व-रूपं स्मारयद् इदं निसर्ग-सौन्दर्यं दृष्ट्वा मे निर्विण्णं मनः सद्यो निर्वृतिम् एति। (अग्रे विलोक्य) अयं शिलाखण्डो मदर्थं एव ननु रक्षितः प्रतिभाति। अत्रोपविश्यास्ताचलं गच्छन्तं सूर्यनारायणं ध्यायन् श्रीविष्णुसहस्र-नाम-पठनं करोमि। (शिलायाम् उपविश्य मन्दस्वरेण स्तोत्रं पठति)

वीरसिंहः—(प्रविश्य) कोऽपि नित्याचारः साधुर् वाऽसाधुः, हानि कारकः ताप-प्रदः प्रतीयते असङ्ग-विशेषे पश्यत लोकाः सज्जनाः। अद्य अश्वारूढोऽहं शुभवार्ता-पत्रं स्वामिनं प्रापयितुं सत्वरं प्रस्थितः। परं मध्येमार्गं केनाऽपि ग्राव्णा स्खलित-पादोऽश्वः पतितोऽहं च दिष्ट्या रक्षितः। तं कस्याऽपि कृषकस्याधीनं विधाय पद्भ्यां चलितोऽस्मि। परं पदयात्राभ्यासाभावात् त्वरितोऽपि वेगेन गन्तुं नैव शक्नोमि। का गतिः। श्रान्तोऽस्मि। तृषार्तोऽस्मि। दिष्ट्या नदी दृश्यतेऽत्र

निर्मलोदका । क्षणकं हस्तौ पादौ प्रक्षाल्य तृष्णा-शमनं करोमि । (मूर्ध्नः उष्णीषम् अपनीय तटे जीर्णपर्णेषु निदधाति, जलं प्रविश्य च प्रक्षालित-हस्तपादः पिबत्य् उदकम् अञ्जलिपुटेन । निवृत्य उष्णीषम् उद्धृत्य शिरसि निधाय च त्वरया निष्क्रामति) ।

लम्बोदरः—स्तोत्र-पठनं सुकरं, परं नैव ध्यानम् । कस्यचित् क्षत्रियस्य आगमनेन मे ध्यानं भग्नम् । उष्णीषोद्धरणे किम् अपि शुभ्रवस्तु पतितम् अद्य इति तर्कयामि । पश्यामि तावत् (तीरं गत्वा निरीक्ष्य गलितं पत्रम् उद्धृत्य) इदं पत्रं तु राज-मुद्राङ्कितं दृश्यते । महत्त्व-पूर्णं स्यात् । अहो दृश्यतां तावद् अवधान-शून्यता राज-सेवकस्य । वराकः तर्जनं लभेत । आह्वयामि तम् उच्चैः । [पटान्तिकं गत्वा] कोऽत्र भोः ! कः ? हन्त ! निर्गतोऽसौ । अतिरिक्ता त्वरा एवं हानिप्रदा । प्रवासे स्वीयं वस्तुजातं दाक्ष्येण रक्षितव्यम् इत्यपि भूय उपदेष्टव्यं भवति यूनाम् । स्तनंधयानाम् अङ्गीयं वा शिरोवेष्टनं वा स्वकां कञ्चुलिकाम् अपि वा विस्मृत्य योषितो निर्गच्छन्ति । युवतीनां सुगन्धयुक्तं हस्तवस्त्रं वा केशपाशे निबद्धं सुन्दरं कुसुमं वा नैकवारं मार्गे पतितं दृष्टि-पथम् एति । ललनालङ्कारं कुत्राऽपि त्यजन्ति । वस्त्र-कोषे निगूढं रक्षणीयं धनं हस्ते प्रकटरीत्या स्वैश्वर्य-प्रकटनाय एव धृतं त्व् आपणे बहुशो लुंटयते काक-दृष्टि-लुण्टाकैः । अनुभव-चतुरा वयं गतवयसः सततं कण्ठे शोषं शोषम् उपदिशामः । परम् अधोमुख-कुम्भस्योपरि जलपातोपमं सर्वं भवति । (पत्रं सर्वतो निरीक्ष्य) अहो ? कुंकुम-प्रोक्षितम् इदं पत्रं निःशङ्कं सुशुभां वार्तां वहति । का नु स्यात् सा । अहा ! रुचिरैव कल्पना प्रस्फुरिता मे मस्तिष्के । द्रुतगत्या राजद्वारं गमिष्यामि, राज्ञे इदं सुशुभ-वार्ता-वाहकं पत्रं दत्वा पारितोषिकम् अवाप्स्यामि, तद्-धनेन गृहिणीं हर्षयिष्यामि, मधुर-रागांश् च श्रोष्यामि सर्वेषाम् आनन्दितानाम् ।

[हर्षोन्मादेन सजवं चलन् सम्मुखम् आगच्छता विद्याधरेण संघट्यते]

विद्याधरः—अयि ! कथम् अन्ध इव गच्छति ।

लम्बोदरः—नाऽहम् अन्धः ।

विद्याधरः—(संघट्टने स्थविरकराद् गलितं पत्रं दृष्ट्वा तद् उद्धृत्य) तात, इदं

तु राज-मुद्राङ्कितं शुभवार्ता-वहं पत्रम्। कथं भवतां हस्त-गतं जातम्।

लम्बोदरः—(पत्रम् आदातुं हस्तम् प्रसारयन्) हन्त ! त्वरायां गलितम् अधः। दीयताम्। तद् राजद्वारं सत्वरं नेतव्यम्।

विद्याधरः—अतित्वरायाम् अयं विद्याधरोऽपि न दृष्टः सम्मुखम्।

लम्बोदरः—आनन्दातिरेकात् सुखस्वप्नात्। दीयतां तावत् तत् पत्रम्।

विद्याधरः—(स्मयमानः) परं कुतो भवतो हस्तम् आगतम् इदं पत्रम्।

लम्बोदरः—कोऽपि राज-पुरुष इदम् उष्णीषे वहन् जलपान-समये तद् अपनीय तीरे न्यधात्। पीत-जलश्च त्वरार्त उष्णीषम् उद्धृत्य निर्गतः। उष्णीषाद् इदं गलितं तेन नावलोकितम्।

विद्याधरः—(सस्मितम्) ज्ञातम्। राजानम् इदं शुभवार्ता-पत्रं प्रापय्य पारितोषिकम् अपेक्ष्यते।

लम्बोदरः—अवश्यम् एव ! दारिद्र्य-नाशस्य सुवर्ण-सन्धिर् दिष्ट्या प्राप्तः। दीयतां पत्रम्।

विद्याधरः—परम् तात गत-वयसा भवता कथं त्वरया गन्तुं शक्यते। अहं शीघ्रतर प्रापयामि भवत्-कृते।

लम्बोदरः—(सोपहासम्) पारितोषिकं च स्वयम् एव ग्रहीष्यामि इति किमिति नोक्तम्। धूर्त ! अभिज्ञातं मया तव कपटम्।

विद्याधरः—तात ! नैव तथा। यद्यहं आदाव् एव दास्यामि भवते पारितोषिकं तर्हि--

लम्बोदरः—सत्यम् ? कियत् दास्यसि।

विद्याधरः—दश सुवर्णमुद्राः--

लम्बोदरः--(स्वगतम्) विनाऽऽयासं दशसुवर्णमुद्रालाभो नूनं नोपेक्षणीयः (प्रकाशम्) तथा भवतु। दीयतां तावत्—

विद्याधरः—(कटिप्रदेशान्निष्कास्य ददाति) गृह्यन्ताम्। (स्वगतम्) इतः पञ्च-गुणितं धनं लप्स्य उदारधियो राज्ञः। साधयामि।

लम्बोदरः—आयुष्मान् भव। (अग्रतः सत्वरं प्रत्यागच्छन्तं वीरसिंहं दृष्ट्वा) गच्छावः वत्स, एष एव स राज पुरुषो निर्दिष्टो मया।

वीरसिंहः—नमो नमः। मम उष्णीषाद् गलितं महत्त्वपूर्णं पत्रं भवद्भ्यां प्राप्तम् इति मया ज्ञातम्। भवत्-मध्ये संवृत्तं सकलम् अपि भाषणं मया श्रुतं, पारितोषिकदान-व्यवहारोऽप्य् अवलोकितः।

[लम्बोदर-विद्याधरौ परस्परं साभिप्रायं समदम् अवलोकयतः]

लम्बोदरः—पत्रं प्राप्तम् आवाभ्याम् परं विना पारितोषिकं कथं नु लभ्येत भवता।

वीरसिंहः—पारितोषिकम् ?

लम्बोदरः—अवश्यम्।

वीरसिंहः—तत् कथम् ?

लम्बोदरः—यदि काकः तद् उदधरिष्यत्, चञ्च्वा छिन्न-विच्छिन्नं च विधाय नद्याम् अपातयिष्यत् तर्हि कथं नु तस्य पुनर्लाभ-वार्ता।

वीरसिंहः—तर्हि गृह्यताम् इदं सुवर्णमुद्रा-दशकम्।

विद्याधरः—इदानीं पारितोषिकोचिततोऽस्य (आत्मानम् अंगुल्या निर्दिश्य) जनस्यैव। दत्तं मया स्थविराय तातायाऽस्मै मुद्रादशकम् मदीयम्।

वीरसिंहः—वत्स, गृहाण तावद् इदम्।

विद्याधरः—कोऽनु मे लाभोऽस्मिन् व्यवहारे। मुद्रादशकं दत्तं तच् च प्रतिसम्पादितम्।

वीरसिंहः—(विमृश्य) तर्हि गृहाण अपरं दशकम्। देहि मे तत् पत्रम्।

विद्याधरः—(मुद्रां गृह्णन्) अस्तु (पत्रं ददाति)।

वीरसिंहः—अनुगृहीतोऽस्मि पत्र-रक्षणेन भवद्भ्याम्।

लम्बोदरः—शुभ-वार्ता तु तावन्निवेद्यताम्।

वीरसिंहः—राज्ञी मध्येमार्गं पुत्रं सुषुवे।

विद्याधरः—शोभनम्। अहो इदानीं महोत्सवः।

लम्बोदरः—भविष्यति राजधान्यां, भूयसी दक्षिणा च वस्त्रपात्रादिसहिता लभ्येत। साधयावः।

(सर्वे निष्क्रान्ताः)

तृतीयं दृश्यम्

[अन्तःपुरे सुखासने उपविष्टः शुद्धोदनो मायाविरह-व्याकुलः]

शुद्धो०—'गृहं तु गृहिणीहीनं कान्तारादतिरिच्यते' इति यत् सुभाषित-कारो वदति तत् सत्यम् एव। देव्याः प्रयाणाद् दिनत्रयम् एव यापितम्, नूनं मास इव आभाति। मासस् तु वर्षमिव प्रदीर्घः प्रतीयेत विरहे। इमानि तस्याः अंशुकानि, इमानि सौन्दर्य-प्रसाधनानि, स आदर्शः, स मञ्चकः, तया स उपधानावरणे कौशल्येन गुम्फितः तन्तुमयो राजहंसः इति सर्वम् अपि स्वामिनीं स्मारं स्मारं तद्विरहव्यथाकुलं शोचतीव मूकम्। तथाकथितजडसृष्ट्याम् एवं-भूतायां कियद्-गुणितं स्याद् मादृशस्य सचेतनस्य दुःखम्, तत् तर्कयन्तु भवन्तः सज्जनाः। दृष्ट-मात्रे वस्तुनि, पाषाणे वृक्षे लतायां निर्झरिण्यां वा यथाऽकस्मान् नष्टां सीतां शोक-मग्नो रामोऽपश्यत्, तथा देवीम् अहम् अपि सर्वत्र पश्यामि। (कर्णं दत्वा) आः! तस्याः प्रियं गीतं श्रूयते। दास्या मंगलाया एव स्वरसंयोगोऽयं प्रायेण।

[रागः-असावरी 'प्रेमभावे, जीव'···इव गेयम्]

प्रेमबन्धो नूनमिह चित्रोऽयम्।
छेत्तुं तं कोऽलम् ॥ प्रेम० ॥
रमणी-रमणयोः किं वाऽयं मातृसुतयोः।
अमरं हृदि तन्मूलम् ॥७॥

हा! 'आत्मनस् तु कामाय सर्वं प्रियं भवति' इति तत्त्वं मया विस्मृत-प्रायम्। दुर्निवारोऽप्य् अयं माया-मोहो विवेक-विचारैर् वारयितुं शक्य इत्य् अपि भगवत्-कृपा। एतद्गीतान्तर्गतश् चित्र-शब्दोऽपि मम इदानीं साहाय्यं करोति। प्रियया आलिखिता मनोहरा चित्रावलिर् मां रञ्जयिष्यति। कविः 'शब्द-सृष्टीश्वरः' इति प्रशस्यते। परं रेखा-मात्रेण हृदयस्थं भावम् आविष्कुर्वन् चित्रकारस् तम् अतिशेते इति मन्ये।

(चित्रावलिं मञ्चाद् गृहीत्वा अवलोकयति)

पर्जन्ये वर्षति निरभ्र-सूर्य-किरणैर् निर्मितम् इदम् ऐन्द्रं धनुः सप्त-रंगैः सर्वदा भवति मम नयनोत्सवाय। उद्याने क्रीडा-रता इमे बालकाः, मन्दमन्द-हासैः पुष्प-कलिकाभिः स्पर्धमाना मम बाल्यं

स्मारयन्ति। अपगतो मम अशेषोऽपि विषादः। यथेदं मम शोकापनुदम् आनन्द-कारणं संनिधौ वर्तमानम् अपि विस्मृति-पथं गतम्, तथैव हृदयस्थोऽपि परमात्मा विस्मर्यते मोहावृतेन मानवेन। 'मत्तः स्मृतिर्ज्ञानमपोहनं च' इति भगवान् वदति गीतायाम्। तच्छरणानां भक्तानां स्मृतिं सा रक्षति, इतरेषां चाऽपोहति।

प्रतीहारी—(प्रविश्य) वीरसिंहो द्वारम् आगतो महाराजं द्रष्टु-कामः।

शुद्धो०—प्रवेशय शीघ्रम्।

वीरसिंहः—(प्रविश्य प्रणम्य च) जयतु महाराजः। इदं शुभ-पुत्रम् (पुरस्करोति)।

शुद्धो०—(गृहीत्वा सस्मितम्) शुभं तु तव मुख-श्रिया एवाऽऽदौ शंसितम्। (अवलोक्य) देवी पुत्ररत्नं प्रासूत। कः कोऽत्र भोः।

प्रतीहारी—(प्रविश्य) आज्ञापयतु महाराजः।

शुद्धो०—देवी पुत्र-रत्नं प्रासूतेति वार्ता नगर्याम् उद्घोष्यताम्। सुवर्ण-कंकणम् आनय शीघ्रं वीरसिंहायोपायनी कर्तुम्। राज्येऽखिले आनन्दोत्सवः सद्य आरभ्यताम्।

प्रतीहारी—यथाऽऽज्ञापयति महाराजः (निष्क्रान्ता)।

शुद्धो०—भद्र, पत्रं मया पठितम्। तत् संक्षिप्तम्। वर्णय तावत् त्वया साक्षात्कृतं वृत्तम्।

वीरसिंहः—शृणोतु देवः।

शुद्धो०—अवहितोऽस्मि। प्रारभस्व।

वीरसिंहः—मध्येमार्गं लुंबिनी-नामकम् उपवनं दृष्ट्वा प्रसन्ना देवी विश्रामम् ऐच्छत्। तत्र भवत्या इच्छाम् आदृत्य विश्रामो व्यवस्थापितोऽस्माभिः। देव्या स्नानं पानम् अशनं च यथेष्टं कृतम्। विश्रामान्ते देव्य् उपवने स्वच्छन्दं दासीभिः सह भ्रमन्ती कंचन सालवृक्षम् उपागच्छत्। स प्रफुल्ल-पुष्पैः सर्वतोऽलंकृतोऽतीव मनोहरोऽदृश्यत। तस्य कांचन शाखां कर-ग्राह्यां वीक्ष्य, देवी तां ग्रहीतुम् प्रयतमाना उदरव्यथार्ता सहसा भूमिं शरणं जगाम।

शुद्धो०—हा! एतद् एव प्रसूति-कारणम् इति मन्ये।

वीर०—आम्, समयज्ञैर् दासी-जनैः सद्य एव देवीं वृक्षं च परितो वस्त्रावरणं विरच्य देव्या यथोचितं साहाय्यम् उपचारादि कृतम्। नचिरात् सहस्ररश्मिर् इव देदीप्यमानः पुत्रो जातः। भाग्यं नूनं महद् एतत् महाराजस्य पुत्रीभूतानां प्रजानाम्।

शुद्धो०—सर्वेषाम् अपि भाग्यं भगवत्कृपया।

प्रतीहारी—(प्रविश्य) देव राजज्योतिषिको द्वारम् आप्तः।

शुद्धो०—प्रवेशय तं सत्वरम्। तस्य भविष्यं दिष्ट्या सत्यत्वेन प्रतीतम्।

प्रतीहारी—यथाऽऽज्ञापयति देवः (निष्क्रान्ता)।

ज्योति०—(प्रविश्य प्रणम्य च) अभिनन्दनं महाराजस्य लब्धपुत्रस्य।

शुद्धो०—अभिनन्दनं भवदीय-ज्योतिः-शास्त्र-नैपुण्यस्य। कः कोऽत्र भोः।

प्रतीहारी—(प्रविश्य) आज्ञापयतु महाराजः।

शुद्धो०—एष ज्योतिर्विदां वरः सुवर्ण-कंकण-दानेन सत्कर्तव्यः। आनय सुवर्ण-कंकणम्।

प्रतीहारी—यथाऽऽज्ञापयति देवः (निष्क्रान्ता)।

ज्योतिर्विद्—महाराज! अनुगृहीतोस्मि। दिष्ट्या वर्धतां राजपुत्रः शुक्लेन्दु-वत्।

प्रतीहारी—(प्रविश्य) देव, इमे कंकणे।

शुद्धो०—द्विजवर, स्वीक्रियताम् इदं पारितोषिकम्।

(कंकणं समर्पयति)

ज्योतिर्विद्—दिष्ट्या वर्धतां महाराजयशः।

शुद्धो०—वीरसिंह, इदं स्वीक्रियताम्। द्वितीयं ददाति कंकणम्)।

वीर०—दिष्ट्या वर्धतां महाराजैश्वर्यम्।

शुद्धो०—(प्रतीहारीं प्रति) आदिश्यतां सारथिः सत्वरं रथम् आनेतुं राज-द्वारम्। मया शीघ्रं गन्तव्यं पुत्रमुखदर्शनाय। (ज्योतिषिकं वीरसिंहं च प्रति) नगरोत्सवे सर्वथा सहकारो देयः।

वीर०—
ज्योति०— } यथादिशति महाराजः।

(सर्वे निष्क्रान्ताः)

क्रमशः

सिद्धार्थ-प्रव्रजनम्

चतुर्थं दृश्यम्

(मासानन्तरम्)

[राजमार्गः]

[विद्याधरो वामतः, लंबोदरश्च दक्षिणतः प्रविशतः]

विद्याधरः—नमो नमः।

लम्बोदरः--अयुष्मान् भव। को विशेषः।

विद्याधरः--इदानीं धारासरे वर्षति स्वेच्छा-सूर्य-प्रकाश इव वातावरणं सुख-दु:खामिश्रितम्।

लम्बोदरः--त्वया राजगृह-मनः-स्थिति-चित्रणम् अनुरूपया खलूपमया कृतम्। निसर्ग-सौन्दर्ये त्वम् अपि मादृश एव रभस इति मोदावहम्।

विद्याधरः--सुचिरायितेन पुत्रमुख-दर्शनेन मोदितव्यं वाऽऽकास्मिकेन नितराम् आकालिकेन च पत्नी-निर्धनेन शोचितव्यम् इति महत् कृच्छ्रं ननु राज्ञ उपपन्नम्।

लम्बोदरः--(दीर्घं निःश्वस्य) संसार इदृश एव। दिष्ट्या ज्ञान-सम्पन्नः प्रभावी च राज-गुरुः सान्त्वयति राजानं पुरा भगवान् वसिष्ठो यथा इन्दुमत्यां मृतायां राजानम् अजम्। राजाऽपि श्रृणोति तन्मुखान् नियमेन भागवत्पुराणम्।

विद्याधरः--तर्कयामि यत् पुत्र-मुखे विलसत् मंदमंद-हास्यं, तस्य बाल-लीलाश्च राज्ञः पत्नी-निधन-दुःखं शनैः शनैः शमयिष्यन्ति।

लम्बोदरः—नास्ति कालोपमं भेषजम्। भगवान् यदि सहेतुकं सामर्थ्यं प्रकटयेत्?

विद्याधरः--को नु स हेतुः।

लम्बोदरः--यदि सर्वम् अपि यथा-मनोरथं भविष्यति मानवो मां विस्मरेत् मानव-जन्म-साफल्यं समुद्यमे च अनादरो भवेद् इति विचार्य, ईश्वरः संसारे घोरं संकटम् उत्पादयत्य् एवं दृष्ट्या परम-कारुणिकः स इति साधवो वदन्ति।

विद्याधरः--अपि भवान् अभिप्रैति यद् यदि दिष्ट्या मायावती राज्ञी अजीविष्यत्, राजा स्त्री-पुत्र-वैभवादिषु मग्नः, परमार्थ-साधन-विचारम् अपि व्यस्मरिष्यत्।

लंबोदरः—आम्।

विद्याधरः—परं केचन विरला भाग्यवन्तः सर्वविधैर्हिकैर् ऐश्वर्यैः सम्पन्नाः परमार्थ-साधने रताः दृश्यन्त एव।

लंबोदरः—ते यदि निकृष्टावस्थाया अद्याऽऽध्रियमाणं वैभवं शिखरं प्रयत्नैर् आरूढवन्तः तर्हि, तेषां परमार्थसाधनं परमार्थतो हार्दिकं भवतीति मन्तव्यम्। अन्यथा चेत्, वैभव-संरक्षणायैव तेषाम् ईश्वरोपासना गौणी, ततोऽपकृष्टा इत्य् अवगन्तव्यम्। जानासि किं राज्ञः परीक्षितः परमार्थ-साधनं सप्तमात्र-दिवसेषु शुकाचार्य-मुखाद् भागवतं श्रुत्वा सद्गतिं गतवान् परिष्वज्य कृतान्तं सानन्दम्।

विद्याधरः—तर्कयामि यत् किमपि विशेषं शुभम् उदेष्यत्य् अस्या आपद इति।

लंबोदरः—तथाऽस्तु। सम्भाषणे वेला मे अतिक्रान्ता गृह-गमनस्य। साधयामि।

विद्याधरः—'गृहिण्या भीतो वराक इति दृश्यते' निष्क्रान्तः। भगवन्, कीदृशी गृहिणी मल्ललांट नियुक्ता इति त्वम् एव जानासि। परं प्रार्थये।

शिख० — खनिर्लावण्यस्य प्रभुवर, न भार्या भवतु मे।
कलानामुत्कर्षाद् व्रजतु न जने ख्यातिमपि सा॥
धनं मद्गेहं नाऽऽनयतु जनकात् सापि बहुलं।
प्रसन्ना सा शान्ता भवतु तु सुशीला च विनता॥

[निष्क्रान्तः]

[स्थलम्, राजप्रसादः, अन्तःपुरम्]

गोतमी — (प्रविश्य) सिद्धार्थ! अयि सिद्धार्थ! नन्द! अयि नन्द! कुत्र गतौ वत्सौ। देवालय-गमनस्य नियतवेला तु समीपम् आगता। कथं नाद्यापि कोऽप्य् आगच्छति वा प्रतिवचनं ददाति। आः! मया विस्मृतं यद् 'बालस्तावत् क्रीडासक्तः' इति। (उच्चैः) अयि सिद्धार्थ, अयि नन्द, त्वरस्व त्वरस्व!

नन्दः—(प्रविश्य) अम्ब! अयम् अस्मि। का आज्ञा?

गोतमी—कुत्र वत्सः सिद्धार्थः। ह्यः निद्रापूर्वम् एव मया कथितं युवाभ्यां यद् भवानी-दर्शनायाऽद्य प्रातः स्नानोत्तरं गन्तव्यम् इति। स्नानं तु तावत् सम्पादितम्। प्रतीक्षे चिरं युवां कृतकेशरचनावेषभूषादिका अहम्। कुत्र भवेद् युवराजः।

नन्दः—उद्यानम् अन्तरा कुत्र स्यात्। मातः! नैव स रमते क्रीडायां नर्मसंभाषणे च सामान्य-बालक इव।

गोतमी—अथ किं प्रियः सः।

नन्दः—एकान्त प्रियः सः। उदयमानं वाऽस्तं त्वरमाणं वा सूर्यं प्रफुल्लं पुष्पं, कूजन्तं भ्रमरम्, उड्डीयमानं खगं वा फलभारनम्रमूलाग्रं दिवा अनिमेष-दृष्ट्या सानन्दं पश्यन् मया नैकवारं स विलोकितः। रात्रौ तु गगनस्थो हिमधवलः चन्द्रो वा देदीप्यमानो नक्षत्र-समूहः युवराजस्य मोद-हेतुः।

गोतमी—जन्म-काले ज्योतिषिकेण केनचित् कथितं भविष्यं शनैः शनैर् एवं सत्यत्वेन ननु प्रत्ययम् आगच्छति। अयि! संभाषणे मयापि तावद् विस्मृतं देवालय-गमनम्। एहि वत्स अन्विष्य च आनय युवराजम्।

नन्दः—(प्रणम्य) यथादिशति जननी। (निष्क्रान्तः)

गोतमी—तावत् तस्य वस्त्राभरणानि कपाटाद् विचिनोमि ।

(कपाटं गत्वा तथा करोति)

अयं मुकुटः, अयं प्रवारकः, अयं कटिबंधः, इमानि भूषणानि ।

[नन्द-सिद्धार्थौ प्रविशतः]

सिद्धार्थः—(प्रणम्य) अम्ब ! क्षम्यतां विस्मृतं खलु मया देवालय-गमनम् ।

गोतमी—(मुखं स्नेहेन परामृश्य) कियान् विनयशीलो विद्यते, त्वरस्व । परिधेहि इमानि वस्त्राभरणानि ।

सिद्धार्थः—(सकृत् तानि विलोक्य) मातः, सत्यं वदामि नेमानि रोचन्ते मह्यम् ।

गोतमी—वत्स ! प्रत्यहं त्वया तानि परिधातव्यानीति न निर्बध्नाम्य् अहम् । अद्य ते वर्धापन-दिवसः । अत एव मे निर्बन्धः । किम् एषां प्रयोजनं यदय् उचित-समय एते नोपयुज्येरन् ।

सिद्धार्थः—(विचिन्त्य) अप्य् एषां स्वीकरणं ते सुखाय भवेत् ।

गोतमी—अथ किम् ।

सिद्धार्थः—तर्हि परिदधामि । देहि तावत् ।

गोतमी—(सामुदाश्रु) कियान् वत्सलोऽयं वत्सः, यो मातृ-सुखाय स्वमनो-विरुद्धम् अप्य् आचरितुं सिद्धो भवति ।

(सिद्धार्थः वराण्य् आभूषणानि मातुः साहाय्येन परिदधाति)

प्रतीहारी—(प्रविशय) देवि, महाराज आगच्छति ।

गोतमी—प्रवेशय, शीघ्रम् ।

प्रतीहारी—यथा ज्ञापयति देवी (निष्क्रान्ता)

शुद्धोदनः—(प्रविश्य, युवराजं वस्त्राभरण-मण्डितं च विलोक्य) देवि, ! यदि युवराजस्य माताऽद्याऽजीविष्यत्—

गोतमी—सा निरतिशयम् आनन्दम् अन्वभविष्यत् !

सिद्धार्थः—(साश्चर्यम्) तात, अपीयं न मे माता !

शुद्धो०—न हि, वत्स, । सा नन्दस्य माता ।

सिद्धार्थः—अथ का मम एषा ।

शुद्धो०—मातृष्वसा !

सिद्धार्थः—कुत्र माता ।

शुद्धो०—तव जन्मनः सप्तमे दिवसे एव·····दिवं गता । (नयने प्रमार्ष्टि)

सिद्धार्थः—यया मातृ-वात्सल्येन लालित-पालितोऽहं जन्मनः, सा मातृ-नाम्नैवाभिधातव्या मया । (कृतज्ञतार्द्रगिरा) प्रणमामि त्वां विशेषेण आदरेण । मातृ-स्मृतिं सकृद् अप्य् अनुत्पाद्य येन वात्सल्येन सुत-निर्विशेषतया त्वयाऽद्यावधि वर्धितोऽहं, तन् नूनम् अपूर्वम् एव ।

गोतमी—मया तु कर्तव्यम् एव अनुष्ठितम् । (महाराजम् उद्दिश्य) आदि-श्यतां सारथी रथ-सिद्धये ।

शुद्धोदनः—कः कोऽत्र भोः ।

प्रतीहारी—(प्रविश्य) आज्ञापयतु महाराजः ।

शुद्धोदनः—सारथिर् आदिश्यतां शीघ्रं रथ-सिद्धये ।

प्रतीहारी—यथाज्ञापयति देवः (निष्क्रान्ता)

शुद्धोदनः—देवि, अद्यैव देवीदर्शनान्तरं कुलगुरुं गत्वा तस्याऽधीनाव् उभौ राजपुत्रौ कर्तव्याव् अध्ययनाय, इति मे मतिः ।

गोतमी—उदारः खलु कल्पः महाराजस्य ।

शुद्धो०—उभयोर् वत्सयोर् चिरवियोगो देव्या असह्यो भवेत् प्रारम्भे कति-पयदिनानि ।

गोतमी—अपरिहार्ये व्यतिकरे किं शोकेन । वत्सौ त्व् अध्ययनान् नैव वञ्च-यितव्यौ वियोग-दुःख-कारणेन ।

सिद्धार्थः—तात, अपि गुरोः संनिधाव् आश्रमे ननु वसितव्यम् आवाभ्याम् ।

शुद्धो०—आम्, वत्स, नगराद् बहिः ।

सिद्धार्थः—तर्हि, साधु ! साधुः कल्पः ।

नंदः—अपि तत्राऽन्ये छात्रा भवेयुः ।

शुद्धो०—आम् ।

प्रतीहारी—(प्रविश्य) देव, सिद्धो रथः ।

शुद्धो०—तर्हि गच्छाम सर्वे द्वारम् ।

(सर्वे निष्क्रान्ताः)

[जवनिका ऊर्ध्वं नीयते कुलगुरुश् च स्वाश्रमे पंचषच्छात्रैः परिवृतः दृश्यते]

[अभ्यन्तरे रथध्वनिः श्रूयते । गुरुकन्या गिरिजा द्वारम् आगत्य दूरं विलोक्य च]

गिरिजा—तात, राजरथ आगच्छतीति पवनेन धूयमानेन केतुना ज्ञायते। (प्राङ्गणे स्थितं वृक्षस्य कर्तितं स्कंधम् आरुह्य सुदूरं च निरीक्ष्य) अयि ? महाराजो देवी राजपुत्रौ च दृश्यन्ते ।

गुरुः—तर्हि तेषां सत्कारायाऽध्यासनादि सिद्धं क्रियताम् । (विमृश्य) स्थाने महाराजस्याऽऽगमनम् । अद्य युवराज-सिद्धार्थस्य वर्धापनदिनम् । (शिष्यं प्रति) गच्छावः सर्वे महाराजस्य स्वागताय अग्रतः (तथा कुर्वन्ति)। चतुष्पञ्चनिमिषै राजकुटुम्बेन सह निकृत्य अभ्यागतान् यथार्हम् आसनेषु निषाद्य, स्वं स्वम् आसनम् अलंकुर्वाते गुरुः छात्राश् च)

शुद्धो०—वत्सौ वन्देयौ गुरुचरणौ ।

[राज-पुत्रौ तथा कुरुतः]

गुरुः—(प्रत्येकम्) आयुष्मान् भव । (राजानम् उद्दिश्य) अपि कुशलं सर्वतः ।

शुद्धो०—आम्, भवदाशीर्वादैः ।

गुरुः—अद्य युवराजस्य वर्धापन-दिनम् । अन्निमित्तं च देवी-दर्शनं विधाय, मदाश्रमं चिरेण सनाथं कर्तुं महाराजेनाऽगमनं कृतं सकुटुम्बम् इति तर्कयामि ।

शुद्धो०—गुरु-वर्यैर् यथार्थं तर्कितम् । विस्मयावहा खलु भवदीया स्मृतिः ।

गुरुः—वत्सयोर् अध्ययनारम्भोऽपि मनसा परिकल्पितो ननु ।

शुद्धो०—तथैव ।

गुरुः—अथ 'शिष्टागमने अनध्यायः' उचितो भवेत् । (शिष्या मुदिता दृश्यन्ते)

शुद्धो०—परं सुचिरं स्पृहा अस्माकं पाठ-श्रवणे। स्तोकं शृणुयाम। वत्साव् अपि ज्ञास्यतोऽध्ययन-पद्धतिम्।

गुरुः—तथास्तु। (शिष्यान् प्रति) किं पाठयितुकाम आसम्।

नारायणः—अथर्ववेदतः किम् अपि तेजस्वि वचनम्।

गुरुः—समीचीनम्। (राजानं प्रति) दुःख-विमोचनं विजय-प्राप्तिश्च चास्य तेजस्वि-वचन-पाठस्य फलम्।

शुद्धो०—वत्सौ, युवाभ्याम अपि अवधेयम्।

सिद्धार्थनंदौ—यथाज्ञापयति तातः।

गुरुः—(शिष्यान् प्रति) माम् अनुपठत प्रत्यकं वचनम्। "जितम् अस्माकम्, उद्भिन्नम् अस्माकम्। तेजोऽस्माकम् ब्रह्मास्माकम्। स्वरस्माकम्। यज्ञोऽस्माकम्। पशवोऽस्माकम्। प्रजा अस्माकम्। वीरा अस्माकम्। तस्माद् निर्भजामः अमुम् आमुष्यायणम् अमुष्या पुत्रम् असौ यः। स पाशान् मा मोचि। तस्येदं वर्चस्तेजः प्राणम् आयुर्निवष्टयामि। इदम् एनं अधराञ्च पादयामि" इति।

कामक्रोधादिकान् अन्तःस्थान् बहिःस्थान् च रिपून् जेतुम् इयं प्रतिज्ञा, देवता-प्रार्थना अतीवोपयुक्ता। सा मनोदौर्बल्यं निवार्य प्रेरयति मनः रिपु-जयाय। वायु-मडलस्था देवताश्च काश्चन 'तथास्तु' इति गृणन्त्यः विचरन्ति सदैव। तासाम् अपि विनाधारां प्राप्त आशीर्वादः प्रयतमानेभ्यः पुष्टिप्रदो भवेद् इत्य् अलम्। अथ वत्सौ किञ्चित् परीक्षितुम् इच्छामि सामान्य-ज्ञाने।

शुद्धो०—अवश्यम्। वत्साव् अवधेयम्।

गुरुः—'मातृदेवो भव' इति प्रथमः आदेशः अधीतुकामाय शिष्याय। किं प्रयोजनम् अस्य। [यावत्कौमारदशाम्]

सिद्धार्थः—माता आप्रसवं संवर्धयत्य् अपत्यं श्रमैः तदर्थं कृतज्ञतया वर्तितव्यं तेन इति हेतोर् अयम् आदेशः।

गुरुः—सुष्ठु। अपि कोऽपि (छात्रान् उद्दिश्य) ततोऽधिकं निवेदयितुं शक्नोति। (क्षणं प्रतीक्ष्य) न कोऽपि दृश्यते। विशदीकरोमि तावद् अनवधानेन दुर्लक्षिता आयासा मातृभिर् आचरिताः।

शुद्धो०—अवहिताः स्मः ।

गुरुः—अपत्यस्य जन्म-पूर्वम् अपि माता तदर्थं बहूनि कष्टानि सहते नवमासं यावत् । तस्य वर्धमानं भारम् उदरे वहति । तस्य सुखाय च प्रियान् कांश्चिन् नित्य-सुखोपभोगान् परित्यजति । प्रथम-प्रसव-प्रसङ्गस् तु मृत्युर् इव भीति-प्रद आभाति । कदाचित् स्खलित-मार्गः खलित-गर्भस् तु स्वस्य वा मातुर् वोभयोर् अपि प्राणान् हरति ।

शुद्धो०—वत्साः, मा कदापि विस्मरत एतान्य् असह्यानि कष्टानि, यानि जनन्या मुदा विसोढानि युस्मदर्थम् । राजपुत्रौ छात्राश् च नैव विस्मरामः, महाराज !

गुरुः—जन्मान्तरम् अपि, कटु-कषाय-सेवनं, रात्राव् अपत्यस्य आक्रदनेन वाऽस्वास्थेन जागरणम्, उत्सर्गोपद्रव-निःसारणं, समये पोषणं स्तन्येन, स्वापनं, गीतैः, रक्षणं जलानलयोः, ततः नैकच्छन्दः पूर्णं, क्रीडारतस्याऽन्वेषणं भोजनाय इत्यादिषु माता यानि कष्टान सहते तेषां निष्क्रमणम् अंशत एव कर्तुं शक्यते अपत्येन सिद्धपुरे (मातृगयायां) पिंडदान-युक्तेन श्राद्ध-विधिना । 'मातृषोडशी' इति ख्याताः पिंडदान-मन्त्रा इमानि सर्वाणि मातृ-कृत-कष्टानि वर्णयन्ति ।

[सर्वे मातृ-स्मरणेन बाष्पाकुललोचना भवन्ति]

शुद्धो०—'मातुर्ऋणं वारयितुं न शक्यम्' इति सुभाषितम् अन्वर्थकम् एव ।

गुरुः—(शिष्यान् प्रति) वत्साः, अथ, स्वे स्वे कर्मणि दत्तावधाना भवत । (निष्क्रान्ताः शिष्याः) राजन् इदानीं विश्रम्य दुग्ध-फलाहारः स्वीक्रिय-ताम् । सुमुहूर्तं निरीक्ष्य द्वयोर् उपयन-विधिं निर्वर्तयामो यथाशास्त्रम् । वत्सौ, उपनयनोत्तरं द्वादशवर्ष-पर्यन्तम् अत्रैव वसितव्यम् अध्ययनाय । अनध्याय-दिने च गन्तव्यं नगरं जननी-जनक-दर्शनाय । ताव् एव वा अत्र यथावसरम् अगमिष्यत उभयोर् दर्शनाय । गच्छाम अंतर्-गृहम् ।

(जननिका-क्षेपः)

[स्थलं-राजमार्गः,लम्बोदरः दण्डम् आश्रित्य कष्टेन श्वसन् मंदपदैः प्रविशति । सायं समयः]

लम्बोदरः—अहो ! धिग् औद्धत्यं जनानाम् । धिक् स्वार्थान्धताम्, धिक् च अनवधानतां परपीडा-विषये ! समारोहे समाप्ते, सर्वेषाम् अपि त्वरा गृहं गमनाय । पार्श्वस्थिता अपि पुरतः स्थितान् अतिक्रमितुं प्रयतन्ते । यौवन-सुलभ-मदेनोन्मत्तैः कैश्चिद् युवकैः बहुशः कृते पुरःसरण-प्रयत्ने त्व् अहं विप्रयुक्तो धृतहस्तया वत्सया । हन्त ! जन-संमर्दे सा मां कथं प्राप्नुयात् ! कथम् अहं गृहं गच्छेयम् ! श्रान्तोऽस्मि । आकस्मिकाघातेन श्रान्तोऽस्मि । अत्र मार्गाद् नातिदूरे वटवृक्ष-मूले तावत् विश्रान्ति-सुखम् अनुभवामि । प्रयते च ततो मां गृहं प्रापयितुम् अनुग्रहीतु-कामं कमपि सज्जनम् अवाप्तुम् । अहो ! सर्वेऽपि गृहासक्त-चित्ताः, नासाभिमुखं चलन्ति इदानीम्, प्रायेण श्रान्ताः, विश्रामोत्सुकाः, क्षुधाकुलाश् च । अन्यदा इतस्ततोऽनवलोक्य मार्गम् आक्रमितुं नैव प्रवृत्तिर् जनानाम् । क्रीडास्पर्धा-विषयिणी चर्चा श्रूयते जन-समूहे क्वचिद् उच्चैः क्वचिच् च मन्दम् । वराकी शान्ता मां मृगयमाणा स्यात् चिन्ताकुला ! कथं न्व् अहं लभ्यस् तया जन-संमर्दे । (उच्चैः) अपि कोऽपि सदयो मे वृद्धस्य साहाय्यं कुर्यात् ।

(नेपथ्ये)

'वयस्य ! कोऽपि संकट-ग्रस्तः साहाय्यं याचते इति तर्कयामि । गच्छाव पश्याव च तावद् इतस्ततः ।' 'साधुवर्य, अलं परोपकार-व्यसनेन ! सत्वरं गृहं गन्तव्यं, नोचेत् क्रुद्धविमातुर् वाक्शराणां लक्ष्यं भवेव । पश्य, दिनकरे अस्तंगते तमो वेगेन प्रसरति दश-दिशासु । गच्छाव द्रुतम् ।' भगवन् ! इदानीं त्वम् एव शरणं मम । धिङ् मां येन

भगवन्नाम तावद् विस्मृतम्। पठामि विष्णुसहस्रनामावलिम्। स साक्षी पश्यति माम् असहायम्। भयकृद् भयनाशनः, तेनैव भयम् उत्पादितम्, स एव च तन् नाशयिष्यति। (स्तोत्रं पठति)

विद्याधरः—(प्रविश्य) अहो! परिचितः शब्दः श्रूयते। (कर्णं दत्त्वा सावधानं शृणोति) आर्य! विष्णुसहस्रनाम-स्तोत्रं पठयते। को नु स्यात् स पाठकः। (स्मर्तुं प्रयतते) लंबोदरस्य शब्दोऽयम्। निःसंशयं स्थविरस्य लम्बोदरस्य। (उच्चैः) भोः! लम्बोदर महाशय! अपि भवान् अत्र स्तोत्रं पठति। (इतस्ततो निरीक्ष्य) कुत्र तिष्ठति तत्र भवान्।

लम्बोदरः—(शब्दम् अभिज्ञाय) कोऽनु भवान्? विद्याधरः! अहं लम्बोदरः, अत्र वटमूले निषण्णो व्यथित आघातेन।

विद्याधरः—(वटमूलम् उपेत्य अभिज्ञाय च) नमो नम आर्य, उच्यतां का व्यथा, किं मया करणीयम् इति।

लम्बोदरः—दिष्ट्या भगवता एव कारुणिकेन प्रेषितो भवान् मत्-साहाय्यार्थम्। प्रथमं तावद् जलम् इष्यते मया। अतीव तृषार्तोऽस्मि।

विद्याधरः—अलं चिन्तया। ददामि सत्वरम्। मम अनुजो मुकुन्दोऽनुसरति माम्। तस्य सन्निधौ वर्तते जलम्। (उच्चैः) रे मुकुन्द! त्वर! त्वर! वटमूले अत्र तिष्ठामि।

मुकुन्दः—(प्रविश्य) अग्रज, अयम् आगतोऽस्मि। किं त्वरा-कारणम्।

विद्याधरः—देहि जलं सत्वरम्। अयम् आर्यः तृषाक्रान्तः। (लम्बोदरो विद्याधरेण समर्पितं जलं पिबति, चेतनां च लभते) सेव्यताम् इदं मोदक-द्वयम् अपि। (ददाति)।

लम्बोदरः—अनुगृहीतोऽस्मि। (सेवते)

विद्याधरः—प्रथमं तावद् उच्यतां भवदीयं व्यथा-कारणम्।

लम्बोदरः—खाद्यपेयाभ्यां, विशेषेण च सुहृदोऽकल्पित-मीलनेन उज्जीवित इवाऽहम्। श्रूयतां संक्षेपेण।

विद्याधरमुकुन्दौ—अवहितौ स्वः।

लम्बोदरः—राजोपवने क्रीडा-स्पर्धां प्रेक्षितुं मयाऽनीता कन्या। निवर्तमानः कैश्चिद् उद्धतैर् युवकैः पार्श्वतो जवेनाऽऽगत्य विप्रयुक्तोऽहं कन्यया

शान्तया। तदाघातेन व्यथितः असहायः स्थितोऽस्मि मुहूर्तम्। वत्सा शांता मां मृगयमाणा स्यात् । अहं वामपादे स्तोकां पीडाम् अनुभवामि। ननु ग्रामान्तराद् आगतौ भवन्तौ।

विद्याधरः—आम् मुकुन्द, समीपम् आनय शकटम् अन्विष्य।

मुकुन्दः—यथादिशति तातः। (निष्क्रान्तः)।

लम्बोदरः—(बह्वंशेन प्रकृतिं प्राप्य) अपि कुशलम्। परं भद्र, अपूर्वक्रीडामहोत्सव-प्रेक्षणे त्वया किमर्थं प्रमत्तम्। अपि न रसो विद्यते तस्मिन्।

विद्याधरः—विद्यत एव। पुत्रनामकरणोत्सवं समाप्य समये उपस्थातुं प्रस्थितोऽप्य् अहम् मध्येमार्गं शय्याबद्धः। वृद्धः मातुलो मां स्मरति तीव्रम् इति विज्ञापितोऽहं मार्गं त्यक्त्वा तं दृष्ट्वा, शुभाशिषश् च गृहीत्वा निवृत्तोऽस्मि। ततो विलम्बितं ममाऽऽगमनम्।

लम्बोदरः—नेत्रोत्सवापेक्षया वृद्धेच्छा भवता अधिका मता इति नूनं प्रशस्यम्। विजयोऽस्तु सदा भवतः। मोदके पुत्रनामकरणस्य इति तर्कयामि।

विद्याधरः—आम्। निवेदयतु भवान् तावत् क्रीडास्पर्धाविशेषान्। ईदृशे वयसि दृष्टिर् अविकृता इति विशेषं भागधेयम् अत्रभवतः।

लम्बोदरः—नियत-शीर्षासनस्य फलम् इदम्। 'उदेति पौरुषाद् भाग्यम्' इत्य् अपि न विस्मर्तव्यम्।

विद्याधरः—वर्ण्यतां क्रीडास्पर्धा। समुत्सुकोऽहं तां श्रोतुम्।

लम्बोदरः—गुरुगृहात् कृतविद्यौ गृहम् आगतौ राजपुत्रौ। युवराजस्य विवाहः, सर्वगुणोपेता चारुगात्री च कोलीय-राजकन्या यशोधरा इत्यनया सह महाराज ऐच्छत्।

विद्याधरः—इति श्रुतं मया। यतो द्विमास-पूर्वम् एव कार्यार्थं देशान्तरं गत आसम्।

लम्बोदरः—स्वयंवरं विना तु यशोधरा-पिता तां कस्मै अपि दातुं नास्पृहयत्। परं महाराजेन आयोजितायां प्रतिवार्षिक-क्रीडास्पर्धायां युवराजेन सार्धम् अपरेण राजपुत्रेण देवदत्तेनाऽपि स्वीयं विविध-कलानैपुण्यं

दर्शयितुं निश्चितम् इति ज्ञात्वा तयोर् विजयिनं यशोधरा वरयेद् इति तज्जनकेन दण्डपाणिना उद्घोषितम् ।

विद्याधरः—ततस् ततः ।

लम्बोदरः—द्रौपदी-स्वयंवर-पणस्य मत्स्यभेदस्य इव अधो लम्बमानश् चित्रभेद आयोजितः ।

विद्याधरः—अथ केन जितः स पणः ।

लम्बोदरः—उभाभ्याम् अपि !

विद्याधरः—कृच्छ्रं खलु समुत्पन्नम् । ततः—

लम्बोदरः—न्याय-नीति-तर्कादि-शास्त्रेष्व् अश्वारोहण-रथवाह-मल्लादिविद्यासु च स्पर्धमानयोः तयोः सिद्धार्थः प्रथमांकं लब्धवान् देवदत्तश् च द्वितीयम् ।

विद्याधरः— अथ कं ववार यशोधरा ।

लम्बोदरः—युवराज-सिद्धार्थम् ।

विद्याधरः—साधु ! साधु ! विजयतां स चिराय ।

मुकुन्दः—(प्रविश्य) तात ! आर्य ! आनीतः शकटः । आर्या शान्ता..... ।

लम्बोदरः—सैव इदानी चिन्ता-विषयः ।

मुकुन्दः—दिष्ट्या सापि लब्धा, अनीता च शकटे, रक्षिता कृषीवलेन भवदन्वेषणार्थं परिभ्रमन्ती ।

लम्बोदरः—(प्रणम्य) भगवन् ! अतर्क्या खलु ते लीला भक्तवत्सलस्य । आपद इव भाग्यक्षणा अपि न एकाकिनः प्रायश उपतिष्ठन्ते ।

विद्याधरः—गच्छाम शकटम् । करोमि भवतः साहाय्यं गमने ।

लम्बोदरः—कल्याणं वां करोतु नित्यं सच्छीलयोः परमकारुणिको भगवान् श्रीहरिः ।

[सर्वे निष्क्रान्ताः]

[पौरन्याय-सभा । पौर-न्यायाधिपः कार्यवाहः महाजनाः
सिद्धार्थः देवदत्तश् च स्वे स्वे आसने उपविष्टाः]

कार्यवाहः—मान्यवर न्यायाधिप महाजनाश् च, अद्य राजपुत्रेण (अंगुलि-निर्देशं विधाय) देवदत्तेन, शाक्य-सिद्धार्थ-युवराज्ञ-विरुद्धं कश्चिद् अपूर्वः प्रश्न उपस्थापितो न्याय-सभायाम्। द्वाव् अपि ताव् अत्रोपस्थितौ। निवेदयतु देवदत्तः स्वप्रश्नम्।

देवदत्तः—(उत्थाय, प्रणम्य च) भो न्यायाधीश महाजनाश् च, ह्यः प्रातर् आरामोद्याने जलाशयोपरि उड्डीयमानेषु पारावतेषु कश्चिन् मया विद्धः शरेण दूरात्। स ह्य् अधो मृतवत् पतितो दृष्टो युवराजेन उज्जीवितश् च जल-पायन-लालनादिभिः स्निग्धक्रियाभिः। मृगया-नियमानुसारं स पारावतो मदीय इत्य् अर्थितः सिद्धार्थात्, परं तेन न्यक्कृतो मदीयाधिकारस् तस्मिन् प्राणिनि केवलेन तज्जीवनकारणेन। अतो न्यायसभयोचितो न्यायः कार्य इति प्रार्थये।

न्यायाधिपः—युवराजः सिद्धार्थः करोत्व् आत्मनिवेदनम् अस्मिन् विषये।

सिद्धार्थः—(उत्थाय प्रणम्य च) देवदत्तेन शरेण विद्धः स दीनः परावतो ममाऽग्रतः पतितः। तं मरणोन्मुखं दृष्ट्वा व्यथितान्तःकरणेन मया शरः तद्-अङ्गाद् उद्धृतः, खगः जलं नीत्वा प्रक्षालितः, पयः पाययित्वा च उज्जीवितः प्रयत्नैः। दिष्ट्या मृत्यु-पाशान् मोचितः स मदीय एव इति मन्ये। देवदत्तः तं मारयित्वा भक्षितुम् ऐच्छत्। प्रयत्नैर् उज्जीवितं प्राणिनं हत्यायै देवदत्ताय समर्पयितुं मानवता-विरुद्धम् अभविष्यत्। अतो मया न्यक्-कृता तदर्थना। शरेण विद्धः स खगो यद्य अमरिष्यद् देवदत्तस्य अभविष्यत् मृगयानुसारम् इति वाद-भूतविषयस्य महत्त्वपूर्णः पक्षो न उपेक्षितव्य इति प्रार्थये।

न्यायाधिपः—देवदत्त, किं वक्तुकामो भवान् इदानीम्।

देवदत्तः—मया विद्धः खगो मृतो वा सजीवो वा, मदीय एव मृगया-नियमानुसारम्। न तस्मिन्न् अधिकारः कस्याऽप्य् अपरस्य इति प्रति-पादयामि। (स्वगतम्) द्विवारं मया सोढं पराजय-दुःखं क्रीडा-

स्पर्धायां स्वयंवरे च। इदानीं तद् अनुभवतु मम प्रतिस्पर्धी जितपणम् माम् अवमानितवत्या यशोधरया सह।

न्यायाधिपः—महाजना विमृश्य स्वाभिप्रायं कथयन्तु निःसंकोचम्। प्रतिवादिनो युवराजत्वं त्व् अत्र नैव विचारणीयम्। (महाजना विमृशन्ति परस्परम्)।

महाजनप्रमुखः—आर्त-मूक-प्राणिन उज्जीवनेन संभाव्यहत्याया रक्षणेन च सिद्धार्थेन मानवता-दृष्ट्या यथोचितम् एव आचरितम् इत्य् अस्माकं मतम्।

न्यायाधिपः—देवदत्त! महाजनैः प्रकटीकृतोऽभिप्रायो योग्यो न्यायानुसारश् चेति मे मतम्।

कार्यवाहः—न्यायसभा-कार्यम् अद्य समाप्तिं गत इति उद्घोषयामि।

देवदत्तः—(जनांतिकम्) अहो दैवदुर्विलासः! इदानीम् अपि पराजय-दुःखं ममैव। 'दुःखं दुःखानुबन्धि' इति लोकप्रवादः खलु सत्यः।

इति द्वितीयोऽङ्कः

अथ तृतीयोऽङ्कः

[राजमन्दिरे शुद्धोदनः सुखोपविष्टः]

शुद्धो०—'अतर्क्या खलु लीला कालरूपिणः परमेश्वरस्य'। प्रियाया आकस्मिक-निधनस्यासह्यं दुःखं येनोत्पादितं तेनैव तत् कालान्तरेण इदानीं सुसहं कृतम्। दिष्ट्या वत्सः सिद्धार्थो राजोचित-सर्व-विद्यानैपुण्येन सार्धम् अनुपम-लावण्य-युक्तम् अग्रगण्यं स्त्रीरत्नं भार्यात्वेन संपाद्य स्वनाम नयतीव अन्वर्थकर्त्वं निसर्ग-मधुर-दुग्धशर्करायोग इव पुत्रलक्षणशंसिनी सा वधूर् यशोधरा आसन्न-प्रसवा तिष्ठति। इदानींतनं मे निरतिशयं सुखं माम् अनुक्षणं शङ्कयति यद् अहं स्वापावस्थायां वा जागरितावस्थायां वा तिष्ठामीति। भवत्व् अयं स्वप्नो वा जागरो वा, भगवन्, माऽयं क्षयं यातु।

प्रतीहारी—(प्रविश्य प्रणम्य च)–आयुष्मान् वत्सः सिद्धार्थः तातदर्शनम् इच्छति।

शुद्धोदनः—प्रवेशय वत्सम्।

प्रतिहारी—यथाज्ञापयति देवः। (निष्क्रांता)।

सिद्धार्थः—(प्रविश्य) तात! अभिवादये।

शुद्धो०--आयुष्मान् भव। वत्स! का वार्ता।

सिद्धार्थः--राज-भवने सर्वविधैश्वर्येषु रममाणोऽपि नित्य-नव-मधुर-फलैः पुष्यन्तं सुवर्णपञ्जरबद्धं शुकम् इव मन्ये आत्मानम्।

शुद्धो०--अथ किम् इच्छति।

सिद्धार्थः--बहीराजभवनं कृतवेषान्तरः सामान्य-नागरिक इव भ्रमितुकामोऽहं स्वच्छन्दम्।

शुद्धो०--(स्वगतम्) अनुचितः खलु निर्मर्यादो निर्बन्धः। अतितानितः तन्तुश् छिद्यत एव। (प्रकाशम्) तथास्तु। परं रक्षकानुयातो गच्छ।

सिद्धार्थः--छन्नो माम् अनुयास्यति

शुद्धो०--बाढम्।

सिद्धार्थः--अथ आपृच्छे तातपादान् (निष्क्रान्तः)।

शुद्धो०--कः कोऽत्र भोः।

प्रतीहारी--(प्रविश्य)-का आज्ञा देवस्य।

शुद्धो०--मुख्यामात्य आहूयताम्।

प्रतीहारी--यथाज्ञापयति देवः (निष्क्रान्ता)।

राजवर्मा--(प्रविश्य) आज्ञापयतु महाराजः।

शुद्धो०--मुख्यामात्य! वत्सः सिद्धार्थो राजभवनाद् बहिर् वेषान्तरितः सामान्य-नागरिक इव भ्रमितुकामः; वेषान्तरितेन छन्नेन सह राजधान्याम्। अतो भ्रमतम् तस्य दृष्टिपथं यथा वैराग्योत्पादकं किम् अपि दृश्यं नागच्छति तथा क्रियताम्।

राजवर्मा--अभिज्ञातो हेतुर् महाराजस्य। तथा अनुतिष्ठामि।

[प्रणम्य निष्क्रान्तः]

शुद्धो०--ममापि पुराणश्रवण-समयः प्राप्तः। गच्छामि [निष्क्रान्तः]।

[ततः प्रविशतो वेषान्तरितौ सिद्धार्थच्छन्नौ]

सिद्धार्थः—(शिखरिणी)

स्वतन्त्रास्ते धन्याः खलु गगनसंचारिविहगाः,
तथा धन्या मीना अपि जलविहार-प्रणयिनः ।
सुखं स्वातन्त्र्यस्य त्वमृतमधुरं चाप्रतिहतम् ,
इदानीं भुञ्जानः पुनरनुभवामीव जननम् ॥

वयस्य, अवर्णनीयं खल्विदं स्वातन्त्र्य-सौख्यम् । नित्यं महार्ह-वस्त्राणि परिदधानः, परिजनैर् अनुगम्यमानः, दृष्ट-मानश् च सेवकैर् वन्द्यमानः अयं सिद्धार्थः, इदानीं राजमार्गे केनापि अनभिज्ञातः स्वच्छन्दं भ्रमन्, पञ्जरमुक्तं शुकम् इव मन्यते आत्मानम् ।

छन्नः—आयुष्मन्, सत्य एव भवतोऽभिप्रायः ।

सिद्धार्थः—पश्य तावत् संमुखम् अभिसर्पन्तीं ताम् अनावृतार्धदेहाम् अपि प्रसन्नवदनां गोपीम् । न तस्माद् धनैश्वर्यम् एव सुख-कारणम् इति दृश्यते ।

छन्नः—यथार्थो युवराजस्य तर्कः ।

सिद्धार्थः—अवलोकय तावद् एनां शाकवाहिनीं नारीम् । सान्द्रकज्जल-वर्णमुखम् अपि स्वं बालकं सा निर्भरं चुम्बति । अतः केवलो बाह्य-वर्ण एव न प्राणिनः सुखस्य हेतुः ।

छन्नः—सुखस्य मूलं त्व् आत्मैव जीवस्य इति प्रतिपाद्यते सततं पुराण-कीर्तनेषु । [गगने विमानस्थः शक्रः— 'अयं तु योग्यः खलु समयो वैराग्योत्पादकानि संसारस्य विविध-दृश्यानि दर्शयितुं राज-पुत्राय । यावत् तप्तम् अयः-पात्रं तावदेव पोलिका भर्जितव्या । रचयामि तथा-विधानि दृश्यानि मायाबलात् "]

सिद्धार्थः—पश्य पश्यैनम् अग्रत आयान्तं भेसुराकृतिं पुरुषम् । अस्थिचर्म-मात्रावशिष्टः कम्पमान-कन्धरः सितकेशः यष्टि-निविष्ट-हस्तश् चाऽसौ महता कष्टेन पदन्यासं करोति । अपीयं तस्य वपुषो विकृतिर् वा प्रकृतिर् वा ।

छन्नः—आर्यपुत्र विकृतिर् एव । आवाम् इव सोऽपि पुष्टाङ्ग उन्नतकन्ध-रोऽसितकेशः सामर्थ्य-सम्पन्नश् चाऽऽसीत् ।

सिद्धार्थः—किं कारणम् तत्र विकृतेः।

छन्नः—जरा!

सिद्धार्थः—कीदृशी सा।

छन्नः—श्रूयताम्।

रूपस्य हन्त्री व्यसनं बलस्य
शोकस्य योनिर्निधनं रतीनाम्।
नाशः स्मृतीनां रिपुरिन्द्रियाणां
सैषा जरा नाम यथैष भग्नः॥

सिद्धार्थः—(विचिन्त्य) अपि माम् अपि सा ईदृशीं विकृतिं नेष्यति।

छन्नः—अवश्यम्। न केवलम् आयुष्मन्तम्, माम् अपि। प्रत्येकं मानवस् तदभिभव-भाजनं भवति कालानुसारेण।

सिद्धार्थः—इदं तु गम्भीरं चिन्तनीयं भवति। भ्रमति मम मस्तकम्। वृक्षमूले अत्र तावद् उपविशाव।

छन्नः—अपि किम् अपि खाद्यं वा पेयम् वा इष्यते।

सिद्धार्थः—मनस्य् अस्वस्थे किं खाद्येन किंवा पेयेन। हरितमृदु-तृणांकुरेषु आकुञ्चित-बाहूपधाने शिरो निधाय मुहूर्तमात्रं विश्राम-सुखम् अनुभवामि।

छन्नः—स्वेच्छानुसारं करोत्व् आर्यपुत्रः। (सिद्धार्थः विश्राम्यति, छन्नः उत्तरीयेण तं वीजयति)। (स्वगतम्) अनवधानेन मया राजाज्ञा-विरुद्धं जरा-दुःखं विवर्णितम् आर्यपुत्राय। दिष्ट्या जलाशयो दृश्यते समीपम्। ततो वस्त्राञ्चलम् आर्द्रीकृत्य प्रोक्षामि जलम् आयुष्मतः शिरसि।

(तथा नाटयति, सिद्धार्थो नयने उन्मीलयति)

छन्नः—आर्यपुत्र! अपि स्वास्थ्यम्।

सिद्धार्थः—आम् शीतल-सुगंधि-वायुना जलसेकेन च मनोभ्रमणं उपशमितम्। (मधुरस्वरालापान् श्रुत्वा) वयस्य! कियान् मधुरः स कण्ठः! शृणवाव तावद् इदं गानम्। अहो! दुग्ध-शर्करा-संयोगवद् अर्थपूर्णम् अपि।

नेपथ्ये

(रागः—दरबारी कानडा; 'वंध विमोचनराम' वत्)

तर तर भवसिन्धौ, मनुज ! रे ! ॥ध्रु०॥

नृ-देह-नौका, यावदभिन्ना, कार्यसमर्था रे ॥१॥

सुदुर्लभेयं, पुण्यराशिना, क्रीता शुभदा रे ॥२॥

जरा-रोग-मृति-वात्या, भ्यदा, अवधेहि ततो रे ॥३॥

भार्या-सुत-धन-सत्ता-मोहात् माऽन्धत्वं भज रे ॥४॥

आत्माऽस्यमरो नैव नैव जड-नश्वरवपुरसि रे ॥५॥

तमभिज्ञातुं ध्यानपरो वद 'गोविन्द, मुरारे' ॥६॥

छन्न ! अपि रोगो मृतिश् च जरेव विकृतिद्वयं देहे उत्पाद्यमानं कालवशात् ।

छन्नः—(स्वगतम्) यद् नृप-निदेशाद् गोपायनीयं तद् एव दुर्दैव-वशाद् वर्णनीयं भवति । अलीक-भाषणं तु जिह्वा-स्वभाव-विरुद्धं, पुनश् च असत्यकारि । किं करोमि ।

सिद्धार्थः—किं ते चिन्ता-कारणम् । पश्य, पश्य तावत् । कोऽन्व् असौ मध्याह्ने ग्रीष्मर्तौ शासत्य् अपि ऊर्णवस्त्रावृतकायः स्त्रिया बालक इव हस्तेन चाल्यते ।

छन्नः—(स्वगतम्) दिष्ट्या मुक्तोऽस्मि ! (प्रकाशम्) आर्यपुत्र स पुरुषः प्रायः शीत-ज्वरादिरोगार्तो विनाधारं चलितुम् असमर्थः पत्न्या नीयते हस्तेन ।

सिद्धार्थः— अथ, अपि ममाऽपि रोगभयम् ।

छन्नः --युवराज ! न कोऽपि मानवो रोगभयाद् मुक्तः ।

सिद्धार्थः—अथ कीदृशोऽसौ रोगः ।

छन्नः— पानाशखेलेष्वरुचिश् च निद्रा-
नाशः परालम्बनता तनोश् च ।
उत्साहभङ्गश्च सदावमान
इत्यादिकोत्पादक एव रोगः ॥

सिद्धार्थः—वयस्क; आश्चर्यं खलु यत्—

इदं च रोगव्यसनं प्रजानां
पश्यंश्च विश्राममुपैति लोकः।
विस्तीर्णविज्ञानमहो! नराणां
हसन्ति ये रोगभयैरमुक्ताः॥

छन्नः—चिरं भ्रमितम् आवाभ्याम्। अतो गच्छाव इदानीं भवनम्।

सिद्धार्थः—तथास्तु। परम्—

छन्नः—किं परम्?

सिद्धार्थः—चतुर्भिः पुरुषैः स्कन्धेन नीयमानं शुभ्रवस्त्र-रक्त-पुष्पावृतं प्रावृत-हस्त-चरणं निबद्धं किम् अस्ति। अग्रे धृताग्निकुम्भः कोऽप्य् अधोमुखः चलति।

दश-पंचदशा जनाश् च पार्श्वतो गच्छन्ति। सर्वेऽप्य् अनावृत-मस्तका मूकोपमा विषण्ण-वदनाश् च।

छन्नः—(स्वगतम्) इदानीम् अपरिहार्यं मृत्यु-वर्णनम्। (प्रकाशम्) एभिर् मृत-पुरुषो नीयते श्मशानम्।

सिद्धार्थः—तत्र किं ते करिष्यन्ति तस्य।

छन्नः—काष्ठमय-चितां विरचय तदुपरि तं निधाय तां ते प्रज्वालयिष्यन्ति।

सिद्धार्थः—अहह! वयस्क, अप्य् अनेन मार्गेण अहम् अपि नीतोऽग्निसात् च कृतो भविष्यामि।

छन्नः—आर्यपुत्र, न कोऽपि मानवोऽस्माद् मरणाद् मुक्तः।

अकिंचनो वा नृपतीश्वरो वा मूढातिमूढो विदुषां वरो वा।
साधुः खलो विप्रवरोऽन्त्यजो वा नारी, नरो, मृत्युवशोऽस्ति सर्वः॥

सिद्धार्थः—वयस्य! एता अदृष्टपूर्वा दैहिक-विकृतयो नेत्रे उन्मील्य मां चोदयन्तीव संसार-निवृत्तये। जरा, रोगः मृत्युः! जरा रोग; मृत्युः! ध्रुवा मानवस्य, ध्रुवाः सिद्धार्थस्य।

छन्नः—आयुष्मन्, निवृत्ति-योग्यः कालस् तु सुदूर एव। वत्सः रोहिलस त्व् अर्भकः। स पितृच्छत्रं दीर्घ-कालम् अपेक्षते। गच्छाव राज-भवनं सत्वरम्। परिक्रीत-रथेन गच्छावः। समीपस्थे चत्वरे प्राप्स्याव रथम्।

सिद्धार्थः—जरा रोगः मृत्युः, ध्रुवाः मानवस्य। ध्रुवाः सिद्धार्थस्य।

छन्नः—(स्वगतम्)

सुमंदहास्यं प्रथमार्भकस्य
प्रेमार्द्रदृग् वाक् स्मितमङ्गनायाः।
मतिभ्रमं यस्य हरन्ति न द्राग्
योगी पशुर्वा युवकः स नान्यः॥

चलतु आयुष्मान्।

(हस्तेन गृहीत्वा निष्क्रान्तः)

[यशोधरा रुदन्ते राहुलं लालयित्वा प्रयतते सान्त्वयितुम्]

यशो०—वत्स शान्तिम् उपेहि, शान्तिम् उपेहि। अपि तात-मुख-दर्शनातुरत्वाद् रोदिषि। अचिराद् एव स आगच्छति, त्वां च लालयति। तावद् गीतं शृणु। (बालकार्थं दोलागीतम् गायति)।

वत्स, वरय निद्रां, वर-निद्रां, सुखदां बलदां शिवदाम् ॥ध्रु०॥
अस्तं याति रविः, पश्येमां; तदारक्त-वरशोभाम् ॥१॥
उदितोऽपि शशांकः, मनोहरः, दिनकरकृततापहरः ॥२॥
तव हस्ते दास्ये, तं शशिनं, वत्स विलपनेनाऽलम् ॥३॥
अम्बरमिव तारा, आकाशं, समलंकुर्युः शीघ्रम् ॥४॥
स्वं स्वं नीडमिमं, पक्षिगणं, पश्य चलन्तं शीघ्रम् ॥५॥
रवितेजसि लुप्ते, तम उदितं, पश्योद्दीपितदीपम् ॥६॥
दास्ये क्रीडनकं, रुचिरमहं, नित्यं च नवं तुभ्यम् ॥७॥
नचिरादागच्छेत्, तव तातः तावद् भव रे शान्तः ॥८॥

प्रतीहारी—(प्रविश्य) आर्यपुत्र आगच्छति।

यशो०—आगच्छतु सत्वरम् एव। तदर्थं रोदिति वत्सः। (प्रतीहारी निष्क्रान्ता)

सिद्धार्थः (प्रविश्य)—

जरा-मृत्यु-रोगा ध्रुवा मानवस्य
ध्रुवा राजपुत्रस्य मे चापि नूनम्।
अकस्माद् यतोऽतिक्रमन्ते नरं ते
मयात्माऽवगन्तव्य आशु प्रयत्नैः ॥१७॥

सिद्धार्थः—जरा मृत्युः रोगः, ध्रुवा मानवस्य ध्रुवाः सिद्धार्थस्य। (सुखासने उपविश्य नेत्रे निमीलयति)।

यशो०—नाथ, कुतोऽयं चित्तविक्षेपः? कुतोऽयं मनोभ्रमः। आर्य कुलदेवते! पाह्य अस्मान् सदय-दृष्ट्या। प्रकृतिं प्रत्यागच्छतु नाथः सत्वरम्। [सिद्धार्थम् उपेत्य कराग्रेण च भालप्रदेशं स्पृष्ट्वा] अपि बाधते शिरोवेदना। ज्वरस्तु न प्रतीयते। हला मंगले! (मंगला प्रविशति)।

मंगला—किम् आज्ञापयति देवी।

यशो० - शीतपेयम् आनय सत्वरम्।

मंगला—यथाज्ञापयति देवी। (निष्क्रान्ता)

यशो०—(व्यजनेन वीजयन्ती) नाथ! उच्यताम्। (राहुल आक्रन्दति) अयि! वत्सः लालने समातुरः पितुः सकाशात् (पतिमुखं मृदुकरेण सस्नेहं परामृज्य) नाथ! उन्मीलयतां नयने, अवलोक्यतां च सकृदेव स्नेह-दृष्ट्या इयं प्रिया यथापूर्वम्। (मंगला पेयं स्वामिन्या हस्ते दत्त्वा निष्क्रान्ता) इदं मधुरं शीतपेयं सेव्यतां स्तोकं स्तोकम् (ओष्ठ-लग्नं करोति)।

सिद्धार्थः—(दृष्टिम् उन्मील्य) देवि, पिबामि तावत् त्वया सादरम् आनीतं पयः। (पानम् आरभते) परं न माम् इमे बाह्योपचारा इदानीं परितोषयन्ति।

यशो०—अपि किम् अपि भयदं दृष्टि-पथम् आगतं नगर-भ्रमणे।

सिद्धार्थः—आम्। न केवलं दृष्टि-पथम् आगतं, परं तेन दृश्य-जातेन मे दृष्टिर् यथार्थत उन्मीलितापि मायामोह-समावृता।

यशो०—(राहुलं पालकाद् आनीय पुरस्कृत्य) अवलोकयतु नाथ एनं स्नेहेन, गृहीत्वा लालयतु च क्षणमात्रम् ।

सिद्धार्थः—यशोधरे, मां त्वाम् एनं वत्सं च कवलयितुं समातुरेषु जराभरण-रोगेषु पुरतो दृश्यमानेषु का स्नेहवार्ता ? का लालन-वार्ता ? (गृह्णाति वत्सं परं निःस्नेहम्)

यशो०—शान्तं पापम् ! शान्तं पापम् ! (कर्णौ पिधाय) जगदम्ब ! त्वम् एव शरणम् अधुना । पाहि नः करुणार्द्र-दृष्ट्या । (अन्तर्गृहं गत्वा कुदृष्टि-पीडित-निवारणाय लवणं सर्षपं च हस्ते आनीय हस्तयोर् भर्तुः संमुखे ततश् च राहुलस्य संमुखे वर्तुलाकार-हस्तौ मंदमंत्रोच्चारेण सह भ्रमयित्वा, गृहाभ्यतरे च गत्वाग्नौ क्षिपति समाकृष्ट-दृष्टि-दोषं तत् साहित्यम्) ।

सिद्धार्थः—गृहाण इमम् वत्सम् यशोधरे, गृहाण, इमम् । सावधानम् ! सावधानम् ! सावधानम् ! इति विवाह-समये पुरोहितेन भूय उच्चारितस्य शब्दस्याऽर्थोऽद्यैव मम धिया याथार्थ्येन अभिज्ञातः ।

यशो०—(राहुलं गृहीत्वा उत्संगे निधाय सान्त्वयन्ती) नाथ ! स्पष्टम् उच्यताम् ।

सिद्धार्थः—शृणु तावत् । मया जराजर्जरितो रुग्णो मृतश् चाऽद्य साक्षात्कृताः प्रथमम् एव । ते मां तीक्ष्णं भीषयित्वा प्रेरयन्ति संसार-त्यागाय प्रव्रजनायाऽऽत्म-बोधाय च सत्वरम्-सत्वरम् । (निद्रालुर् भवति)

यशो०—(कर्णौ पिधाय) अहह ! दुर्विधे ! किम् अभद्रं त्वया मम ललाटे लिखितं, न जाने । मंगले, हला, मंगले ।

मंगला—(प्रविश्य) आज्ञापयतु देवी ।

यशो०—श्वशुर-पादान् विज्ञापय यद् आर्यपुत्रस्य मनोऽस्वस्थं संवृत्तम् । अतः तेषाम् अत्रागमनं प्रार्थ्यते शीघ्रं स्नुषयेति ।

मंगला—यथादिशति स्वामिनी (निष्क्रान्ता) ।

यशो०—दृश्यतां तावत् । समयज्ञ इव वत्सः तूष्णींभूतः । (तं पालके निधाय दोलां चालयति, मंदं मंदं गायति च निद्रा-गीतम्) ।

मंगला—(प्रविश्य) तातपादा द्वारं प्राप्ताः।

यशो०—प्रवेशय शीघ्रं सादरं च।

(निष्क्रान्ता)

[ततः प्रविशति शुद्धोदनः। यशोधरा तस्य पादयोः शिरो निदधाति]

शुद्धो०—वत्से ते सर्वतः सौभाग्यम् अस्तु।

यशो०—ईदृश आशीर्वादः सर्वदैव समर्प्यते गुरुजनैः। परम् इदानीं तस्य सफलता शंकास्पदतां गतेति भयं समुत्पन्नम्।

शुद्धो०—जाते, अलं भयेन। कृतं शङ्कया। विदितं मया छन्नमुखाद् वत्सस्य मनसोऽस्वास्थ्यं समुत्पादितं वैराग्योत्पादकैर् अदृष्टपूर्वैर् जरामरणरोगादिभिर् भीषणदृश्यैः।

सिद्धार्थः--(प्रबुध्य) अयि! तातपादाः!

(उत्थाय पादयोः पतति)

शुद्धो०--वत्स, आयुष्मान् भव।

सिद्धार्थः—अनुगृहीतोऽस्मि खल्व् अद्य अनेनाऽऽशीर्वादेन।

शुद्धो०--कोऽभिप्रायो वत्सस्य।

सिद्धार्थः--परिव्राजकेन मया विनायुष्मत्ताम् आत्मावबोधोऽशक्यप्राय एव।

शुद्धो०—वत्स, अपि इदानीं ते यौवनभरे प्रव्रजनवार्ता न आकालिकी। धर्म-शास्त्रेण आदिष्टम् आश्रम-क्रमं जानास्य् एव। आदौ गृहस्थाश्रमस्य सम्यगाचरणम्। पुत्रेण स्वीकृते प्रपंचभारे, स्नुषायां गृहं प्रविष्टायां, नप्तृ-मुखदर्शनोत्तरं वानप्रस्थाश्रमः, ततश्च संन्यास इत्येव युक्तम्।

सिद्धार्थः—परं तात, 'यदहरेव विरजेत् तदहरेव प्रव्रजेत्' इत्यपि धर्माऽऽज्ञा।

शुद्धो०—वत्स त्वयि यद् वैराग्यम् अद्य समुदितं तत् तात्कालिकम् एव। क्षणजीवि तत्। रात्रौ नृत्यांगनानां नृत्यगायनादि-समारोहम् आयोजयिष्यामि। तद्-दर्शन-श्रवणेनेदं वैराग्यं विलीयेत, हिमं यथा सूर्योदयेन।

यशोधरा—तातपादैः सम्यग् विचारितम् । वत्सो राहुलोऽवश्यम् उपस्थास्यति तं समारोहं मातापितृभ्यां सह ।

सिद्धार्थः—उपस्थास्यामि परम् ।

शुद्धोदनः—अलं शङ्कया । जानास्य् एव यद् वैराग्योत्पादक-घटनाभिः प्रभाविता झटिति गृहीत-संन्यासाश् च बहवोऽविवेकिनः गृह-त्यागानन्तरं पश्चात्ताप-दग्धा जीवितविफलतां गताः । वराका वञ्चिता उभाभ्याम् अपि संसार-सुखाद् आत्म-दर्शनाच् च ।

यशो०—दिष्ट्या प्राप्तं राजैश्वर्यं संसारसुखं च भोक्तव्यं परमेशस्मरण-पूर्वकं सद्वर्तनेन इत्येव इदानीं श्रेयस्करम् ।

शुद्धो०—पश्य, कियती सुज्ञा ममेयं स्नुषेति ।

जाते, समाश्वसिहि सर्वम् अपि ते मंगलं भविष्यति । अलं चिन्तया । (प्रेक्षकान् उद्दिश्य) भोः सज्जनाः, पश्यत तावत्, चिन्ताव्याकुलोऽप्य् अहम् 'अलं चिन्तयेति' उपदिशामि इमां मयि विस्रब्धाम् । हन्त ! इतीदृशः कैतवावगुंठितः शिष्टाचारः । (निष्क्रान्तः) ।

यशो०—अनुगृहीतास्मि (जवनिकापातः) ।

[ततः प्रविशतः सिद्धार्थश् च छन्नश् च]

छन्नः—मा मा एवं मां कृच्छ्रे पातयतु युवराजः ।

सिद्धार्थः—अपि वयस्येन वयस्यस्य साहाय्यं न कर्तव्यम् ।

छन्नः—अवश्यम् एव कर्तव्यं परं शुभकर्मणि ।

सिद्धार्थः—अपि मम जन्म-मृत्यु-दुःख-हर आत्मावबोध-प्रयत्नोऽशुभं नाम कर्म ।

छन्नः—सफलं चेत् तत् शुभं कर्म स्यात् ।

सिद्धार्थः—अप्य् अद्यावध्य् असफलीभूतोऽवलोकितम् त्वया निश्चयः सिद्धार्थस्य ।

छन्नः—न मे तथाभिप्रायः । अतीवाकालिकं स्यात् भवदीयं प्रव्रजनम् । तच् च न केवलं सवत्सां देवीं यशोधरां राजानं च शोक-महोदधौ पातयेत्, अपि तु सकलां भवत्य् अनुरक्तां प्रजाम् अपि ।

सिद्धार्थ-प्रव्रजनम्

विश्वनाथकेशवः छत्रे*

सिद्धार्थः—आत्मार्थं पृथिवीम् त्यजेत् । का कथा इतरेषाम् ।

छन्नः—भवान् एक एव पुत्रो महाराजस्य, अतस् तस्य, धर्मशास्त्रतः पत्न्याश् चाऽनुमतिर् आदाव् अवश्यं लब्धव्या प्रव्रजनाय ।

सिद्धार्थः—द्वाभ्याम् अपि दुर्लभप्राया सा माया-मोहवशात् । अतस् तव साहाय्यस्याऽपेक्षा ।

छन्नः—मा मा प्रतारयतु स्वजनान् एवं सुज्ञ आयुष्मान् । मित्रत्वेन मन्त्रये, युवराज, अनुभव-संपन्नेन जनकेन सह विमृश्यताम्, स्थिरधिया, विस्रब्धा पत्नी चाऽप्य् उपेक्षया नावमन्यताम् । गच्छतु कालावधिः ।

सिद्धार्थः—(स्वगतम्) अत्र वाद-विवादो निष्फलः स्यात् । कारागाराद् अपजिगमिषुर् बंदी सद्वर्तनेन विश्वासम् उत्पादयति, अकस्मात् कार्यं च साधयति । तथैव इदानीं मया कर्तव्यम् । (प्रकाशम्) वयस्य, तव हितबोधो विचारणीय एवेति मे आभाति । अनुगृहीतोऽस्मि सामयिक-प्रबोधनेन ।

छन्नः—प्रीतोऽस्मि विवेकस्याऽऽश्रयं गतं साहसाद् निवृत्तं च दृष्ट्वा आयुष्मन्तम् । साधयामि (निष्क्रान्तः) ।

---

*शास्त्री; जोगलेकर वाड़ा, सिद्धेश्वर आणळी, कल्याण (जि० ठाणे) ।

सिद्धार्थः—मया अपि यशोधरा-मन्दिरं गन्तव्यम्। सा वराकी क्षुधार्ता, मां चिरं प्रतीक्षमाणा स्यात्।

[उभौ निष्क्रान्तौ]

[शुद्धोदनः स्वमन्दिरे मञ्चके उपविष्टः]

शुद्धो०—कः कोऽत्र भोः।

प्रतिहारी—(प्रविश्य) आज्ञापयतु महाराजः।

शुद्धो०—यशोधरां विज्ञापय यत् तस्या दर्शनं स्वमन्दिरे श्वशुर इच्छतीति।

प्रतीहारी—यथादिशति महाराजः (निष्क्रान्ता)।

शुद्धो०—
अप्राप्तस्य प्राप्तये घोरचिन्ता,
चिन्ताऽनल्पा प्राप्तसंरक्षणस्य।
चिन्तां दृष्ट्वा रक्षितं नश्यमानं,
नष्टे चिन्ता धिग् भवं चिन्तयार्तम्।

प्रतीहारी—(प्रविश्य) देव, देवी यशोधरा प्राप्ता द्वारम्।

शुद्धो०—शीघ्रं प्रवेशय।

प्रतीहारी—यथादिशति महाराजः।

यशो०—(प्रविश्य) अभिवादये तातपादान्। का आज्ञेदानीम्।

शुद्धो०—कीदृशी मनः-स्थितिर् वत्सस्य। नृत्य-गीतैस् तस्य मनः समुल्लसितं न वा।

यशो०—नृत्य-गानेऽल्प-कालम् आर्यपुत्रो रुचिं दधान इव आभात्। परम् अनन्तरं निमीलित-लोचनः स स्वासनं स्वस्थः तस्थौ।

शुद्धो०—किं कार्यम् इदानीम् । महद् एव कृच्छ्रम् आपतितम् ।

यशो०—कुलदेवता-प्रसादनाय धर्मशास्त्रादिष्टो विधिः कार्यः पुरोहित-द्वारा इति सूच्यते ।

शुद्धो०—तथादिशामि पुरोहितम् । वत्से, इदानीं जगदम्बा एव शरणम् सर्वभावेन सा प्रार्थ्यताम् ।

यशो०—ह्यस्तन-निशा मया उन्निद्रया तस्याः प्रार्थनयैव यापिता । सा किंचिद् अनुकूला इत्य् अपि प्रतीयते ।

शुद्धो०—(सकुतूहलम्) अनुकूला कीदृशी ? जाते, कथय कथय शीघ्रम् ।

यशो०—अद्य भोजन-समयेऽतिक्रांतेऽपि गृहम् आगतेन आर्यपुत्रेण प्रथमं वत्सो राहुलो लालितः सस्नेहम् ।

शुद्धो०—वत्से, अनुकूला । निश्चयेन जगदम्बा अनुकूला । [जवनिका-पातः]

———

[सिद्धार्थो यशोधरा स्वमन्दिरे सुखोपविष्टौ । राहुलो दोलायां सुप्तः । यशोधरा गवाक्षाद् दृश्यमानं सुधांशुं विलोक्य सानन्दं गायति ।]

(रागः मालकंसः)

कियदाह्लादकरः, चन्द्रमाः कियदाह्लादकरः ॥ ध्रु० ॥
रत्नाकरसंभवः स दिष्ट्या, गगनविहारकरः ॥ १ ॥
साक्षीभूतः सोऽपि भगवतो, निशि नक्षत्रवरः ॥ २ ॥
दाहशान्तये धृतः शंभुना, शिरसि स शीतकरः ॥ ३ ॥
प्रतीक्ष्यते लोकैः स सादरं, तृप्तैरमृतकरः ॥ ४ ॥

देवदानवैः प्रमथिताद् रत्नाकरात् समुदितेषु चतुर्दश-रत्नेषु, सकललोकदृष्टिपथे गगने भ्राम्यद् नयनाह्लादकरं, सुधास्यन्दि चेदं चन्द्रमा नाम रत्नं नन्व्अप्रतिमम् एव ।

सिद्धार्थः—देवि, अप्रतिम-तापशामकत्वेन च सादरम् इदं रत्नं तेन स्वजटाजूटे देव्या भागीरथ्या सह भगवता भवानीपतिशंभुना, शमयितुं हालाहलोद्भूतं भीषणम् एव स्वदेहदाहम् ।

यशो०—शिवभूषणभूतोऽयं हिमांशुः सोत्कण्ठं प्रतीक्ष्यते लोकैः प्रत्यहं दिनकर-ताप-संतप्तैः । पूज्यतेऽप्य् असौ तैर् देवाधि-देव-शिरोऽधिरूढो देव इव स्वकामपूरणहेतोः ।

सिद्धार्थः—'नक्षत्राणामहं शशी' इति स्वविभूति-वर्णने भगवता श्रीकृष्णेन स्वमुखेन स ग्रथित इति तस्य विशिष्टं महत्त्वम् ।

यशो०—स ओषधीशोऽपि । निशायां वृक्षलतादिवनस्पतयः तत एव जीवन-रसं लभन्ते । प्रवासिनां पथदर्शनं स करोति रात्रौ । अहा ! स्मृतं बाल्ये चेद्रिकायां कृतं प्रवसनम् । नितान्तं रमणीयम् । वृक्षशाखापल्लवच्छायाभ्यन्तरात् स्थले स्थले निष्पतन्ती चन्द्रिका मार्गे निपतिता, चित्र-विचित्राकृतीश् च धारयन्ती अतीव मनोहरा खलु । ईदृक् प्रवसनसुखं भूयोऽनुबुभूषामि । यद्य् आर्यपुत्रोऽपि तथेच्छति तर्ह्य् एव तत् सुख-साफल्यम् । यतः 'एकाकिनः प्रवसतो हि कुतो नु सौख्यम्' ।

सिद्धार्थः—(सस्मितम्) कविता-स्फूर्तिः तव हृदये जागरितेति दृश्यते । सुन्दरतरुणी-मुखं तु सर्वैः कविभिः सदैव चन्द्रेणोपमीयते मुख-चन्द्रमाः, मुखेन्दुः, मुख-शशी इत्यादि-रीत्या । मन्ये, देव्या अपि मुखचन्द्र इदानीं स्पर्धते कान्तिमत्तायाम् आकाशस्थ-चन्द्रेण सह ।

[निरीक्षते एकदा तदानने, अन्यदा च गगनस्थे शशांके]

यशो०—[कृतककोपं नाटयित्वा] अलं परिहासेन । (स्वगतम्) आर्य-पुत्रः प्रकृतिम् आपन्न इव प्रतीयते । जगदम्ब ! तवैवेयं कृपा (प्रणमति) । (प्रकाशम्) कोऽभिप्राय आर्यपुत्रस्य मयोपस्थापिते चन्द्रिका-प्रवसन-विषये ।

सिद्धार्थः—देव्या आज्ञा मे प्रमाणम्। परं को नु विषयः प्रणामस्य। को हेतुः।

यशो०—चन्द्रमा अयम् इदानींतन-संभाषण-विषयः, काव्यात्मक-विचारसमुत्पादकश्च, अथोच्यतां, कदा कुत्र च गन्तव्यम् इति।

सिद्धार्थः—स्वामिन्या एव आज्ञापयितव्यम्। न तत्राधिकारो दासस्य।

यशो०—(सस्नेहम्) मा मैवं स्वावमानेन। तत्त्वतो भर्ता एव स्वामी। अत उच्यताम्।

सिद्धार्थः—विषयस् तु देव्या उपस्थापितोऽतस् तयैवोच्यताम्।

यशो०—शैलशिखरस्थित-जगदम्बा-दर्शनार्थं गन्तव्यं न चिराद् इतीष्ट ते।

सिद्धार्थः—प्रातर् एव ताताऽनुमत्याऽऽयोजितं मया प्रवसनम्।

यशो०—कथं न्व् एतावत्-कालपर्यन्तं न मे स्तोकांशेनाऽप्य् एतत् सूचितम् आर्यपुत्रेण। शाठ्ये प्रायेण प्रवृत्तिः सर्वेषां वल्लभानाम्।

सिद्धार्थः—प्रियाया इष्टार्थस्य यावच्छक्यं गूहने, उचित-समये च तस्य सहसा प्रकटीकरणे निर्विशेष आनन्दो वर्तते। तदर्थम् एव एष मे प्रयासः।

यशो०—(गाढं परिष्वज्य) अयि! सुदृढं मयि अनुरक्त आर्यपुत्रः। मा दूषयत्व् इमं मे गाढम् आनन्दं स्वेच्छाचारी विधिः।

सिद्धार्थः—(स्वगतम्) अहह! वराकी नाभिजानाति यत सुखस्य परमावधिर् एष नाम प्रारम्भो दुःखस्य। (प्रकाशम्) देवी निद्राभिभूताऽऽभाति। दिष्ट्या वत्सः गाढं सुप्तः। देव्य् अपि मञ्चकं गत्वा निद्राधीना भवतु। करोमि ते साहाय्यम्।

(यशोधरां मञ्चकं नीत्वा स्वापयति स्वयं च सुखासने पूर्ववद् उपविश्य स्वगतम्)

जरा, रोगः, मृत्युः, ध्रुवाः मानवस्य, ध्रुवाः सिद्धार्थस्य। लक्षावधियोनीर् भ्रमित्वा, पुण्य-पापयोः समानयोः संवृत्तयोर् नरदेहं लभते जीवः। मृत्युः कस्मिन् क्षणे इमं पाञ्चभौतिकं देहम् अपहरेत् तद् अनिश्चितम् एव। अतः 'गृहीत इव केशेषु मृत्युना धर्ममाचरेत्'।

मानव-जीवनस्य त्रिविधदुःख-दर्शनम् आजन्म-सुखे एव अभिवर्द्धितस्य मम दृष्टिपथम् एकस्मिन्न् एव दिवसे आगतम्। विधातुः तत्र कोऽपि

विशेषो हेतुः स्यात् । परेद्युः स्वप्ने मया कश्चित् परिव्राड् दृष्टः । सोऽपि मां प्रेरयति सर्व-संग-परित्यागाय; ध्यानयोग-परायणतया चाऽऽत्मात्माऽऽत्मबोधाय ।

मयाऽवश्यं परिव्रजितव्यम् । कदा ? सर्वान् आपृच्छ्य, सर्वानुमत्या, सम्यग् विचार्य, नहि ! नहि ! मासांते, सप्ताहांते, परेद्युः, श्वः; नहि ! अद्यैव ! उषः-कालात् पूर्वम् एव नचिरात् मध्यरात्रौ, सर्वेषु विस्रब्धं सुप्तेषु स्तेयाय तथा प्रव्रजनायापि स एव योग्यः समयः ।

नगर-भ्रमण-समये परिहितः सामान्य-वेषः दिष्ट्या·····(राहुलस्याक्रन्दनं श्रुत्वा) आः ! वत्सः प्रबुद्धः । तम् उत्थाप्य देवीकुक्षौ निदधामि (तथा करोति । यशोधरा वत्सस्पर्शेन अर्धप्रबुद्धा तं गाढं परिष्वज्य स्तन्यम् अर्पयति । मातापुत्रौ च नचिरात् गाढं प्रसुप्तौ) ।

अहह ! मम वत्सः पितरि जीवत्य् अपि अनाथो भवेत् । भर्तरि सत्य् अपि देवी अनाथा भवेत् । पुत्रे सत्य् अपि अपुत्रः तातः भवेत् । दशरथ इव पुत्र-शोकेन स मृत्यु-मुखे कदाचित् पतेद् अपि ।

रे सिद्धार्थ-हतक ! किं विपरीतं त्वया मन्त्रितम् । किं ते इदानीं कर्तव्यम् । अपि भीरुर् इव कर्तव्य-पराङ्मुखो भवितुं मंत्रयसे । तातः त्वत्तो राज्य-धुर्ग्रहणम् अपेक्षते । पत्नीस्तनंधयेन सह भरणं पोषणं संरक्षणं चाऽपेक्षते । वत्से राहुले यौवनं प्राप्ते, राज्य-भार-वहनाय च समर्थे कृते सर्वान् आपृच्छ्य तैर् अनुमत एव प्रव्रजितुम् अर्हसि । न तत्पूर्वम् । तेषां सदिच्छयैव तवाऽऽत्मावबोध-प्रयत्नः सफलीभवितुं शक्यः । नाऽन्यथा ।

[यशोधरा स्वप्ने प्रलपति— 'जरा, मृत्युः रोगः, ध्रुवाः मानवस्य ध्रुवा आर्यपुत्रस्य']

कः प्रलपति । को नु मां प्रेरयति (इतस्ततो दृष्ट्वा) आः ! इयं देवी स्वप्ने प्रलपति । परं सा नूनं दिष्ट्या प्रबोधयति मोह-वशं माम् । स्मरामि तं नृत्य-गायन-प्रसंगम् । मोहक वेष-धारिणीनां तासां वार-योषितां कलाविभव-प्रदर्शनेन अरममाणोऽह स्वासने निमीलित-लोचनोऽतिष्ठम् । परिसमाप्ते तदुत्सवे, यावद् अहं दृष्टिम् उदमीलयम् तास् ता वारयोषितः तस्मिन् एव मञ्च इतस्ततोऽव्यवस्थिताः श्रान्त-सुप्ता अदर्शनीयावस्थायां मयाऽवलोकिताः । सर्वम् अपि पूर्वं सौन्दर्यं वैरूप्ये परिवर्तितम् आसीत् । काचन एका स्वमुख-चन्द्रात् लालां स्रावयन्ती दृष्टा । अपरा दन्तपंक्ति-प्रदर्शनाय इव

व्यात्तानना स्थिता विलोकिता। काचन घुर्घुरायमाणा वीक्षिता। कासांचन कटकटेति-दन्त-पंक्ति-संघट्टन-ध्वनिर् अश्रूयत। कस्याश्चित् उरोभागः, कस्याश्चित् ऊरुप्रदेशश् च विवस्त्रत्वाद् असंगलोऽदृश्यत। ईदृशं नाम सौन्दर्यम्।

[यशोधरा स्वप्ने प्रलपति–जरा मृत्युः रोगः, ध्रुवाः मानवस्य ध्रुवाः आर्यपुत्रस्य।]

सिद्धार्थ ! देवी त्वां भूयः प्रबोधयति—'मा माऽयि मोहं गमः'। प्राप्तः प्रव्रजन-क्षणः। दिष्ट्या माता-पुत्रौ गाढं प्रसुप्तौ। सर्वम् अपि निग्रह-सामर्थ्यम् एकीकृत्य क्षणार्धे छिन्द्धि एतान् माया-पाशान्, कुरु च निर्गमनम्। विस्रब्धः छन्नः पूर्वरात्राव् एव मया विज्ञापितः यत् युवराजस्य अश्वस्य नाम कंथकम् आरुह्य सामान्य-वेषेण एकाकिना मया मध्यरात्रौ भ्रमितव्यं निभृतं नगर्यां राज्यशासन-विषयिणीं जन-चर्चां श्रोतुम्। नचिराद् एव राज्य-भारं धरिष्यमाणस्य मम ईदृशः गुप्त-संचार आवश्यक इति। प्रतीतः स वराकः प्रबोधितमात्र उत्थाय सिद्धम् अश्वं पुरस्कृत्य मम निर्गमनं निष्कण्टकं कुर्यात्। देवि ! आपृच्छे त्वाम्। मा मयि क्रोधं कुरु। उच्चतर-ध्येय-सिद्धये मे निर्गमनम्। वत्सं प्रतिपालय। क्षमस्व सर्वान् अपि ममापराधान्। अहा ! विशेषेण कांतिमद् दृश्यतेऽस्या आननम् इदानीम्। प्रायेण स्वप्ने सा काम् अपि सुखसंवेदनाम् अनुभवति। वत्सोऽपि निरागसम् आनन्दं भुञ्जान इव दृश्यते। अन्तिमम् आलिंगन-सुखम् उभयोर् आस्वाद्य निर्गतव्यम्। [ठण् ठण् ठण् इति द्वादश मध्यरात्र-निर्दशकाः घण्टाघाताः श्रूयन्ते। आलिंगन-प्रवृत्तः सिद्धार्थः घण्टाघातान् श्रुत्वा परावृत्य] नहि ! नहि ! एतयोः स्पर्शमात्रो मां मोहयित्वा निश्चितार्थात् परावर्तयेत। घण्टाघातो मां प्रबलं प्रेरयति। क्षणस्याऽपि विलम्बः सर्वम् अपि कार्यं विनाशयेद् इति। शुभाशिषो देव्यै वत्साय च। गच्छामि, निर्गच्छामि, प्रव्रजामि परिव्राड् भवामि।

(रागः भैरवी रच्छा प्रभो इव गेयम्)

देहि विभो ! धैर्यमुचितमाप्तुमीप्सितार्थम्॥ ध्रु०॥

प्रव्रजतां मार्गोऽयम्, प्रव्रजतां मार्गोऽयं कण्टकमय-जालाकीर्णम्॥

भोः त्वमेव तातः, भोः त्वमेव माता,
पाहि, पाहि, देहि चात्मदर्शनमतिशीघ्रम्॥

[निष्क्रान्तः]

इति सिद्धार्थ-प्रव्रजनम्

अपूर्वः शांतिसंग्रामः

नाट्यकथा

६ एप्रिल १९७० दिनांके अहमदाबादतः गांधिमहात्मना प्रारब्धायाः अभूतपूर्वायाः दांडीयात्रायाः प्रसंगम् अधिकृत्य मया विरचिता इयं नाटिका। केसरीपत्रे सद्यः एव प्रकाशितं तद्यात्रावर्णनं मया यौवने पठितं स्मारं स्मारम् इदानीमपि हृष्यामि।

लोकमान्ये दिवंगते स्वदेशस्वातंत्र्य-यत्नचिंतां वहन् कृषकः विठ्ठलः देशभक्तं विधिज्ञं आऊरावं द्रष्टुम् आगच्छति। लोकमान्यकृतां देशसेवां कृतज्ञतया स्मरन् सः पृच्छति चिंताकुलतया, इदानीं भारतीय-जनतानेतृत्वं कः करिष्यति इति। तदा आऊरावः समाश्वासयति विठ्ठलं कथयन् यत् आफ्रिकायां शासकैः गौरकायैः अन्यायेन पीड्यमानाः कृष्णकायाः येन महापुरुषेण सत्याग्रहप्रधानेन अपूर्वा शांति संग्रामेण दुःखमुक्ताः कृताः सः गांधिः दिष्ट्या नवनायकः लब्धः इति।

तेन आंग्लशासनविरुद्धं भारते प्रवर्तितायाः असहकारनीतेः आदेशानुसारं आऊरावः न्यायालयं परित्यज्य गृहं निवर्तते। तन्मुखात् विधिज्ञकार्यं तावत् स्थगयति आर्या जानकी विज्ञाय प्रपंच्यावस्थदव्य-

अपूर्वः शांतिसंग्रामः

नाट्यकथा

विषये सचिंता भवति। अन्यांतरे कन्या उज्ज्वलापि सर्वकारसंचालितविद्यालयं स्वयं विहाय छात्रांश्च तं त्यक्तुं संप्रेर्य प्रत्यगच्छति मातुश्च चिंतां वर्धयति। पुनः माधवः क्रांतिकृतां मार्गं विश्वसन्, शत्रुरुधिरस्रावेण मातृभुवं स्नापयितुकामः प्रविश्य, प्रतिपादयति यत् नवः प्रवर्तितः असहकारमार्गः न यशोदायीति। उभयोः मार्गयोः प्रतिपादितं कल्पनाचित्रं जानकीं संभ्रमे निपात्य भीषयति भविष्यत्स्थितिविषये।

भाऊरावः लवणनिर्बंधभंगात्मकसत्याग्रहयुद्धे सहभागी भवितुं प्रास्थितः विसृज्यते शोकार्तसांत्वितपत्न्या कथमपि प्रसन्नमुद्रया। कन्यया, द्रव्यार्जनमहं आश्वासयता पुत्रेण, विट्ठलेन च समोदं यशोलाभाय प्रकटिताभिः इच्छाभिः सह।

यथोद्घोषितः दांडीसत्याग्रहः धैर्येण निवर्तितः इति सद्यः प्रसारिता वार्ता वृत्तपत्रे सोत्सुक्यं पठ्यते उज्ज्वलया श्रूयते च अंबया।

गांधि-आर्विन् समयानुसारं मुक्तेषु सत्याग्रहिषु भाऊरावः बद्धमुक्तः निवर्तते गृहं पूर्ववच्च तद्-आनंदेन उज्ज्वलयति।

नाटकम्—

अपूर्वः शान्तिसङ्ग्रामः

विश्वनाथकेशव छत्रे*

(नेपथ्ये)

न शक्यः शस्त्रास्त्रैः खलु शमयितुं कोऽपि कलहः,
परन्त्वात्मक्लेशै रिपुहृदि समुत्पाद्य सुधियम् ।
वशीकृत्य प्रेमार्जवसहितसत्येन तमिति,
दिशन् गान्धिस्तादृक-कृतिभिरपरो बुद्धभगवान् ॥

पात्राणि

१. विट्ठलः —स्वदेश-चिन्तां वहन् कृषकः ।
२. भाऊरावः—विधिज्ञो देश-भक्तः ।
३. जानकी—भाऊरावस्य पत्नी ।
४. उज्ज्वला—भाऊरावस्य कन्या ।
५. माधवः—पुत्रः ।

(प्रवेश—१)

[प्रातः समयः, विधिज्ञः भाऊराव समाचारपत्र-पठने मग्नः स्वकोष्ठे]

विट्ठलः—(प्रविश्य प्रणम्य च) राम राम भाऊराव !

भाऊरावः—राम राम !, अपि कुशलम् ।

विट्ठलः—(सविषादं दीर्घं निःश्वसन्) कुशलम् ! आम्, कुशलम् कौटुम्बिकम्, परं कुतः देशविषयकम् नाम स्वराज्यविषयकम् ।

भाऊरावः—ज्ञातो ज्ञातस् तव हृद्-गत आशयः । लोकमान्यो दिवंगतः, इदानीं स्वराज्य-यत्न-नेतृत्वं कः करिष्यति इति ।

विट्ठलः—मम मनोगतम् एव भवताऽऽविष्कृतम् । प्रशस्यः खलु बुद्धि-विभवः भवादृशानां सुशिक्षितानाम् ।

भाऊरावः—परं किम् आगमन-प्रयोजनम् । प्रायः आवश्यक-वस्तुक्रयार्थम् अद्य साप्ताहिक आपण-दिवसः ।

---

* जोगळेकरवाडा, सिद्धेश्वर आळ, कल्याण (जि. ठाणे) ।

विट्ठलः—आम्, इदं त्वशाकेपायनम् आनीतं भवतां कृते। (पुरस्करोति)

भाऊरावः—उपायनम्? त्वाम् असन्तुष्टं कर्तुं न शक्नोमि, अत एव स्वीकरोमि, परं वारंवारम् उपायन-स्वीकरणं अनुचितम्। अग्रिमेऽवसरे मूल्यं स्वीकर्तव्यं त्वया।

विट्ठलः—भाऊराव, भवान् देश-सेवार्थं लेखन-व्याख्यान-द्वारा प्रयतते, अतः मादृशेन सामान्य-कृषकेण सेवा-गौरवं यथाशक्ति कार्यम् इत्यपि योग्यम् एव।

भाऊरावः—(सगद्गदम्) धन्यः खलु लोकमान्यः, येन त्वादृशा जनाः 'आंग्लानाम् राज्यम् ईश्वरेण अस्माकं कल्याणाय भारते प्रेरितम्' इति मिथ्याभासं दूरीकृत्य प्रबोधिताः प्रेरिताश् च स्वराज्य-प्रयत्नार्थम्।

विट्ठलः—परम् इदानीं को धारयिष्यति स्वराज्य-शकटस्य धुरम्। न कोऽपि दृश्यते समर्थस् तादृशः।

भाऊरावः—अलं चिन्तया, सर्वसाक्षी परमेश्वरः सत्-कार्यस्य चिन्तां वहति। वर्तते तादृशः समर्थो नेता।

विट्ठलः—कोऽसौ, किं तत्-नाम, किम् अद्यावधि कृतं विशेषं कार्यं तेन।

भाऊरावः—तवौत्सुक्यं प्रशंसनीयं खलु। मोहनदासकर्मचन्दगान्धिः तस्य नाम। आङ्ग्लदेशे अधीतेन विधि-शास्त्र-विषये बॅरिस्टर इत्याऽऽख्यम् उपाधिं धारयता तेन दक्षिणाफ्रिकायाम् असामान्यं नेत्रोद्दीपकं कार्यं कृतम्।

विट्ठलः—किं-किं तत् कार्यम्।

भाऊरावः—सत्ता-मदान्धैर् गौराङ्गैर् लोकैर् व्यवसायकारणेन तद्-देशवासिनो भारतीयाः कृष्णवर्णा इति अमानुष-वृत्त्या निर्दयं पीडिताः।

विट्ठलः—कथम्? कथम् इव?

भाऊरावः—शृणु! लोहमार्गयानस्य प्रथम-श्रेण्या दर्शिकां (टिकट) धारयन्तोऽपि कोष्ठात् परिच्छदेन सह बहिर् निष्कासिताः। अपशब्दासारपूर्वकम् अश्वरथेऽप्य् अन्तः-प्रवेशं निषिध्य, बहिः सारथि-समीपं हठाद् उपवेशिताः कथम् अपि असुखम्, तेषां वसतौ भ्रमितुम् अपि प्रतिबद्धाः।

विट्ठलः—निर्दया अमानुषा राक्षसा एव ते।

भाऊरावः—गान्धिः स्वयम् एव ईदृशीं पीडाम् अन्वभूत्। केनाऽपि गौराङ्गप्रवासिना प्रथमवर्गप्रकोष्ठात् सः स्थानके अधः प्रक्षिप्तः वेदिकायाम्। राज्यपाल-भवन-मार्गे भ्रमतो दृष्टमात्रस्य तस्य भारतीयत्व-निदर्शकम् उष्णीषम् अपरेण अपक्षिप्तम्, स च बलाद् उत्क्षिप्तो दूषित-जल-परिवाहे च पातितः।

विट्ठलः—अहह ! सुशिक्षितब्रुवाः सभ्यब्रुवाश्चेमे अस्मान् शासति। भाऊराव, यदि बॅरिस्टर एवं अवमानितः, तर्ह्यशिक्षिताः कर्मचारिणो भारतीयाः कीदृशीम् अवहेलनाम् अनुभवेयुर् इति कल्पनाऽपि दुःसहा। (क्षणैकं विरम्य) अथ भारतीयानां मानहानिर् निवारिता किं तेन।

भाऊरावः—आम् !

विट्ठलः—केनोपायेन ?

भाऊरावः—गौराङ्गैर् दत्तान् क्लेशान् धैर्येण विषह्य, भारतीयान् संघटय्य, 'इण्डिअन् ओपिनिअन् नाम'-साप्ताहिकपत्र-द्वारा शासकानाम् अन्यायान् निर्बन्धान् अखिल-जगतो विज्ञापनार्थम् उद्घोष्य, विवेकिनः गौराङ्गाश्च ऋजु-मधुर-भाषया वशीकृत्य।

विट्ठल —अहो ! कियन्तः सायासाः !

भाऊरावः—बोअर-युद्धे भारतीयानां शुश्रूषादलं गान्धिना प्रस्थापितं, तेन क्षतविद्धा आङ्ग्ल-सैनिकाः शुश्रूषिताः, काले पञ्चदशक्रोशान् अपि स्कन्धेन वाहिताः, शत्रूणाम् अग्नि-गोलिका-वृष्टिं विगणय्य।

विट्ठलः—किं स्वपीडका अपि सेविता गान्धिनाऽनुयायिभिः सह ?

भाऊरावः—आम् ! अनेन सेवा-कार्येण भारतीयानां निर्भयत्वं शौर्यं राजनिष्ठा कर्तव्य-बुद्धिर् आर्जवम् इत्य् एतैः साक्षात् कृतैर् गुण-विशेषैर् अन्तर् लज्जिताः शासकाः। संकट-काले आङ्ग्लाः सुहृद्-भावेन अवर्तन्त भारतीयैः सह। समाचार-पत्रैर् मुक्तकण्ठं प्रशस्तं तेषां कार्यम्, आङ्ग्ल-शासनेनाऽपि धन्यवादा वितीर्णाः।

विट्ठलः—इदं वृत्तं स्मारयति तुकारामैकनाथादिसाधुचरितानि। अभङ्गान् इन्द्रायण्यां मज्जयितुं तुकारामम् आदिश्य अकस्मात् सर्वाङ्ग-दाहम् अनुभवन् क्लिश्यमानश्च रामेश्वरशास्त्री तेन साधुवर्येण सेवितः दाह-निर्मुक्तश्च कृतः।

भाऊरावः—एवं प्रभवति भारतीया संस्कृतिः। परं सा संकट-कालिनी स्वामिसेवा न पर्याप्ता अभूद् भारतीयानां क्लेश-निवारणार्थम्।

विट्ठलः—अथ किम् अधिकं करणीयम् आवश्यकम् अभूत्।

भाऊरावः—शासनेन तेषां क्लेशा वर्धिता नवनिर्बन्धैः। वार्षिकं करभरं प्रदाय स्वाऽभिज्ञान-पत्रं क्रेतव्यं प्रत्येकं भारतीयेन रक्षितव्यं च नित्यं स्वदेहे प्रत्यभिज्ञानार्थम् इति आदिष्टम्। तैस् तत्र अनुष्ठिता विवाहा अपि ख्रिस्तरीतिम् अननुसृत्य कृताश्चेन् न मानिताः शासनेन।

विट्ठलः—ततः किं कृतं गान्धिना ?

भाऊरावः—स्व-बान्धवाः सत्याऽऽग्रहार्थं सज्जाः कृताः। 'नवान् अन्याय्य-निर्बन्धान् नैव मानयामः' इति उद्घोषितं तेन सभायां बान्धवानां तालिका-नादैः सह। पुनः तथैव—नव-करभारोऽपि न दत्तस् तैः। शासनेन सक्रोधं सत्याग्रहिणः कारायां क्षिप्ताः। स्त्रियोऽपि सुखम् अङ्गीचक्रुः कारावासं सश्रमदण्डं च। गान्धिर् अपि कारावद्धः श्रमम् अकरोद् बान्धवार्थम्। काचन तरुणी कारायाम् एव सुख प्राणान् अजहाद् मर्यादाऽतीत-क्लेशैर् यथोचितौषधोपचाराणाम् अभावाच् च।

विट्ठलः—हन्त ! धन्यः खलु गान्धिर् येन एवं बान्धवाः प्रचोदिताः सत्याग्रहार्थम्। अथ किं परिणतम् ?

भाऊरावः—गोखले महाशयस् तत्र गतः गान्धिनः साहाय्यार्थम्। तदा तस्य मध्यस्थीकरणेन नवनिर्बन्धसमापनं प्रतिश्रुतं शासनेन, गोखलेमहाशयश् च निवृत्तः। परं शासनेन वचन-भङ्गः कृतः। गान्धिना विवर्धितोत्साहैर् अनुयायिभिः पुनः सत्याग्रहोऽनुष्ठितः, कारा-क्लेशाः सोढाः कैश्चिच्च अश्वपदाऽऽघाता अपि।

विट्ठलः—अभिनवो रणः खलु सः।

भाऊरावः—आम्! सत्यम्, अहिंसा, शान्तिश् चेति त्रयं प्रधानं रण-साधनम्। अन्तर्जगति वृत्तपत्रैः सर्वत्र गर्हितं धिक्-कृतं च शासनं गान्धिना सह सन्धिं संपादयामास। करभारः निरस्तः स्वधर्माऽनुरूपं कृताश् च विवाहा मानिताः।

विट्ठलः—जयतु गान्धि-महाशयः। मन्येऽसामान्याव् अस्य पितरौ।

भाऊरावः—स्थाने ते तर्कः। माता सुचरित्रा, धर्म-परायणा, पिताऽपि श्रीमान् तेजस्वी राजकोट-नरेशस्य सचिवः। यदाऽऽङ्ग्लाऽधिकारिणा अवमानितः नरेशस् तदा गान्धि-जनकेन सोऽधिकारी सधैर्यं निर्भर्सितः। क्रुद्धेन अधिकारिणा क्षमा-याचनार्थम् आदिष्टोऽपि स तथाऽकृत्वा कारां सुखम् अविशत्। गीता-चिन्तनस्येदं फलम्।

विट्ठलः—का तावद् गीता ?

भाऊरावः—श्रीकृष्णेन महाभारत-युद्धाऽऽरम्भे पार्थायोपदिष्टा।

विट्ठलः—(मध्ये आक्षिप्य) ज्ञातम् ज्ञातम्। स्मर्यते, दृष्टो गीता-ग्रन्थः।

जानकी—(प्रविश्य) भोः, किम् इदम् उत्साह-शून्यत्वम्। ग्रामान्तरं गन्तव्यं मध्याह्ने इति स्मर्यते किम्। प्रकृतर् एव तादृशी प्रपञ्चमात्रे।

गीता कर्तव्यायाऽपि प्रेरयति । त्वर्यतां, स्नानादि-विधिः समाप्यताम् । अद्याऽपि क्रेतव्यम् आपणाद् वधू-योग्यम् उपायनम् ।

भाऊरावः— हन्त! सर्वथा विस्मृतं मया । उत्तिष्ठामि तावद्, उत्तिष्ठामि तत् त्वरे (उत्तिष्ठति) ।

विट्ठलः— मातः ! इदं शाकोपायनम् ।

जानकी— शाकोपायनम् ? रक्षेदम् , नेष्याम्य् आभ्यन्तरम् ।

(प्रवेशः-२)

[मध्याह्नसमयः । जानकी उच्छिष्ट-पात्र-निःसारणादि-कार्यं समाप्य बाह्य-कोष्ठं प्रविश्य, वेतसाऽऽस्तरणं च प्रसार्य विश्रान्तये यावत् स्वपितुं प्रयतते तावद् द्वारे खडखडायते कोऽपि]

जानकी— (सोद्वेगं साश्चर्यं च द्वारम् उदघाटय पतिं पश्यन्ती) किमर्थं पूर्वं प्रत्यागमनम् , न खलु कोऽपि श्रेष्ठो राजपुरुषो दिवं गतः ।

भाऊरावः— आङ्गल-सत्ताम् इत उन्मूलयितुं सर्वकारेण सह सर्वत्राऽसहकारः कार्य इति गान्धि-महाशयस्याऽऽदेशः प्रतिपालितो न्यायालय-बहिष्कारेण ।

जानकी— (सचिन्तम्) न्यायालय-बहिष्कारेण ? तर्हि धनाऽर्जनं कथं क्रियेत, प्रपञ्चश् च धनं विना कथं वोढव्यः स्यात् | अपि सर्वैर् विधिज्ञैर् बहिष्कृतो न्यायालयः ?

भाऊरावः— देश-कल्याणेच्छुभिः कतिपयैः, (उष्णीषं बहिर्गमनोचित-वस्त्राण्य् अनावश्यकानि चाऽपनीय काष्ठासने उपविश्य मञ्चस्थं पुस्तकं गृहीत्वा पठति) ।

जानकी— (चिन्ताकुला किंकर्तव्य-विमूढा क्षणं तूष्णीं स्थित्वा) सुष्ठु, परं 'प्रपञ्चः प्रथमं विधेयः' इति समर्थादेशः किमर्थं विस्मर्यते । समर्थो हि देशसेवार्थं प्रपञ्चम् उपादिशत् । स्त्री-पुत्र-गेहादिकम् उपेक्षितव्यम् इत्य् आदिशति किं गान्धिः ? अभिनवः खल्व् अयं नेता व्यवहार-शून्यः ।

भाऊरावः— मा मा मा खल्व् एवम्, त्वं न सम्यक् जानासि तस्य भावम् ।

जानकी— स धनं दास्यति किं भवादृश-देश-सेवकाय ?

भाऊरावः— नहि नहि, नाऽसौ धनाढ्यः ।

जानकी— तर्हि किं करिष्यति भवान् ?

भाऊरावः— धैर्यं मा त्यज । राष्ट्रिय-शालां प्रवर्तयामो वयं केचन विधिज्ञा बहिष्कृत-न्यायालयाः ।

जानकी— शिक्षक-वृत्तिं स्वीकरिष्यति भवान् ? शोभनम् वेतनं लप्स्यते न वा ?

भाऊरावः— लप्स्येत, परम् अल्पम् ।

उज्ज्वला— (प्रविश्य सानन्दम्) तात तात ! कथं भवान् शीघ्रं प्रत्यागतः ? मन्ये न्यायालयो बहिष्कृतः ।

जानकी— आम् वत्से, शिक्षको भविष्यति ते पिता । परम् कथं त्वं प्रत्यागतवती शीघ्रम् । बहिष्कृता किं शाला त्वयाऽपि ?

उज्ज्वला— (साभिमानम्) आम्, अम्ब ! न केवलं मयैव बहिष्कृता, परं प्रेरिताश् छात्रा अपि बहिष्काराय उपासख्या सह ।

जानकी— (अञ्जलिं बद्ध्वा नमस्कृत्य) कन्या पितुर् असदृशी कथं स्यात् ? शिक्षणं समाप्तं तर्हि त्वदीयम् ?

उज्ज्वला— न समाप्तम् । राष्ट्रिय-शालां प्रविशामः, तात ! आनन्दं धारयितुं न शक्नोमि । धन्यो गान्धि-महाशयः । देश-सेवा-द्वारं तेन उद्घाटितम् अस्मादृश-युवति-जन-कृते, यथा शिक्षण-द्वारम् आगरकर-महाशयेन पूर्वम् ।

भाऊरावः— (साभिप्रायं पत्नीं प्रति विलोकयन्) अभिनन्दनं जाते, अभिनन्दनम् । धन्योऽहं खलु त्वया देश-सेवोत्साहपूरसंभृतया ।

उज्ज्वला— अम्ब ! अखिल-राष्ट्रे नव-चैतन्येन प्रज्वलितेऽपि त्वं कथं निर्विकारा लक्ष्यसे ? किं हृदये न आनन्दिता त्वं परमार्थतो मम कार्येण ?

जानकी— वत्से ! कथम् आविष्करोमि स्वं संमिश्र-भावं हृद्गतम् ?, वत्से ! आनन्दिताऽपि चिन्तिताऽहम् ।

उज्ज्वला— मातः ! सत्यम् ?

जानकी— वत्से, उपवर-कन्या-मातृ-हृदयम् एव अभिजानीयाद् मम चिन्ताम् ।

उज्ज्वला— अपि देश-सेवा न कार्या संकटे युवतिभिर् इति ते अभिप्रायः ?

भाऊरावः— जाते ! तव माता नाऽपराध्यति, तस्याः शिक्षा-भावोऽपराध्यत्य् अत्र ।

माधवः— (प्रविश्य विलोक्य च) तात ! उज्ज्वले ! कथं युवाम् इदानीं गृहे दृश्येते ? कोऽपि विचारणीयः प्रश्न उपस्थितः ? (मातरं प्रति) किं वृत्तं, मातः ?

जानकी— तव तातेन बहिष्कृतो न्यायालयः, भगिन्या च शाला न केवलं स्वयं त्यक्ता, परं त्याजिता छात्रैर् अपि ।

माधवः— आम्, ज्ञातम्, गान्धि-पुरस्कृतेनाऽसहकारेण कार्यान्विती-भवितुं

प्रारब्धम्। गान्धि-युगम् उदितम्।

जानकी— वत्स, किं ते मतम्? अप्य् असहकारः सफलीभवेत्?

माधवः—नैवम् प्रतिभाति।

भाऊरावः— कथम्? यथा अफ्रिकायां नमितं शासनं गान्धिना, तथैवाऽत्राऽपि भवेत्, कोऽत्र प्रत्यवायः?

उज्ज्वला— अग्रज! वद तावत्?

माधवः— तत्राऽन्याय्य-निर्बन्ध-दूरीकरणमात्रम् अभीष्टम् आसीद्, अत्र स्वराज्यम् अभीष्टम्। महद् अन्तरम् एतयोः।

उज्ज्वला— तर्हि कोऽपरो मार्गः?

माधवः— संग्रामः,रक्त-लाञ्छितः संग्रामः, इतिहासोऽत्र साक्षी। उक्तं हि— 'स्वातन्त्र्यं केन राष्ट्रेण विना संग्राममर्जितम्' इति।

भाऊरावः— किं हिंसा-पथाऽनुसारिणी संवृत्ता ते मतिः? पुण्यपुरी-राजकारेण प्रभावितो दृश्यसे। वत्स! पूर्वं गान्धितत्त्व-प्रणालीं पठ, विचारय, तोलय, ततो निर्णयं प्राप्नुहि इत्येव युक्तम्।

जानकी— वत्स! जनकेन हितं खलु उपदिष्टम्। धनाऽर्जनं प्रारभस्व सत्वरम्। मा मा हिंसा-पथं चिन्तय क्षणम् अपि। भगवन्! इदानीं त्वम् एव मे शरणम्। सुबुद्धिं देह्य् एभ्यो भावना-विवशेभ्यः।

(प्रवेशः - ३)

(दाण्डी-सत्याग्रहिणः प्रस्थानम्)

[दाण्डी-सत्याऽऽग्रहार्थं प्रस्थितो भाऊरावः शोकाऽऽकुलाम् अश्रुपूर्ण-नयनां पत्नीं सान्त्वयति]।

भाऊरावः—(पत्नीम् प्रति) रुन्धि रुन्धि अश्रूणि। सत्कार्यार्थं देश-सेवार्थं प्रस्थितोऽहम्। ईदृश-मङ्गल-प्रसङ्गे शोको न समाश्रयितव्यः, परं समोदं प्रस्थापयितव्यः पतिः स्त्रिया। स्मर तावत् समरार्थं प्रस्थिते पतौ वीराङ्गनाया आचरणस्य।

जानकी— स्मरामि, परं भूयो दर्शनं लभ्येत न वेति भयात् प्रकम्पते हृदयम्।

भाऊरावः— भगवान् एव रक्षिता सर्वेषाम्, तस्मिन् विश्वसिहि, तं प्रार्थयस्व न केवलं मम, अपितु सर्वेषां सत्याग्रहिणाम् संरक्षणाय।

जानकी— मम कर्ण-पथम् आगतं यत् सर्वकारः सुसज्जः प्रतिरोद्धुं सत्याग्रहिणः यष्टि-प्रहारैर् अश्व-पदाघाताऽऽदि-सर्व-प्रकारैः साधनैः समय-वशाद् गुलिका-प्रक्षेपैर् अपि।

भाऊरावः— आर्ये, साक्षात् कृतान्तम् अपि आलिङ्गितुं सुसिद्धा वयं सत्याग्रहिणः, का भीतिः शस्त्राऽस्त्र-प्रहारेभ्यः !

जानकी— श्रुतं मया अफ्रिकायां गान्धिनाऽनुष्ठितस्य सत्याऽऽग्रह-समरस्य वृत्तम्। प्रसङ्गे कारावासोऽपि सोढव्यो भवेत्। कदन्नम्, गौराङ्गाऽधिकारिणां सत्ता-मदान्धत्व-जन्यः पशुतुल्यः व्यवहारः, अस्वच्छता, हीन-दुर्व्यसनाऽऽसक्त-बन्दि-जन-संसर्गः। हा ! कल्पनाऽपि दुःसहा।

भाऊरावः—अपरिहार्यं खलु सर्वम् एतत्। क्षम्यताम् अयं जनः। देश-सेवाऽऽकृष्ट-मनसा गृहीत-व्रतेन मया त्वं वञ्चिता चिराभिलषित-संसार-सुखात्। परं क्षणं तोलय स्वदशां सावरकर-पत्न्या दुःख-स्थया सह। दिष्ट्या सुसह्या सान्त्वोचिता च ते स्थितिः सुकन्यया उपाधिधारि-पुत्रस्य लाभेन च।

जानकी— (सहसा धैर्यम् अवलम्ब्य) कृतं पाषाण-तुल्यं कठिनं हृदयम्। काम् अपि आपदम् सोढुं सिद्धाऽस्मि। परं कुत्र गतौ वत्सौ ? पितुः चिरस्मरणीय-प्रस्थान-समये कथम् अनुपस्थितौ ?

भाऊरावः-- स्यातां कुत्राऽपि समीपम् एव। सुज्ञौ ताव् आवाभ्यां मुक्त-मनसा संवदितुम् अवसरं दातुं प्रायशः।

जानकी-- सुज्ञौ नूनं यथाऽऽह भवान्।

(उज्ज्वला-माधवौ प्रविशतः)

माधवः— (प्रणिपत्य) तात ! शुभास् ते पन्थानः सन्तु, प्रत्यागच्छतु शीघ्रं भवान् विजयान्वितः इति ईशं प्रार्थये।

भाऊरावः— शुभाशिषः सन्तु। विमर्शातिरेकम् अकृत्वा आरभस्व धनार्जनम्। गृहाण प्रपञ्चभारं यथाऽपेक्षितं जनन्या, सुखय च तां प्रयत्नपूर्वकम्।

माधवः— आम्।

उज्ज्वला – (प्रणिपत्य) कृत-कार्यः शीघ्रं प्रतिनिवर्तताम् भवान् विजयोद्दीप्त-मुखमण्डल-श्रीः।

भाऊरावः— वत्से, नैकाशीर्वादाः। न वृथा उपदिशामि त्वां सत्याग्रहादि-देशसेवा-कार्यान् निर्वर्तितुम्, यतः त्वत्-प्रकृति-विरुद्धं तद् भवेत्। कस्मिन्न् अपि प्रसङ्गे शीलं प्रयत्न-पूर्वकं रक्ष झांसी-राज्ञीव इत्येव ममाऽऽदेशः। 'शीलं लोके हि नारीणां विशिष्टं खलु भूषणम्' इति।

उज्ज्वला— प्रमाणं तवाऽऽज्ञा।

भाऊरावः— माधव ! अश्वरथम् आनय। प्रस्थान-वेला समीपं प्राप्ता।

विट्ठलः—(प्रविश्य) राम राम, भाऊराव, दिष्ट्या समये प्राप्तोऽहम्। दर्शनं लभे वा न वेति शङ्कितो भीतश् चाऽऽसम्।

भाऊरावः—राम राम। त्वया ज्ञातं मम प्रस्थानं सविशेषम् अवहितेन राजकीयाऽऽन्दोलने इति अभिनन्दनीयम्। समये एव प्राप्तोऽसि।

विट्ठलः—(चरणयोः प्रणमति) विजयिना प्रत्यागन्तव्यं भवता।

भाऊरावः—(उत्थापयन्) मा मा एवम्, परमेश्वर एव प्रणाम-योग्यो न मादृशः।

विट्ठलः—भवादृशो देश-सेवकोऽपि प्रणाम-योग्य एवेति मन्ये।

माधवः—अश्वरथम् आनयामि। तातेन सिद्धेन भवितव्यम्। उज्ज्वलया सह अहम् अनुगच्छामि। भगिनि! अपि मया नाऽऽविष्कृतं ते मनोगतम् एव? (निष्क्रामति)

उज्ज्वला—आम्, अग्रज, पराऽन्तरज्ञोऽसि।

विट्ठलः—आर्यवर! भाग्यवान् अस्ति खलु भवान्, यो न केवलं द्रक्ष्यति साक्षात् तं महापुरुषं, परं तस्य सहवासं समये च संवाद-सुखम् अपि लप्स्यते। परं किं फलं स्यात् सत्याग्रहस्य? कीदृशो भवतां तर्कः?

भाऊरावः—स्वकर्तव्यम् अनुष्ठातव्यं मानवेन फलचिन्ताम् अकृत्वेति भगवान् श्रीकृष्ण उपदिशति।

माधवः—(प्रविश्य) रथ आनीतः, तात!

भाऊरावः—तर्हि प्रतिष्ठामहे, (साश्रुसगद्गदम्) (पत्नीं प्रति) आर्ये एष गतोऽस्मि। (निष्क्रान्ताः सर्वे)

जानकी—(शोकावेगं कथम् अपि निरुन्धन्ती) गतः जीवन-सखः मम अर्धाङ्गम् अविभाज्यं नूनम्। हा! किं करोमि?

गते नाथे शून्यं, विपिनमिव वृत्तं गृहमिदं,
गते तारानाथे, तिमिरपरिपूर्णं नभ इव।
मनो! धृत्वा धैर्यं भव विभुवरप्रार्थनपरं,
रतं कर्तव्येऽन्या न गतिरिह शोकं शमयितुम्॥

(दाण्डी-सत्याग्रह-यात्रा-वर्णनम्)

(प्रवेशः—४)

उज्ज्वला—(सानन्दं महानसं प्रविश्य) मातः! मातः! रोम-हर्षणं खलु वृत्तं समाचार-पत्रे वर्णितम्।

जानकी—(सौत्सुक्यम्) पठ पठ वत्से ।

उज्ज्वला—अहमदाबादे साबरमती-तीर आश्रमो गान्धिमुनेस् ततः पद-यात्रा प्रारब्धा । अशीति सत्याग्रहिणो नेतारम् अन्वगच्छन् । प्रस्थान-काले सुवासिनीभिर् नीराजितो महान् नेता कुङ्कुम-तिलकं भाले विलिप्य, पश्चात् सत्याग्रहिणोऽपि ।

जानकी—अहोभाग्यं सर्वेषाम् एतेषां शान्ति-वीराणाम् । ततः ।

उज्ज्वला—सुरतनगरस्य दक्षिणतः दाण्डी नाम ग्रामः सागरतीरे, सपाद-शतं क्रोशं दूरम् अहमदाबादतः ।

जानकी—महद् अन्तरं खलु एतत् । गमनं तु पद्भ्यां ननु ।

उज्ज्वला—आम्, पद-यात्रा सा । ग्रामे ग्रामे एतद् अपूर्वं शान्ति-सेना-दलं सत्कृतं पूजितं स्तुतं च गीतैर् ग्रामिकैः । पाथेयं भोजनेन सह समर्पितम् । महान् जन-संमर्दः मिलितः बाल-स्त्री-पुरुषाणां तस्य दर्शनार्थम् ।

जानकी— परम-भाग्यवन्तः खलु ते, प्रत्यक्षीकृता यैः सा यात्रा ।

विट्ठलः—(प्रविश्य) राम राम! मातः! क एते भाग्यवन्तः ?

जानकी—समये आगतोऽसि । सत्याग्रह-यात्रा-वर्णनं पठति वत्सा । शृणु ।

विट्ठलः—भाग्यवान् अस्मि नूनम् । भगवता काले एव प्रेरितोऽत्राऽऽगन्तुम् । पठ वत्से ।

उज्ज्वला—दिनचर्याऽपि वर्णिता दलस्य ।

जानकी—कीदृशी सा ?

उज्ज्वला—प्रातः चतुर्वादन-समये सर्वे शय्यां त्यजन्ति । देहशुद्धेर् अनन्तरं गीतोपनिषदादीनां पाठं कुर्वन्ति । सामूहिक-रीत्या च गभीर-ध्वनिना गीतं गायन्ति 'वैष्णवजन तो ते ने कहिये' नाम विशेष-प्रियं गीतं तस्य मुनेः ।

विट्ठलः—कः स मुनिः ? गान्धिर् ननु ?

उज्ज्वला—आम्, आधुनिको मुनिर् एव सः । पुराद् बहिर् आश्रमे वसन् वस्त्र-द्वयेन स्वदेहम् आवृण्वन्, गीतोपनिषदादि-ग्रन्थान् मानयन्, तद्-उपदेशं स्वयम् अनुसृत्य बोधयन्, बान्धवेष्व् अन्याय-दूरीकरणाय च शान्तिमार्गेण प्रयतमानः स 'मुनिः' इति अभिधानम् अर्हत्य् एव ।

विट्ठलः—वत्से ! साक्षात्कृत इव आभाति स महामुनिः त्वया कृतेन वर्णनेन ।

जानकी—नूनं महामुनिर् असौ ।

विट्ठलः—जाते ! चतुराऽसि । कुतस् त्वया इदं ज्ञानम् अधिगतम् ?

उज्ज्वला—तस्य पूर्वचरितस्य पठनात् ।

विट्ठलः—हन्त ! यदि शिक्षितोऽभविष्यं पठन-मात्रे तर्हि स्वयम् एव पठनानन्दम् अवाप्स्यम् ।

उज्ज्वला—इदानीम् अपि अध्येतुं शक्नोषि, यदि बलवद् इच्छसि ।

विट्ठलः—इदानीम् अपि ? अस्मिन् प्रौढवयसि ?

उज्ज्वला—आम् निःसंशयम् , प्रयत्नम् तावद् अपेक्ष्यते ।

विट्ठलः—को माम् शिक्षयेत् ?

उज्ज्वला—का चिन्ता ? अहं शिक्षयिष्ये । गान्धिना प्रेरितं मया पूर्वं संकल्पितं च प्रौढशिक्षणाऽऽरम्भं त्वत्त एव करिष्यामि ।

विट्ठल—पश्यामि,प्रयते यथावसरम् ।

जानकी—वत्से ! ततस् ततः ।

उज्ज्वला—प्रार्थनाऽनन्तरम् प्रयाणं सेनायाः, संगीतं च । विट्ठल ! किमर्थं गीत-गानम् ।

विट्ठलः—श्रम-परिहारार्थम् , श्रम-विस्मृतये नाम । महाभार-वहन-समये कर्मचारिणोऽपि गायन्ति इति प्रसिद्धम् ।

उज्ज्वला—आम् , दृष्टं मया भवन-रचना-विधौ कदाचित् ।

जानकी—प्रातः पद-यात्रा सुखाऽऽवहा भवति शीत-पवनेन इत्य् अनुभूतं मया बाल्ये अग्रजेण सह प्रवसन्त्या ।

विट्ठलः—मातः ! वयम् अपि पदप्रवासार्थं प्रातर् एव प्रतिष्ठामहे ।

जानकी—ततः किं ? जाते । पठ ।

उज्ज्वला—नव-वादन-पर्यन्तं मार्गम् आगम्य, जल-च्छाया-फल-शाकादिभिर् जीवनाऽऽवश्यक-वस्तुभिः समृद्धे स्थले निविश्य भोजनादि समाप्य विश्रम्य च चतुष्पञ्च-वादन-समये पुनः मार्गक्रमणं करोति सत्याग्रहि-समूहः ।

जानकी—सप्ताऽष्ट-वादन-समये च कुत्राऽप्य् उचित-स्थले निविशति भोजन-निद्रादि समाप्य प्रातर् उत्तिष्ठति ननु ?

उज्ज्वला—आम् अम्ब ! एवं चतुर्विंशतिदिनान्ते दाण्डीग्रामं सत्याग्रहिणः प्रापुः । पथि ग्रामे-ग्रामे च सभास्व् अन्याय्य-निर्बन्ध-भङ्गाय स्वतन्त्रता-प्राप्त्यै च प्रेरयति बान्धवान् गान्धिमुनिः ।

जानकी—परं कथं सर्वकारेण प्रारम्भे एव वा मध्ये वा न प्रतिबद्धा सा सेना स्व-प्रतिकूल-व्यापारात् ?

विट्ठलः—मयाऽप्य् अत्राऽऽश्चर्यम् अनुभूयते ।

उज्ज्वला—(विचिन्त्य) कोऽप्य् अन्तःस्थो हेतुः स्यात्। स्वपृष्ठारूढं स्वच्छन्दं च क्रीडन्तं शशकं ज्ञात्वा तं सद्यो ग्रहीतुं समर्थोऽपि वनराजः कंचित् कालं मर्षयति तस्याऽपराधम्।

विट्टलः-भगिनि! स्वस्य पितुर् वृत्तं पठ तावद्, उत्सकोऽस्मि भृशं तज् ज्ञातुम्।

उज्ज्वला—(सस्मितम्) प्रतिव्यक्ति वार्तां न ददाति समाचार-पत्रम्।

विट्टलः—अप्य् एवम्? तर्हि कथं लभ्येत सा? कदा वा?

उज्ज्वला—न पत्रं विना तातस्य।

जानकी—अथ सत्याग्रह-वृत्तं पठ।

उज्ज्वला—सागर-तीरं प्राप्य तत्र स्थित्वा च गान्धिर् उद्घोषयत्—'निसर्ग-निर्मितं परं शासनेन कं विना ग्रहीतुं निषिद्धं मुष्टि-मात्रं लवणं गृहीत्वा साम्राज्य-मदं नाशयामि', तथैव चाऽसाव् अकरोत्। सत्याग्रहिभिर् अपि 'धिक् अन्याय्य-निर्बन्धम्! जयतु स्वतन्त्रो हिन्द-देशः!' इति उद्घोष्य मुष्टिभिर् लवणं गृहीतम्।

जानकी—(सभयम्) ततः।

उज्ज्वला—शस्त्राऽस्त्र-सज्जा आरक्षका धावित्वा सत्याग्रहिणां मुष्टिभ्यो लवणं ग्रहीतुं प्रायतन्त।

विट्टलः—किं ततस् संवृत्तम्? लवण-ग्रहणे साफल्यं प्राप्तवन्तः किम् ते?

उज्ज्वला—नहि नहि। गान्धिर् उच्चैर् आदिशत्—'मा मा मुञ्चत लवणं तर्जिता अपि, ताडिता अपि।'

जानकी—परीक्षा-प्रसङ्गः खल्व् एष तितिक्षायाः सत्याग्रहिणाम्।

उज्ज्वला—आरक्षकैर् भृशं ताडितैर् अपि तैर् न स्वकीया रक्त-रञ्जिता अपि मुष्टय उद्घाटिताः, न च लवणं त्यक्तं मनाग् अपि।

जानकी—धन्याः खलु वीरास् ते सुपुत्रा भारतस्य।

विट्टलः—भगिनि! धन्यस् ते पिता। ततः।

उज्ज्वला—रात्रौ बन्दीकृतो गान्धि-महाशयोऽनुयायिभिः सह। इदं तु सुपूर्वम् एवाऽपेक्षितं सर्वैः।

विट्टलः—तव जनकोऽपि बद्धस् स्यात्। कुत्र नीतो जनकः? कियद् अवधि कारावासः।

जानकी—अज्ञातं सर्वम् एतद् अद्यावधि। चिन्ताऽऽकुला वयम्। भगवान् एव रक्षिता। वयं पामराः किं कुर्मः?

विट्टलः—समाप्तं किं वृत्तम्?

उज्ज्वला —नहि। प्रिय-नायके बन्दीकृते प्रक्षुब्धैर् जनैस् स्वयं स्फूर्त्या लवणागाराणि लुण्ठितानि।

जानकी —ततः।

उज्ज्वला —सर्वकारोऽपि प्रक्षुब्धः। गौराङ्ग-सैनिकैर् निःशस्त्रा निरपराधिनोऽपि जनाः सहसाऽभिभूतास् ताडिताश् च लगुड-प्रहारैः।

जानकी —अहह ! सत्ताम् आदधानानां रीतिर् एव एषा। ततः

उज्ज्वला — स्थाने-स्थाने सागर-तीरेऽपि लवण-सत्याग्रहोऽनुष्ठितः। शासन-सेवकैर् अपि निर्भयम् अवधीर्य सेवाया निःसारणसंभवम् अपि।

विट्ठलः—अहा ! कियद् धैर्यम् उत्पादितं गान्धि-मुनिना तादृशेषु साधारण-जनेष्व् अपि।

जानकी —आत्म-क्लेश-प्रभावोऽयं तस्य नूनम्। ततः।

उज्ज्वला —आरण्य-सत्याग्रहोऽपि कृतः जनैस् स्वयं स्फूर्त्या।

जानकी —कथं नु।

उज्ज्वला —वृक्षान् विच्छिद्याऽरण्य-निर्बन्धं भङ्क्त्वा।

विट्ठलः—कुत्र कृतः सः ?

उज्ज्वला —पनवेलसमीपस्थे चिरनेराऽऽख्ये स्थाने।

जानकी—तत्राऽपि शासनेन ताडिताः किं सत्याग्रहिणः ?

उज्ज्वला—न ताडिता एव, अपितु भुशुण्डी-गुलिकाभिः केचन घातिता अपि।

विट्ठलः—हन्त ! देश-स्वातन्त्र्यार्थं तैस् सुखं प्राणाः परित्यक्ताः।

जानकी—धन्यास् ते तथा यष्टि-प्रहारं सोढवन्तः।

उज्ज्वला—एवं देशे सर्वत्र बन्दीकृता लक्षसंख्याकाः सत्याग्रहिणः। कारागाराण्य् अप्य् अपर्याप्तानि जातानि।

जानकी—ततः किं कृतं शासनेन ?

उज्ज्वला—नवानि विरचितानि। अनेन निःशस्त्र-संग्रामेणैको महान् लाभः संजातो भारतीयानाम्।

जानकी— कथम् ?

उज्ज्वला—समाचारपत्रैः प्रसारितेनाऽनेन वृत्तेन आङ्ग्ल-शासनस्याऽन्यायित्वं निर्दयत्वं, भारतीयानां शौर्यं धैर्यं च सुप्रतीतं जगतः। सहानुभूतिश् च तस्य अवाप्ता इति नोपेक्षणीयम् एतत्।

माधवः—(प्रविश्य) परं जगतो निष्क्रिया सहानुभूतिः किं करिष्यति ?

भारते न्यायशासनं स्थापयितव्यं स्वातन्त्र्यं वा तस्मै दातव्यम् आङ्ग्लैर् इति प्रभावि-प्रचारं कर्तुं जगद् न धृष्णुयात् ।

उज्ज्वला— कालाऽधीनः स विषयः । परम् अनेन शान्ति-समरेण गान्धिना जनेषु धैर्यं, निर्भयत्वम् , अन्याय-प्रतीकार-सामर्थ्यम् , आत्म-विश्वासादयस् सद्-गुणाः समुत्पादिताः । कारावासस्य च भयं दूरीकृत्य, कारावासाय प्रतिष्ठा प्रापिता तावत्काल-पर्यन्तं लोकगर्हिताय इत्येतत् सत्यं सुज्ञा मानयन्त्य् एव ।

विट्ठलः—चिरायितं खलु मयाऽऽत्र । अथऽऽपृच्छे । आगच्छाम्य् आर्यवर-वृत्तं ज्ञातुं यथावसरम् । राम राम । (निष्क्रान्तः) ।

माधवः—राम राम ।

जानकी—मयाऽपि गृहकार्येऽवधेयम् ।

(प्रवेशः—५)

जानकी—अहो ! दिवसोऽयं खलु चिरस्मरणीयः । अहो ! भगवत्-कृपा ! परम-कारुणिकेन तेन मम प्रार्थना स्वीकृता । प्राणनाथः प्रत्यागच्छति गृहं यशोऽन्वित इति विशेषः । वत्सौ गतौ स्थानकं स्वागतार्थम् । विजयिनो वीरस्य सानन्दं स्वागतं कुर्वन्त्या वीराङ्गनाया मानास्पदं पदं दिष्ट्या मयाऽद्य लभ्यते । कथं नु मया विस्मृता नीराजन-विधेः सज्जा । करोमि ताम् एव प्रथमम् । (तथा कृत्वा)सज्जाऽस्मि स्वागतार्थम् । परं पुष्पहारः कुतो लभ्यः । मा भवतु । न तेन विना काऽपि क्षतिः । सास्मित-नेत्र-कटाक्ष एव निर्वाहयेत् पुष्पहार-समर्पणम् । (पदध्वनिं श्रुत्वा) अयि ! आगतो गृहस्वामी । वेपते मे हृदयम् आनन्दातिशयेन । (द्वारे तिष्ठति प्रज्वाल्य नीराजनं दुग्धपात्र-सहिता । देहलीं प्राप्तस्य पत्युः चरणौ दुग्धेन प्रक्षाल्य, तं नीराज्य सस्मितं स्वागतं विधाय च आभ्यन्तरं प्रविशति ।) सर्वे उपविशन्ति स्वे-स्वे आसने, विट्ठलोऽपि स्थानकं गतः प्रत्यागतस् तत्र) ।

जानकी—वत्से ! मोदकानि निवेदय श्रीगणपतये, पश्चाद् देहि विट्ठलाय । (तथा करोति उज्ज्वला) ।

विट्ठलः—आतुरोऽहं सर्वं वृत्तं श्रोतुं यथावसरम् । इदानीं विश्राम्यतु भवान् ।

भाऊरावः—अवश्यं निवेदयिष्यामि ।

विट्ठलः—(निपुणं निरीक्ष्य) लगुडाघातस्य व्रण इव दृश्यते ललाटे । हा ! आकृतिर् अपि क्षीणा प्रतीयते ।

जानकी—कदन्न-परिणामोऽयम् ।

विट्ठलः—आपृच्छ इदानीम् । राम राम ! (प्रणम्य प्रतिष्ठते) ।

भाऊरावः—राम राम ! आगच्छ यथावसरम् । (निष्क्रान्तः विट्ठलः) ।

जानकी—वत्सेन धनार्जनं प्रारब्धम् इति कथितं किम् ?

भाऊरावः—आम् , समीचीनं कृतं तेन । इदानीं निश्चिन्तोऽस्मि प्रपञ्च-विषये ।

जानकी—कथम् ? विचार्यतां क्षणम् । काऽपि चिन्ताऽवशिष्टैव ।

भाऊरावः—(विचार्य) हा ! स्मृतम् , वत्साया विवाह-चिन्ता ।

उज्ज्वला—(सलज्जम्) तात ! विश्राम्यतां प्रथमम् , पश्चाच् चिन्ता कार्या । न विषयेऽस्मिन् त्वरा कार्या ।

भाऊरावः—(सस्मितम्) कारायाम् अपि चिन्तां वहन्न् आसम् । वत्सायै निश्चित-प्रायश् च जामाता ।

जानकी—(समोदम्) अपि सत्यम् । कोऽसौ ! किं करोति ?

भाऊरावः—वत्सायाः सदृश एव देश-सेवा-रतः शूरवीरश् च ।

जानकी—सुन्दरोऽपि ननु ।

भाऊरावः—आम् , अनुरूप एव, कथयामि सर्वं सविस्तरम् ।

जानकी—दुग्ध-शर्करा-योगः खलु । सर्वाऽपि चिन्ता प्रायः दूरीकृता श्रीगजाननेन ।

भाऊरावः—येन महात्मना देश-सेवाया अपूर्वः पन्था मादृशेभ्यः सेवोत्सुकेभ्यो दर्शितः, महत्यां च शान्ति-समर-यात्रायां समावेश्य वयम् अनुगृहीतास् तस्य कृतज्ञता-पूर्वकं सादरं च स्मराम इदानीम् ।

उज्ज्वला—उचितम् एव तात !

जानकी—निःसंशयम् ।

भाऊरावः—अन्यायं प्रतिरोद्धुमुज्ज्वलधिया धीराग्रणीगान्धिना,
सत्याधिष्ठितसंगरस्त्वभिनवो हिंसाविहीनः कृतः ।
साश्चर्यं जगतेक्षितः स सफलस्तं मार्गमार्ता जना,
धैर्येणानुसरन्त्वसौ विजयतां ख्यातो महात्मा चिरम् ॥

अंतिम = प्रवेश = मुंबई मोवाणीत =
स्वनिरीक्षित = दि. १७-१०-१९७१